(महाभारते)

भवद्गीता द्वादशटीकास

हिता पंचदशाध्याय:







पंचदशाध्यायः

शांकरभाष्य
आनंदगिरिकृत टी॰
श्रीधरी स्वामिकृत
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
उत्तमवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषाअनुवाद ॥

श्रीभगवानुवाच ऊर्ध्वमूलमधःशाखमश्वत्थं
प्राहुरव्ययं छंदांसि यस्य पर्णानि यस्तं वेद स
वेदवित् १ शांकरभाष्यं टीका १

यस्मान्मदधीनं कर्मिणां कर्मफलं ज्ञानिनांच ज्ञानयोगधर्म
प्राप्यं सत्वेन्च ज्ञानफलमतो भक्तियोगेन मां ये सेवन्ते मत्प्रसा
दात् ज्ञानप्राप्तिक्रमेण गुणातीता मोक्षं गच्छन्ति किमु वक्तव्यमा
त्मनस्तत्वं सम्यक् विजानन्त इत्यतो भगवानर्जुनेनापृष्टमप्यात्म
नस्तत्वं विवक्षुरुवाच ऊर्द्ध्वमूलमित्यादि तत्र तावद्वृक्षरूपकक
ल्पनया वैराग्यहेतोः संसारस्वरूपं वर्णयति विरक्तस्य हि संसारा
त् भगवत्तत्वज्ञानेधिकारो नान्यस्येति ऊर्द्ध्वमूलमिति ऊर्द्ध्वमूलं
कालतः सूक्ष्मत्वात् कारणत्वात् नित्यत्वात्महत्वाच्चोर्द्ध्वमुच्यते
ब्रह्माव्यक्तमायाशक्तिमत्तन्मूलमस्येति सोयं संसारवृक्ष ऊर्द्ध्वमू
लः श्रुतेश्च ऊर्द्ध्वमूलोऽवाक्शाख इति पुराणेऽव्यक्तमूलप्रभव
स्तस्यैवानुग्रहोत्थितः बुद्धिस्कन्धमयश्चैव इन्द्रियान्तरकोटरः म
हाभूतप्रशाखश्च विषयैः पत्रवांस्तथा धर्माधर्मसुपुष्पश्च
सुखदुःखफलोदयः आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः
एतद्ब्रह्मवनंचैव ब्रह्मा चरति नित्यशः एतच्छित्वा च भित्वा
च ज्ञानेन परमासिना ततश्चात्मरतिं प्राप्य यस्मान्नावर्तते पुनः
इत्यादि तमूर्द्ध्वमूलं संसारं मायामयं वृक्षमधःशाखं महदहंका
रतन्मात्रादयः शाखा इवास्याधो भवन्तीति सोयमधःशाख
स्तमधःशाखं न श्वोपि स्थास्यते इत्यश्वत्थस्तं क्षणप्रध्वंसिन
मश्वत्थं प्राहुः कथयन्ति श्रुतिवादा इत्यव्ययं संसारं मायामयं
अनादिकालप्रवृत्तत्वात् सोयं संसारवृक्षोव्ययः अनाद्यनन्तदेहा
दिसन्तानाश्रयो हि सुप्रसिद्धस्तमव्ययं तस्यैव संसारवृक्षस्य इ
दमन्यद्विशेषणान्तरं छंदांसि यस्य पर्णानि छन्दांसि छादना

दस्यृग्यजुःसामलक्षणानि यस्य संसारवृक्षस्य पर्णानीव पर्णानि यथा वृक्षस्य रक्षणार्थानि पर्णानि तथा वेदाः संसारवृक्षपरिरक्षणार्था धर्माधर्मतद्धेतुफलप्रकाशनार्थत्वात् यथा व्याख्यातं संसारवृक्षं समूलं यस्तं वेद स वेदवित् वेदार्थविदित्यर्थः १

आनन्दगिरिकृत टीका १

ज्ञानेन गुणात्यये दर्शिते नाशितत्वे तेषां विज्ञानेनात्मयाथात्म्यादनाशितत्वे तेनापि तयोर्ग्यत्वात्र ज्ञाने गुणात्ययहेतुरित्याशङ्का निरस्य साक्षादेव श्रवणादिहेतुं सन्न्यासं विधित्सुः स्वरूपतस्य परमपुरुषार्थतां च विवक्षुरध्यायान्तरमारभ्यत इत्यादिति कर्म्मिणां ज्ञानिनश्च शब्देधिकृताः तत्र कर्म्मिणां कर्म्मानुकूलं फलमीश्वरायत्तं फलमत उपपत्तेरिति न्यायात् ज्ञानिनामपि तत्तत्फलमीश्वरायत्तमेव ततोऽस्य बन्धविपर्ययाविन्नकृत्वात् यस्मादेवं तस्माद्ये भक्तियोगेन योगेन मामेव सेवन्ते ते मत्प्रसादद्वारा ज्ञानेप्सा तेन गुणातीतास्तत्त्वा भवन्तीति स्थितमित्यर्थः येत्वात्मतत्त्वमेव सन्देहायपोहेन जानन्ति तेन ज्ञानेन गुणातीताः सन्तो मुक्तिं गच्छन्तीति किमु वक्तव्यमित्यर्थः सिद्धमर्थमाह किमु वक्तव्यमिति आत्मतत्त्वज्ञानं यतः संसारहेतुः ज्ञानं मोक्षात्तु फलमतोन्येन किञ्चिदित्यपेक्षमपि तत्त्वं भगवानर्जुनाय प्रश्नमाविष्य तस्य तत्त्वस्यादनाभिमानादित्याह अत इति तत्त्वे निवद्यते किमिति संसारो वर्ण्यते तत्राह तत्रेति अध्यायादिः सम्बन्धार्थः वैराग्यमपि किमिति रूप्यते तत्राह विरक्तस्येति इति वैराग्याय संसारवर्णनमिति शेषः नाशसम्भावनार्थैः वृक्षरूपकैर्बन्धहेतोर्दर्शयति ऊर्ध्वमूलमिति कथं कालतः सूक्ष्मत्वं तदाह कारणत्वादिति तत्रैव कथं कार्यापेक्षया नियतपूर्वभाविनादनादित्वादित्याह नित्यत्वादिति सर्वव्यापित्वादेव कथं सम्भावयति महत्त्वाच्चेति ऊर्ध्वमस्थितमुत्कृष्टमिति यावत् तस्य कूटस्थस्य कथं मूलत्वमित्याशं

क्याह अश्वत्थेति स्मृतिमूलत्वेन श्रुतिमुदाहरति ऊर्द्धेति ऊर्द्धंमूलो
निकृष्टाः शाखा इव महदादयो यस्य स तथा प्रकृते संसारवृक्षे पुरा
णसम्मतिमाह पुराणो वेति अव्यक्तमव्याकृतं तदेव मूलं तस्मा
त् प्रभवने प्रभवो यस्य स तथा तस्यैव मूलस्याव्यक्तस्यानुग्रहाद‌ति
दृढत्वात् स्थितः सम्बर्द्धितः तस्य लौकिकवृक्षसाधर्म्यमाह बुद्धी
त्यादिना वृक्षस्य हि शाखाः स्कन्धादुद्भवन्ति संसारस्यच बुद्धेः सका
शाज्ज्ञानापरिणामा जायन्ते तेन बुद्धिरेव स्कन्धस्तन्मयस्तन्मयश्चरो
घं संसारवृक्षः इन्द्रियाणामन्तराणि छिद्राणि कोटराणि यस्य स त
था महान्ति भूतानि पृथिव्यादीन्याकाशान्तानि विशाखास्तम्बा यस्य
तथा आजीव्यत्वमुपजीव्यत्वे ब्रह्मणाधिष्ठितो वृक्षो ब्रह्मवृक्षस्त
स्यापि ज्ञानं विना छेत्तुमशक्यतया सनातनः विरक्तः पतत्र ब
ह्मणः परस्यात्मनो वनं वननीयं सम्भजनीयमत्र हि ब्रह्म प्रतिष्ठि
तं तस्य वृक्षस्य संसाराख्यस्य तदेव ब्रह्म सारभूतं अथवास्य ब्रह्म
वृक्षस्यानवच्छिन्नस्य संसारमण्डलस्य तदेतद्ब्रह्म वनमिव वने व
ननीयं सम्भजनीयं नहि ब्रह्मातिरिक्तं संसारस्यास्पदमस्ति ब
ह्मैवाविद्यया संसारत्वमभ्युपगमादित्यर्थः ब्रह्मवृक्षेति एतज्ज्ञा
नेनोक्तं संसारवृक्षं छित्वा प्रतिबन्धकाभावादात्मनिष्ठो भूत्वा पु
नरावृत्तिरहितं कैवल्यं प्राप्नोतीत्याह एतदिति अधःशाखमित्येत
द्व्याचष्टे महदिति आदिशब्देनेन्द्रियादिसंग्रहः संसारवृक्षस्यानित्य
त्वलत्वं प्रमाणमाह प्राहुरिति क्षणध्वंसित्वेनाव्ययत्वं विरुद्धमित्या
शंक्याह संसारेति तदेवोपपादयति अनादीति छादने रक्षणे
प्रावरणे वा कर्मकाण्डानि स्वर्गारोहावरोहफलानि नानावि
धार्थवादयुक्तानि संसारवृक्षं रक्षन्ति तद्विशेषं दोषत्वावहत्वं तेन
तानि छन्दांसि पर्णानीव भवन्तीत्यर्थः तदेव प्रपञ्चयति यस्येति
उक्तार्थे हेतुमाह धर्मेति कर्मकाण्डानां वेदानामिति शेषः क
र्मब्रह्माख्यसर्ववेदार्थस्य तत्तात्त्विकभावमुपेत्य व्याचष्टे वेदार्थेति

श्री·
गी·टी·
प·

वैराग्येणविनाज्ञानेनचभक्तिरतःस्फुटंवैराग्योपस्कृतंज्ञानमीशःपंच
दशेदिशत पूर्वाध्यायांतेमांचयोव्यभिचारेणभक्तियोगेनसेवत इ
त्यादिनापरमेश्वरमेकांतभक्त्याभजतःतत्प्रसादलब्धज्ञानेनब्रह्म
भावोभवतीत्युक्तंनचैकांतभक्तिर्ज्ञानंचाविरक्तस्यसंभवतीतिप्र
हृष्टमनेनेनवैराग्यपूर्वकंज्ञानमुपदेष्टुकामःप्रथमंतावत्तस्माद्वे
ह्यकाम्यांसंसारस्वरूपंवृक्षरूपकालंकारेणवर्णयन्नाह श्रीभग
वानुवाच ऊर्ध्वमूलमिति ऊर्ध्वमुत्तमःक्षराक्षराभ्यामुत्कृष्टःपुरुषो
त्तमोमूलंयस्यतंअधःइतितनोवाचीनाःकार्योपाधयोहिरण्यगर्भा
दयोगृहीताःतेनेनशाखाइवशाखायस्यतंविनश्वरत्वेनश्वःप्रभातप
र्यंतमपिनस्थास्यतीतिविश्वासानर्हत्वात् अश्वत्थंप्राहुःप्रवाहरू
पेणाविच्छेदादव्ययंप्राहुःऊर्ध्वमूलोऽवाक्शाखएषोऽश्वत्थःसना
तनइत्याद्याःश्रुतयःछंदांसिवेदायस्यपर्णानिधर्माधर्मप्रतिपा
दनद्वारेणच्छायास्थानीयैःकर्मफलैःसंसारवृक्षस्यसर्वजीवाश्रय
णीयत्वापादनात्पर्णस्थानीयावेदायस्तमेवंभूतमश्वत्थंवेदसएव
वेदार्थवित् संसारवृक्षस्यमूलमीश्वरःश्रीनारायणःब्रह्मादयःत
द्देशाःशाखास्थानीयाःसर्वसंसारवृक्षोविनश्वरःप्रवाहरूपेणनि
त्यश्च वेदोक्तैःकर्मभिःसेव्यतामापादितश्च इत्येतावानेवहिवेदार्थः
अतएवंविद्वान्वेदविदित्युच्यते १

पिशाचभाष्य टीका ३

उत्सर्वेषांलोकानामुपरिष्टाद्वर्तमानंसत्यलोकेनिवासाहिरण्यग
र्भोतःकारणाभिव्यक्तंसर्वस्यजगतःसृष्टिस्थितिसंहारहेतुभूत
मव्यक्तात्मकंब्रह्म ऊर्ध्वंकारणंयस्यसःऊर्ध्वमूलःसंसारवृक्ष
स्तमश्वत्थःश्वोननिष्ठतीति अधःशाखंतस्मात्सत्यलोकात्अ
धोभूतलोकांतवासीशाखमश्वत्थंप्राहुःपंडिताअव्ययमना
दिनिधनंछंदांसिवेदाःपर्णानिआवरणरूपत्वात्तमश्वत्थंतत्त्वेनाधे
तिनमश्वत्थंयस्तंवेदसविदितवेदार्थविदित्यर्थः १ सवद

रामानुजभाष्य टीका ४

नः१

देवाध्यायेदेवदेवभूतयोः प्रकृतिपुरुषयोः स्वरूपंविशोध्यविशुद्ध
स्यापरिछिन्नज्ञानैकाकारस्यपुरुषस्येवप्राकृतगुणसंगप्रवाह
निमित्तोदेवाद्याकारपरिणामः प्रकृतिसंबंधोनादिरित्युक्तं अनं
तरेवाध्यायेपुरुषस्यकार्यकारणभयावस्यप्रकृतिसंगमूलो
भगवतैवकृतइत्युक्त्वागुणसंगप्रकारंसविस्तरंप्रतिपाद्यगुण
संगनिवृत्तिपूर्वकात्मयाथात्म्यावाप्तिश्चभगवद्भक्तिमूलेत्युक्तं
इदानींभजनीयस्यभगवतः क्षराक्षरात्मकबद्धमुक्तविभूतिम
त्ताविभूतिभूतात्क्षराक्षरपुरुषद्वयात् निखिलहेयप्रत्यनीक
कल्याणैकताननयात्यंतोत्कर्षरूपेणविसजातीयस्यपुरुषोत्त
मत्वंचवक्तुमारभते तत्रतावदसंगशस्त्रछिन्नबंधादक्षरा
ख्यविभूतिवक्ष्यमाणरूपबंधाकारेणविततमचित्परिणाम
विशेषमश्वत्थवृक्षाकारंकल्पयन् श्रीभगवानुवाच ऊर्ध्वमूल
मितिपसंसाराख्यमश्वत्थमूर्ध्वमूलमधःशाखमव्ययंचाहुःश्रु
तयः ऊर्ध्वमूलोऽवाक्शाखः एषोऽश्वत्थः सनातनः ऊर्ध्वमूलमवा
क्शाखंवृक्षंयोवेदसप्रतीत्याद्याः सर्वलोकोपरिनिविष्टसप्त
लोकादित्वेनतस्योर्ध्वमूलत्वं पृथिवीनिवासिसकलनरपशुमृग
पक्षिकृमिकीटपतंगस्थावरांततयाधः शाखत्वं सम्यग्ज्ञानो
दयात्प्राक्प्रवाहरूपेणाछेद्यत्वेनाव्ययत्वं यस्यचाश्वत्थस्यछंदां
सिपर्णान्याहुः छंदांसिश्रुतयः वायव्यंश्वेतमालभेत भूतिका
मः ऐंद्राग्नमेकादशकपालंनिर्वपेत् प्रजाकामइत्यादिश्रुतिप्र
तिपादितैः काम्यकर्मभिर्वर्द्धतेयः संसारवृक्ष इतिछंदांसिवप
र्णानिपत्रैर्हिवृक्षोवर्द्धते यस्तमेवंभूतमश्वत्थंवेदसवेदवित् वे
दोहिसंसारवृक्षस्यछेदोपायंवदतिछेद्यस्यस्वरूपज्ञानंछेदनो
पायज्ञानोपयोगीवेदविदित्युच्यते १

[illegible]नवयमकृत टीका ९

[illegible] १ ॥

परमार्थप्रपा टीका २

पूर्वाध्यायांतेमांचयोऽव्यभिचारेणत्यादिनामामीश्वरमेकांतभक्त्याभजत।
स्तदनुग्रहलब्धज्ञानेनगुणत्रयविक्तोणेणमहाब्रह्मभावोभव
तीत्युक्तंतत्रनहिविषयिणांवैराग्यमंतरेणैकांतभक्तिरुदेत्यतो
गुणत्रयविचित्रसृष्ट्यात्मकस्थूलप्रपंचस्यवृक्षदृष्टांतेनकुठारवद्वै
राग्यनाश्यत्वंदर्शयन्अश्वत्थोपनिषदुक्तसंसारवृक्षसाधर्म्यश्लोकद
येनरूपकालंकारेणवर्णयन्भगवानाहऊर्ध्वमूलमिति ऊर्ध्वः
अत्यन्तोत्कृष्टःक्षराक्षरातीतःपुरुषोमूलकारणंयस्य अर्वाची
नाःकार्योपाधयोहिरण्यगर्भप्रमुखास्तत्परःशाखायस्यतंश्वःप्रबोधा
न्तरकालेनतिष्ठतीत्यश्वत्थस्तमाहुःप्रवाधेस्यङ्गःसाध्यत्वादव्ययंप्र
वाहरूपेणचिरकालावस्थायित्वा अव्ययमाहुःतमस्येहं छंदांसीति
यस्यप्रपंचवृक्षस्यछंदांसिवेदाःपर्णानि प्रवृत्तिमार्गेणधर्माधर्म
प्रतिपादकानि छायास्थानीयानिभवंतितद्वर्णितानामापात
रमणीयत्वेनविश्रामजनकत्वात् यएवंयःपुरुषस्तमश्वत्थंवेद
सएववेदवित् अयमर्थःवेदेनावङ्पक्रमेमंत्रात्मकविभागेन
विषयेषिणाफलप्रलोभनेनप्रपंचवृक्षस्यप्रशंसनेनकृते उपसं
हारेतूपनिषद्विभागेनमुमुक्षूणांवैराग्योपदेशेस्तस्यरूप
त्वेनोपरमःप्रशंसितोलोकिकैःवेदविहितेनेनवेदनात्स्यपंचतति
चिते यद्वा अनेनश्लोकेनस्थूलप्रपंचरूपःस्थिरः[illegible]दिलक्ष
णःपुरुषविधस्थूलशरीररूपोविराड्वृक्षत्वेनवर्ण्यते सचलौ
किकवृक्षवद्यथोर्ध्वमूलोऽधःशाखोनास्तिकिंतूर्ध्वमूलमधःशाखं
प्राहुःऊर्ध्वमूर्धादिकारणंमूलंदेहंयंहिरण्यगर्भाख्यंयस्यअ
धोइंद्रादिदेवोऽस्तानिहेनवाहस्तपादादिरूपाःशाखायस्यपर्णेग
णमहतोह्यविषयमवालाइंन्यशेप्रोक्तं अतःछंदांसिवासनाप
वेसंसारतरोःपर्णानिआच्छादनस्थानीयानिदुःस्वरूपोपिसं
सारतरुःफलवासनाभिःस्वावरूपस्वावभासनस्यपर्थः अति
रपि अर्वाग्विलक्षणमसत्त्वश्चैव युक्ताभिन्वशोभिविहितेविश्वरूप
तस्यासनऋषयःसमस्तीरेवगाहमीबलाणासंविदानेति भाष्यं

तस्य विराजस्य मस्तः शिरोदेशः ऊर्ध्वबुध्नः ऊर्ध्वबुध्नः वर्तुलः अर्वाग
ध्वोविलेकश्चरेयं यस्मिन्नस्मिन् शिरोदेशे विश्वरूपं हिरण्यगर्भाख्या
नेतस्य प्रतिमास्तितस्य नाम महद्यश इति श्रुतेः यशः परमात्मस्व
रूपं निगूहते पास्याधिनमस्तीन्द्रच प्रमाणमाह तस्येति तस्य नी
रेसमीपे समर्षयः आसते मिथं निगच्छति व्यापारं कुर्वंतीति सप्तर्ष
यः ज्ञानेंद्रियाणि हे नेत्रे द्वे श्रुती द्वे नासे समीरसने तितनवाग
द्वेषमीके मैत्रिंद्रियं यथा प्रवर्तकः सूत्रात्मा तत्समीपे तत्प्रकाशेन प्र
वर्तंत इत्यर्थः तदेवाह वलिरिति किंभूता वाक् ब्रह्मणा हूत स
त्वा संविदाना संवदंती तथा वल्लीषु ऊर्ध्वमूलमवाक्शाख एषपको
श्वत्थः सनातनः तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते तस्मिन् लो
काः श्रिताः सर्वे तदु नात्येति कश्चनेति श्रूयते कर्पशावलं ब्रह्मतइन
नकश्चन अत्यति अतिलंघ्य न गच्छतीति तदेतत्यवनिहितिशेषभा
ख्याने १

वनमाली टीका ८

संसारपादपोनादिः छेद्यश्चाकृतात्मनां तच्छेदनं स्वमाहात्म्यं वप
वदशाश्वत्थे पूर्वाध्याये संसारवीजरूपं गुणत्रयमसंग्रमसम
ग्रं सारमहत्कानद्यस्यपेणं प्रतिवाच्यावर्तितं तद्रस्य प्रसाधनं सर्ववाधाय
प्रपंचयति पंचदशेमोचयोगाभिवारेणेत्यनेन स्वभजनस्य गुणा
तिक्रमहेतुत्वोक्तातत्कथमेतत्साम्यतयाह प्रथमानस्येनाह शमा
हात्म्यमिति मत्वाशंकानिराकरणायानया साधारणं स्वमाहात्म्यं व
वदति तत्रादौ जगतो हृदसाम्यमाह ऊर्ध्वेति ऊर्ध्वे निर्विशेषे चिदाचि
त्मकृति त्रिगुणमूलानि यस्य तमूर्ध्वमूलं अधः शाखं विश्रुता
पेन यायो निकृष्टब्रह्मादिवेन तनेमहदायुवेतनं वंशाखायस्यतं
श्लोणेकप्रकारेणान्यस्यास्पतीति षष्ठं अश्वत्थं अवनाशालेपनस्थितं
वाश्वत्थं सदाजन्मादिविकारोपेन मित्यर्थः तथापि प्रवाहरूपे
णानतत्कालानुसारेणाकालवेयप्यसीन्तमाह अव्ययमिति ऊर्ध्वमू
लोर्वाक्शाख एषोश्वत्थः सनातनः इत्याद्याः श्रुतयः प्राहुः अव्य

श्री॰
गी॰ टी॰
प॰

क्तमूलप्रभवस्तस्यैवानुग्रहोद्गितः बुद्धिस्कंधमयश्चैव इंद्रियांतरकोट
रः महाभूतविशाखश्च विषयैः पत्रवांस्तथा धर्माधर्मसुपुष्पश्च सुखदुः
खफलोदयः आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः एतद्ब्रह्म
वनं चैव ब्रह्माचरति साक्षिवत् एतच्छित्वा च भित्वा च ज्ञानेन परमा
सिना ततश्चात्मगतिं प्राप्य तस्मान्नावर्तते पुनरित्यादयः स्वतयश्च
अव्यक्तो हरिर्मूलं यस्य स तस्याव्यक्तस्यानुग्रहादतिदृढाद् उत्थितः
संवर्द्धितः वृक्षस्य हि शाखाः स्कंधाद् उद्भवंति संसारस्य च बुद्धेः सका
शान्नानाविधाः परिणामा विभवंति तेन साधर्म्याद् बुद्धिरेव स्कंधः
स्तन्मय एव यो बुद्धिरत्र महत्तत्त्वम् इंद्रियाण्यंतराणि छिद्राण्येव कोट
राणि यस्य स महांति भूतान्याकाशादीनि विविधाः शाखा यस्य वि
शाखस्तं भोग्यस्यैव ता आजीव्य उपजीव्यः परं ब्रह्मणाधिष्ठितो वृक्षो
ब्रह्मवृक्षः भगवज्ज्ञानं विनाच्छेत्तुमशक्यत्वात् सनातनः एतद्ब्रह्म
वनं जीवरूपं ब्रह्मणो भोग्यं ब्रह्मणोऽधीनं च परं ब्रह्म साक्षिवदाच र
ति न त्वेतत्कृतेन लिप्यते एतद्ब्रह्मवनं छित्वा भित्वा वैराग्यखड्गेन
निःशेषं छित्वेत्यर्थः ब्रह्मगतिं ब्रह्मज्ञानं प्राप्य पुनर्नावर्त
ते इत्यर्थः अत्र च रागादिरसानुपमानोऽनुगतमीरतिर्यैर्यापतित
महोन्नमूलितमात्तेन मत्स्यपुराणमानीकृत्य जीवनमिदं रूपक
कल्पनेति द्रष्टव्यं तेन नोर्ध्वमूलादयः शाखान्वयनपपत्तिः यस्य
वेदस्यांगं छिंदांसि छादनात्तत्त्ववस्तुआवरणात् संसारवृक्षरक्षणा
द्वा कर्मकांडानि अत्यंतः सामानि धर्माधर्मतद्धेतुफलप्रकाश
नार्थत्वात्तेषां यस्तथाभूतं वेद स वेदवित् संसारवृक्षं ज्ञात्वा
वैराग्यपूर्वकं भगवदाराधनेनोत्पन्न [illegible] नेन भ
गवदपरोक्षज्ञानेन वृक्षं छित्वा मुक्तिं प्राप्नुयादिति हि सर्ववेदार्थस्त
थो वेद स एव सर्ववेदार्थविदिति भावः १

गतम वैजयन्ती टीका १

संसारच्छेदी वैराग्यं जीवोऽशो ममैव मायतः इत्यादरोऽत्र मयाहृनि

तिपंचदशेस्मतम त्रयोदशे प्रतिपुरुषयोरीश्वरस्य च स्वरूपया
थात्म्यं तयोस्तेन चाभिन्नाभिन्नसंबंधरूपं यथार्थं कृत्तानं प्रतिपा
द्य विशुद्धज्ञानवच्छिन्नज्ञानैकाकारस्येश्वरांशभूतस्य पुरुषस्याना
दिप्रकृतिसंबंधकृतसंसारबंधश्च कस्मात्तद्देशे पुरुषस्यानादि
कर्मवासनानुगुणेन भगवत्संकल्पेन प्राकृतगुणसंगाद्बंधः पुन
श्च तस्य गुणस्वरूपपर्यायान्यज्ञानेन भगवद्भक्तिशीरस्केन स्वस्व
रूपप्राप्तौ सत्यां भगवत्स्वरूपमाश्रित्य तत्रैव स्थितिस्त्वमुक्तमथे
दानीं पंचदशे पूर्वोक्तज्ञानस्थिरकरं प्राकृतविषये वैराग्यं पुरुष
स्य भजनीयं भगवदंशत्वं भगवतस्तोभाभ्यां तद्गतराभ्यां पुरुषा
भ्यामुत्तमत्वं वर्णयन्नेव तत्रादौ वस्याकृतसत्वादिगुणसंगविरचितस्य
संसारस्य गुणसंगरूपेणावैराग्यशस्त्रेणैवच्छेद्यत्वात्संसारं वृक्ष
रूपकत्वेन वैराग्यं च शस्त्ररूपकत्वेन वैराग्यं निरूपयमाणं सा
र्थिं भगवानुवाच त्रिभिः ऊर्ध्वमूलमिति पंचेतनाचेतनात्मकं सं
साराख्यमश्वत्थं स्थानादेभविष्यत्कालेतिष्ठतीतिश्वत्थः अश्वा
मोऽश्वत्थस्मा [illegible] स्वस्य ब्रह्मात्मकं श्रुतलेति श्रुतेः प्रकारो वा महदे
व श्रुत्य अतरणामकारोस्मीत्यादिस्वतेश्चतेषा महतो मित्रश्वत्थः स
वेहत्ताणामित्यत्कथनात् श्रुतयः प्राहुः प्रकर्षेण सनातनत्वेन ब्रु
वंतिता अधृतमूलो वाक्शाख एषोऽश्वत्थः सनातनः ऊर्ध्वमूलम
वाक्शाखं वृक्षं यो वेद संप्रतीत्यादिकाः कीदृशं ऊर्ध्वमूलं ऊर्ध्वं सर्वो
परि सत्यलोके प्रधानवीजोस्य प्रथमपुरोगेहरूपमहत्तत्वात्मकं च
तुर्मुखरूपं मूलं यस्य तत्तथा तम् पुनः अधःशाखमधः सत्यलोका
दर्वाचीनेषु स्वर्गादिभूर्लोकेषु देवादिगंधर्वकिंनरासुरयक्षरा
क्षसमनुष्यपशुपक्षिकीटपतंगस्थावरांतरूपानादिप्रसृततत्वाच्छा
खा यस्य तं पुनरव्ययं प्रवाहरूपेणाऽनश्वरमीदृशं वर्णवैराग्यफलाश्रय
त्वादश्वत्थमनुसंहर्त्ता ईदृशाविवेकज्ञानेन विनाऽच्छेदनाशक्यं
मित्यर्थः यस्य संसाररूपस्याश्वत्थस्य छंदांसि वायव्ये तनमा

मै

श्री° गी टी° प°

5

लभेतभूमिकामः ऐन्द्राग्नमेकादशकपालंनिर्वपेत्स्वर्गकामइत्यादी
निकाम्यकर्मप्रतिपादकानिश्रुतिवाक्यानिपर्णानिवा[illegible]
[illegible]पत्राणिप्राहुः पत्रैर्लताद्वर्धते शोभतेचयथाइहशांतम
स्यवेदजानाति[illegible]सवेदविन्वेदोहिसंसारवृक्षस्यहे
दनोपायंवदतिअतस्तस्यहितच्छेदस्यवृक्षस्यस्वरूपस्यज्ञानेच्छेदनो
पायंज्ञानोपायंचजानातीत्यभिप्रायः १

मधुसूदनी टीका १

पूर्वाध्यायेभगवतासंसारबंधहेतून्गुणान्व्याख्यायतेषामत्य
येनब्रह्मभावोमोक्षोमज्जनेनलभ्यतइत्युक्तं मांचयोऽव्यभिचा
रेणभक्तियोगेनसेवते सगुणान्समतीत्यैतान्ब्रह्मभूयायकल्पत
इति तत्रमनुष्यस्यतवकथंभक्तियोगेनब्रह्मभावइत्याशंकायां
स्वस्यब्रह्मरूपताज्ञापनायसूत्रभूतोयंश्लोकोभगवतोक्तः ब्र
ह्मणोहिप्रतिष्ठाहममृतस्याव्ययस्यच शाश्वतस्यचधर्मस्यसु
खस्यैकांतिकस्यचेत्यस्यसूत्रस्यवृत्तिस्थानीयः अयंपंचदशोध्या
यआरभ्यते भगवतः श्रीकृष्णस्यहितत्वंज्ञात्वातस्यमभजनेनसगु
णातीतासन्ब्रह्मभावंकथमाप्स्यामोलोकइति तत्रब्रह्मणोहिप्रति
ष्ठाहमित्यादिनाभगवद्वचनमाकर्ण्य ममनब्रह्मणोमनुष्योयंकथ
मेवंवदतीतिविस्मयाविष्टमप्रतिभयाहज्ञयाचकिंचिदपिप्रष्टु
मशक्नुवंतमर्जुनमालक्ष्यकृपयास्वस्वरूपंविवक्षुः श्रीभगवानु
वाच तत्रविरक्तस्यैवसंसाराद्भगवत्तत्त्वज्ञानेधिकारोनान्यथेति
पूर्वाध्यायोक्तंपरमेश्वराधीनप्रकृतिपुरुषसंयोगकार्यंसंसार
वृक्षरूपकल्पनयावर्णयतिवैराग्यायप्रशस्तगुणातीतोपाय
त्वात्संसारवृक्षमूर्ध्वमुत्कृष्टंमूलंकारणंस्वप्रकाशपरमानंदरूप
त्वेननित्यत्वेनचब्रह्म ऊर्ध्ववाङूर्ध्वंसर्वसंसारबाधेप्यबाधितं
सर्वसंसारभ्रमाधिष्ठानंब्रह्मतदेवमाययामूलमस्येतिऊर्ध्व
मूलं अधश्चार्वाचीनाःकार्योपाधयोहिरण्यगर्भाद्याःशाखाअस्येति

तेनानादिकप्रसक्तत्वाद्बावाङ्वशाखोश्वत्थस्येत्यर्थः शाखेमा
श्वविनाशित्वेन नश्वोपि स्थाता इति विश्वासानर्हे अश्वत्थमा
याम्यं संसारवृक्षमव्ययमनाद्यंतदेहादिसंतानाश्रयमा
मज्ञानमेतेरेणानुच्छेद्यमनंतमव्ययमाहुः श्रुतयः स्मृत
यश्च श्रुतयस्तावत् ऊर्ध्वमूलोऽवाक्शाखएषोऽश्वत्थः सना
तन इत्याद्याः कठवल्लीषु पठिताः अवाचो निकृष्टाः का
र्योपाधयो महदहंकारतन्मात्रादयो वा शाखाः अस्येत्यवा
क्शाख इत्यर्थः शाखपदसमानार्थे सनातन इत्यव्ययप
दसमानार्थे स्मृतयश्च अव्यक्तमूलप्रभवस्तस्यैवानुग्र
होत्थितः बुद्धिस्कंदमयश्चैव इंद्रियांतरकोटरः महाभू
तविशाखश्च विषयैः पत्रवांस्तथा धर्माधर्मसुपुष्पश्चसु
खदुःखफलोदयः आजीव्यः सर्वभूतानां ब्रह्मवृक्षः स
नातनः एतद्ब्रह्मवनं चैव ब्रह्माचरति साक्षिवत् एतच्छि
त्वा च भित्वा च ज्ञानेन परमासिना ततश्चात्मगतिं प्राप्य
तस्मान्नावर्तते पुनरित्यादयः अव्यक्तमव्याकृतं मायो
पाधिकं ब्रह्मतदेव मूलं कारणं तस्मात्प्रभवो यस्य स त
था तस्यैव मूलस्याव्यक्तस्यानुग्रहादतिदृढत्वादुत्थि
तः संवर्धितः वृक्षस्य हि शाखाः स्कंधा उद्भवंति संसार
स्य च बुद्धेः सकाशान्नानाविधाः परिणामा भवंति तेन
साधर्म्येण बुद्धिरेव स्कंधस्तन्मयस्तन्मयश्चैवायं इंद्रिया
णामंतराणि छिद्राण्येव कोटराणि यस्य स तथा म
हांति भूतान्याकाशादीनि पृथिव्यंतानि विविधाः शा
खा यस्य विशाखः संभोग्यस्येति वा आजीव्यः उपजी
व्यः ब्रह्मणा परमात्मनाधिष्ठितो वृक्षो ब्रह्मवृक्षः आ
त्मज्ञानं विना छेत्तुमशक्यतया सनातनः एतद्ब्रह्म

वनमस्य ब्रह्मणो जीवरूपस्य भोग्यं वननीयं संभजनीयमिति वनं
ब्रह्म साक्षिवदाचरति न लुप्यते तेन लिप्यत इत्यर्थः एतद्ब्रह्म
वनं संसारवृक्षात्मकं छित्त्वा च भित्त्वा च अहं ब्रह्मास्मीत्यतिदृढ
ज्ञानखड्गेन समूलं निकृन्तेत्यर्थः आत्मरूपां गतिं प्राप्य तस्मा
दात्मरूपान्मोक्षान्नावर्तत इत्यर्थः स्पष्टमितरत् अत्र च गंगातटे
गत्वा यमानो गंगातीरतिर्यक्पतितमर्धोन्मूलितं मारुतेन म
हान्तमश्वत्थमुपमानीकृत्य जीवन्तमियं रूपककल्पने निरूप
ये तेन नोर्ध्वमूलत्वाधःशाखत्वाद्युपपत्तिः यस्य मायामय
स्याश्वत्थस्य छन्दांसि छादनात्तत्त्ववस्तुप्रावरणात्संसारवृक्ष
रक्षणाद्वा कर्मकाण्डानि ऋग्यजुःसामलक्षणानि पर्णानी
व पर्णानि यथा वृक्षस्य परिरक्षणार्थानि पर्णानि भवंति त
था संसारवृक्षस्य परिरक्षणार्थानि कर्मकाण्डानि धर्माधर्मतद्धे
तुफलप्रकाशनार्थत्वात्तेषां यस्तं यथा व्याख्यातं समूलं संसार
वृक्षं मायामयमश्वत्थं वेद जानाति स वेदवित् कर्मब्रह्माख्यवे
दार्थवित्स एवेत्यर्थः संसारवृक्षस्य हि मूलं ब्रह्म हिरण्यगर्भा
दयश्च जीवाः शाखास्थानीयाः स च संसारवृक्षस्वरूपेण विनश्व
रः प्रवाहरूपेण चानन्तः स च वेदोक्तैः कर्मभिः सेव्यते ब्रह्मज्ञा
नेन च छिद्यत इत्येतावानेव हि वेदार्थः यश्च वेदार्थवित्स एव

सर्ववित् इति समूलवृक्ष
ज्ञानं स्तौति स वे
दविदिति १॥

व्यविद्याकामार्थेऽह नरहमूले रूपचितं फलेर्ई: ख्याकारैर्निविडमजरं प्रोनिवडलं ३ मंसं
सारात्वं विषमगतिमङ्गेन ऋषि ॥

रान तमायत्यादाज्ञेरतिरनदिनंनौमिनमजं ऽलं रं मायाकार्यं च
रमचरमश्वावचमिदं महामायाशमस्तरमपितदध्यस्तमावि
ले विदानंदेयस्मिन्परमपुरुषे ब्रह्मणि विभौ तमीशानेकृत्स
ऋति हृदयमीडे नवरतं पूर्वाध्यायगुणान्वंथ हेत्नूत्वकाहहरिः
पुनः तेभ्यस्तत्वपियामोतं सामङ्गक्येति बावदत १ भगवन्तत्व
विज्ञाने विरक्तस्याधिकारतः नान्यस्येत्यर्जुनेप्राह निमितीकृत्य
केशवः ४ सर्वेषां प्राणिनां कर्मफले तानफलं विदो ईशायत्नमतः
सर्वेरूपास्यो भगवान्हरिः मां च योऽव्यभिचारेणेत्यतः संश्लोकवान्स्व
य मङ्गमामाम विज्ञानागुणातीताः परंपदं ६ प्रयांतीति हरिः
प्रोच्य सम्यत्त्वानैकसाधनं वैराग्येनत्समुत्पत्तिः सारासारविवेचना
त ७ अतस्तदर्थं संसारस्वरूपं वक्तवान्हयं विवर्तहेतुरूपेणसंसा
रे वर्णयत्यजः ८ ब्रह्मणो हि प्रतिष्ठेतिश्लोकः सूत्रात्मकस्मृतः स
निष्पानीयपत्तस्याध्यायआरम्भेनेपुना ९ सर्वभूतहितैतेषिर्व्याहिषो
षादर्जुनप्रियः अष्टद्वोषिस्वयंप्राहभगवान्सात्वतांपतिः १० वैरा
ग्यं तत्वविज्ञानसाधनं पुष्कलं मतं संसाराद्वर्धनागारान्मुमुक्षो
निर्वेदयत्र ११ नान्तिमङ्गेप्राह भगवान्हद्रूपकमादितः उत्कर्षका
रणं ब्रह्मस्वप्रकाशं चिदद्वयं १२ यद्दोऽहं सर्वसंसारबाधेपियदबा
धितं मायया सर्वसंसारभ्रमाधिष्ठानमद्वयं १३ ब्रह्ममूलंनदेवास्ये
मूर्द्ध मूलस्तमीहृषा ऊर्ध्वो हि हिरण्यगर्भोयास्त्र्वाचीनाज्जपाध्ययः १४
सर्वतः महत्तत्वात्मेशाखा वाऽश्वयतोऽस्यते आश्रुनाशित यात्पतावि
श्वासान्नहंभावतः १५ सोपि प्रभातपर्यंतं स्थातंत्रोपानवात्मयं
मायामयंतमश्वत्थं संसारतरुमव्ययं १६ अनादिनंतदेहादिसंता
नाश्रयमानतं तत्वज्ञानविनोच्छेद्याभावात्स्वमव्ययं १७ ऊर्ध्वमू
लोवाकूशाखविषयोऽस्यः सनातनः इत्याद्याः श्रुतयस्तद्वत्स्मृतं
यापिमहत्स्वरा: १८ अव्यक्तमूलप्रभवस्तस्यैवानुग्रहोत्थितः
बुद्धिस्कंधमयश्चैव इंद्रियांतरकोटरः १९ महाभूतविशाखश्च

श्री·
गी·टी·
प·

7

विषयैः पत्रवांस्तथा धर्माधर्मस्वपुष्पश्च सत्ववृक्षः स्वफलोदयः २०
आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः एतद्ब्रह्मवनं चैव ब्रह्मा
चरति साक्षिवत् २१ एतच्छित्वा च भित्वा च ज्ञानेन परमासिना त
तश्चात्मगतिं प्राप्य तस्मान्नावर्तते पुनः २२ मायोपाधिकमव्यक्तमू
लं तस्यात्समुद्भवः यस्य संसारवृक्षस्येत्यर्थाः स्मृतयः स्मृताः २३
वृक्षरूपकविन्यासे उपमेयं विवक्षिता श्रीमद्भगवता येनोच्यमान
स्तद्धर्मवान् २४ नदीरेखन्नेत्यंतवा पुनोन्मूलितो बलात् तिर्यक्
पतितो जीवन शाखोपशाखादिभिर्हतः तमेवोपमानीकृत्य ब्रह्मजी
वं तमसतं पुराणेव कृतौ गीता विंयं रूपककल्पना २६ तेनोर्द्ध
मूलभावादेर्नोपपत्तिरेवापि यस्य मायामयस्यास्याश्वत्थस्याच्छा
दनात्तरोः २७ तत्वमावरणाद्यहा संसारतरुलक्षणात् छंदांसि कर्म
कांडानि पर्णानीव भवंति वै २८ यथा वृक्षस्य पर्णानि रक्षणार्था
नि संस्थित तथा संसारवृक्षस्य कर्मकांडानि सर्वतः २९ अतएव तः सा
मरूपाणि रक्षणार्थानि संत्यपि धर्माधर्मादितद्धेतुफलभासक
तायतः ३० छेदस्यापत्तितस्तानपर्णत्वतत्वदर्शिने मायामयं तम
श्वत्थं यथा व्याख्यातमेव यः ३१ समूलमभिजानाति शाश्वतो गुरुतः
स्वतः कर्मब्रह्मात्मवेदार्थविन्स एवास्ति वेदवित् मूलं संसारवृ
क्षस्य शुद्धं ब्रह्म स्वमायया शाखा हिरण्यगर्भाद्या जीवाः सन्ति सह
स्रशः सर्वसंसारवृक्षोस्ति स्वरूपेण विनश्वरः प्रवाहरूपेणानपा
नायनेनतयाव्ययः ३४ वेदोक्तैः कर्मभिर्जीवैः सेव्यते सर्वसर्वदा
छिद्यते ब्रह्मबोधेन साक्षात्कारात्मना सच ३५ इत्येतावान् हि वेदा
र्थः संगृहीतो यथार्थतः न संसारतरोरस्यान्समूलादागमार्थतः
३६ ते योगमात्रोप्यस्यास्ति सर्वशिष्टो न एव हि समूलं वेत्ति संसार
वृक्षं यः स च वेदवित् ३७ यश्च वेदार्थविज्ञातः स एवास्तीह सर्ववित्तत्
त्वत्समूलवृक्षस्य ज्ञानेनासौ तिहरिः स्वयं १

पूर्वाध्यायान्ते सुखस्यैकांतिकस्य प्रतिष्ठापराकाष्ठाहमित्युक्तं तच्च कि
लक्षणं तत्सुखं केन वा प्राप्तं केन वा साधनेनास्यावरणभंगः केन
वाधिकारिणा तस्याप्यमित्यादि वर्णयितुं पंचदशोध्याय आरभ्यते
ऊर्ध्वमूलमिति आनंदाद्ध्येवखल्विमानि भूतानि नारायणत इति श्रुति
प्रसिद्धं मायावृषा नेदमारभ्यते न रोनरशनगुणाविहृज्ञानेदं सोपानपं
क्तेरुपरिस्थितं परमानंदादहं यदव्यक्तं ऊर्ध्वं तदेव मूलं मूलकारणम
स्य संसाराश्वत्थस्य तमूर्ध्वमूलं अधःशाखं ऊर्ध्वादधोधः सोपान
स्थानीयाः शाखा इव शाखाः अव्यक्तमहदहंकारपंचतन्मात्राषोड
शविकारहिरण्यगर्भविराट्प्रजापतिसुरगंधर्वासुरनरतिर्यक्
स्थावररूपा यस्य सोधःशाखस्तं न श्वोपि स्थातेत्यश्वत्थं नत्वाद
श्वत्थं संसारवृक्षं तथापि अव्ययं मृत्यानां अनादित्वेनैतत् प्राहुर्वेदाः ऊ
र्ध्वमूलो वाक्शाख एषोश्वत्थः सनातन इत्यादयः छंदांसि वेदा
स्तद्रूपलक्षिता यज्ञादयः तदेव पर्णानि यानि वनशोभाहेतवो यस्य
तरोस्तमश्वत्थं यो वेद मिथ्यात्वेन स एव वेदवित् विदितवेद्यसम
र्थः अत्राश्वत्थरूपकेण संसारो वर्ण्यते १

निपर्णं

आनंदीटीका ॥

पूर्वाध्यायान्ते ऐकान्तिकस्य सुखस्य प्रतिष्ठाहमिति यदुक्तं तत्सु
खं संसारोच्छेदादेव सुलभमिति तदुच्छेदाय देहदेहद्वन्द्वसंयोगा
त्मके संसारेश्वत्थवृक्षतामारोपयन् श्रीभगवानुवाच उज्जि
हीते प्रथममेवोत्पत्तिकाले प्रतिनाविश्वकरणायेति श्रुतत्वा
न्मायापरापररूपा पुरुषप्रकृतिसंज्ञा पारमेश्वरी शक्तिः प्रधान
त्वान्मूलं यस्य तम् तथा अधः प्रकृतेरर्वाचीनाः शाखाः शोतेर
व्यपञ्चादिकमेवेति श्रुतत्वात् सर्वधर्मिणः महदादयः सम
प्रकृतिविकृतयो यस्य तम् अश्वत्थं न श्वोपि स्थातेति श्रुतत्वात् पेद
यानानात्वेन परिणामात्सविकारं संसारपर्यायं संगमव्ययं व्ययः प्र

श्री·
गी·टी·
पं

तिनिवर्त्तनेन हीनं सदा संसरणशीलं कपिलादयश्चाहुः यस्य संसारा
श्वत्थस्य छंदांसि वेदाः तत्वाध्यवसायलक्षणायाथ धर्माधर्मज्ञानाज्ञा
नविरागाविरागैश्वर्यानैश्वर्यरूपाः सहस्रतत्वपर्णीयाः बुद्धेः धर्माः
पत्राणि पुष्पफलरूपाणां विषयाणां कारणानि भोगस्थानानि च
भवंति तमीदृशं संसाराश्वत्थं यो वेद स एव वेदार्थविदित्यर्थः १

रामकंठटीका १५

एवं त्रयोदशाध्याये स्थूलदृष्ट्या भूतप्रकृतेर्भेदः परमात्मेति तत्वे
नोक्तः चतुर्दशेन तु सूक्ष्मदृष्ट्या गुणपरमार्थायास्तस्यास्तदतिक्र
मेण विशेषतो ब्रह्मभावप्राप्तिरुपदिष्टा इदानीं भुवनसंतानभा
वेन परिणतायास्तस्या निर्मोक्षप्रतिपादनक्रमेण पुनरावृत्ति
पदप्राप्तिं प्रतिपादयितुं भगवानुवाच प्रतिपाद्यमानविशेषणस्य
धर्माद्यश्वत्थहेत्वध्यवसायेन नानाभुवनसंतानरूपः संसारप्र
पंचो विवक्षितः तमश्वत्थमेवंविधमाहुः परावरद्रष्टारः कथयं
ति कीदृशमूर्ध्वमूलं वकुलप्रपंचस्यापि भुवनसंतानस्य केवलं
भोगभूमिकर्मभूमिभेदेन संग्रहाद्द्विप्रकारत्वे सति भोगभूमिरूपो
भाग ऊर्ध्वशब्देनोक्तः भोगस्य फलत्वात्फलस्य च शाखाग्रत्वान्मूल
शब्देन चाविद्यादिक्लेशजालमुक्तम् तस्मिन् हि सति भोगभूम्यात्म
नो देवत्वादिप्रकृतिर्विपरिणमते अश्वत्थं कीदृशं तमधःशा
खं अधःशब्देन कर्मभूम्यात्मको भाग उच्यते तेन पुनरावृत्त्यधि
करणत्वादधो विषयत्वेनोक्तः कर्मभूमय एव शाखाः इत्यमधः
शाखा यस्य तं तथाविधं यतः सत्स्वक्षीणशुभाशुभभोगाधिक
रणभूतेभ्यो भुवनेभ्यः देवत्वानां पुनः कर्मभूमौ निपतनमवश्य
मेवस्थितं यदुक्तं आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुनेति अ
तश्च कीदृशमव्ययमनंतत्वात्परमेश्वरमायाप्रभाविनां देव
तानां गमागमानिवृत्तेः तान्प्रति तथास्य परिणमतः प्रवाहनित्य

त्वेनाविद्यमानत्वाद्यत्वं अश्वत्थं कीदृशं यस्य छंदांसि वेदाः पर्णानि प
त्राणि विमृष्टं भवति वेदसमन्त्रवत्वान्मानितानि कर्माणि छन्दः
शब्देनोक्तानि तान्येव तान्तरकृपरिणामावधिभूतत्वात्पर्णत्वेनाध्यव
सितानि यस्य तमेवंविधमेनं क्लेशप्रभवत्रयीनियमितकर्मफ
लभूतभोगाधिकरणात्मकं भुवनसंतानरूपमूर्ध्वमूलत्वादिनासा
दृश्यादश्वत्थत्वं यो वेद वेद्यं तेन वेदरूपाहुतिरिक्तं जानातीति स वेदार्थ
वित् न तत्परस्तस्मिन्ममतादिग्रहेणनिमग्नमना इत्यर्थः

॥ १ ॥

ॐ एवं त्रयोदशेऽध्याये सङ्क्षेपवाक्यैः सविस्तरमुपपर्ण्य तदर्थान्तरदशाध्
नांसिद्धभूमिकां च चतुर्दशेऽध्याये व्याख्याय अधुना सङ्क्षेपस्य वाक्यान
न्तरभूतमीश्वरं रूपमत्रैव देहे उपासनार्थं प्रत्यभिज्ञानार्थं च प्रतिपादयि
तुं पुरुषोत्तमयोगाख्यः पंचदशोऽध्याय आरभ्यते तत्रेश्वरस्याश्वत्थेन
सहश्रुतिषु प्रसिद्धेन रूपकालंकारेण तद्वैराग्यपर्वणीयितुं श्रीभग
वानुवाच ऊर्ध्वं सर्वोत्कृष्टमनन्तमंतं ब्रह्मात्वं मूलमुपयस्य तम् तथाधःशा
खमधःस्वस्वरूपान्निकृष्टाः शाखा जीवा यस्य तम् ईश्वरापेक्षया जीवा
नांपरतंत्रतया परिच्छिन्नतया विनाशयोगितया च निकृष्टत्वात् अश्व
त्थंनित्यमश्वत्थं व्यापकतया स्थायितया चाश्वत्थमीश्वरं प्राहुः श्रुतयः
तथा च श्रुतिः ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः तदेव
शुक्लं तद्ब्रह्म तदु नात्येति कश्चनेत्याद्याः यस्येश्वरस्य वेदाः पर्णानि
यथा हि पर्णैर्वृक्षस्य महत्त्वफलवत्त्वरसवत्त्वादयः सूच्यंते एवं वेदै
रीश्वरस्य माहात्म्यं सूच्यते अतः पर्णस्थानीयानि छंदांसि यस्तं ईश्व
रं वेद स वेदवित् तेनैव वेदार्थः सम्यग्ज्ञातः १ ॥

यस्मान्मदधीनं ज्ञानिनां कर्मिणां च ज्ञानफलं कर्मफलं च अतो ये मां भक्तियोगेन सेवन्ते मत्प्रसादात् ज्ञानप्राप्ति
क्रमेण गुणातीतो मोक्षं लभते परमात्मतत्त्वसम्यग्ज्ञानं ततो मोक्षं लभते इत्युक्तं किं वक्तव्यं इत्याशङ्क्य तद्
तज्ज्ञेनानापेक्षमपि च पंचदशाध्याये परमात्मतत्त्वं विदर्शयिषुर् विरक्तस्य तज्ज्ञानाधिकारित्वेन वैराग्यजननार्थं
प्रथमं तावत्सार्धश्लोकाभ्यां संसारस्वरूपं वृक्षरूपकालंकारेण दर्शयन्नाह ऊर्ध्वमूलमिति ऊर्ध्वम् उप
रिकाले वर्तमानं अथवा सूक्ष्मत्वात्कारणत्वान्नित्यत्वान्महत्त्वाच्चोर्ध्वं

गी॰
पं॰ टी॰

१

पेंवोले टीका

मत्कृष्टमव्याकृतं ब्रह्म मूलं कारणं यस्येति तं ऊर्ध्वमूलं संसा
रवृक्षं अधःशाखं महदहंकारपंचतन्मात्राणि पंचमहाभूता
नि एकादशेंद्रियाणि एवं त्रयोविंशति प्रकृतिविकाराः अस्य सं
सारवृक्षस्य शाखा इव मूलकारणापेक्षयार्वाग्भूतानि कृष्टावा
वर्तंते शाखा यस्य स मतः अधःशाखं अश्वत्थं श्वोपि न स्थातेति वि
धंसीत्यश्वत्थस्तं अव्ययं कारणस्यानादित्वात् ब्रह्मज्ञानपर्यंतम
संतानाविच्छेदाद्देहादिसंतानस्येव अव्ययं छंदांसि ऋग्यजुःसामाथर्व
णि लक्षणानि वचनानि वेदाः यस्य संसारवृक्षस्य पर्णानीव धर्मा
धर्मतद्धेतुफलप्रकाशनार्थत्वात्ते संसारवृक्षं परिरक्षंति पर्णानि
यस्तं यथाप्रोक्तं समूलं संसारवृक्षं वेद स वेदवित् नहि संसारवृक्षा
न्यज्ज्ञातव्यमवशिष्यते सर्ववेदक १

वीमसमिद्धोधिनी ॥

श्रीकार्तवीर्यार्जुनाय नमः जंबूकाश्मीरतेर्धत्तान्नरणवीरस्य
रक्षितः करोमि टीकामध्याये भूत्ये पंचदशो मतः। सर्वा
ध्याये गुणत्रयस्य बंधहेतुत्वमभिधाय मां च योऽव्यभिचारेण
भक्तियोगेन सेवते इत्यनेन श्लोकेन मद्भक्तिलक्षणेन स्वव
र्णाश्रमानुरूपधर्माचरणेन पुरुषस्य गुणातीतत्वं भवतीति
प्रतिपादितं तस्य च स्ववर्णाद्युचितधर्मस्य स्वरूपज्ञाने सति हे
योपादेयता निश्चीयते इति धर्मस्य मूलं यद्वेदरूपमुपादे
यतात्र मध्ये रूपकालंकारेण वृक्षत्वं वर्णयन् श्रीभगवानुवाच ऊर्ध्व
मूलमिति ऊर्ध्वं सर्वोपरि वर्तमानं परमेश्वराख्यं तत्त्वं तदेव मू
लमिव मूलं इत्यतिकारणं यस्य यद्वेदवृक्षस्य तमूर्ध्वमूलं
सर्वासां विद्यानां तस्मादेव सर्वज्ञात् इत्यतिश्रवणाद्धि वस्तु दादि

भाषा अनुवाद

वैराग्यके विना ज्ञान औ भक्ति दुर्लभ है इस लिये पंद्रहे अध्याय
मे भगवान वैराग्य सहित ज्ञान काउपदेश अर्ज्जुन को दिया है
औ पूर्व चौदहे अध्यायके अन्तमे जो कहा कि मांच योऽव्यभि
चारेण भक्तियोगेन सेवते इत्यादि छबिशयें श्लोकादिसे कि
एकान्त भक्ति से परमेश्वरका भजनकारी मनुष्यभगवानकी
कृपासे ज्ञान लाभके द्वारा मुक्त होता है सो विषयों से विराग
रहित पुरुष को एकान्त भक्ति अथवा ज्ञान होता नहीं इसी
हेतु से वैराग्य कथन पूर्वक ज्ञान उपदेश करनेके मनोरथ
से प्रथम डेढ़ श्लोककरिके संसारस्वरूपको वृक्षरूप रूप
क अलङ्कारसे वर्णन करते हुये भगवान श्रीकृष्ण अर्ज्जु
नसे कहते हैंकि ऊर्ध्वमूल कहे उत्तम अर्थात क्षर अक्षर से भी
उत्कृष्ट जो पुरुषोत्तम परमेश्वर सो संसारके मूल कारण हैं इ
सीसे संसार ऊर्ध्वमूल है और अधःशाख कहे परमेश्वर की
अपेक्षा अधः अर्थात कार्यरूप उपाधि युक्त हिरण्यगर्भ आ
दि जो संसार की शाखा स्वरूप सोई संसार को अधःशाख क
हा और यह संसार विनश्वर हैतसे परदिन प्रभात लों रहैगा
ऐसी विश्वास के योग्य नही है इस से अश्वत्थ कहा और अठ
ये अध्यायके उनीशवें श्लोक की उक्त अभिप्राय से यह संसार
प्रलय के अनन्तर पुनःपुनः उत्पन्न होता है तो होनाजाना इस
हेरफेर लगे रहनेसे धारावाहिक वृक्षरूप इस संसार का
विच्छेद नही हैअर्थात सदाही बना रहता इससे अव्यय औ
अनादि भी है और ऐसे ही श्रुतियों मे भी कहा है औरछन्द
कहे वेद सकल इस संसार वृक्षके पत्र हैं अर्थात धर्म्म अध
र्म्मका प्रतिपादन करिके छायाके तुल्य हैं और कर्म्मफलके
हेतु संसार वृक्षके आश्रित जीव समूह है यह कहते हुये वे
द पत्र समान हैं जो मनुष्य ऐसे करके संसार वृक्ष अश्वत्थरू

प को जानते हैं सोई वेदके अर्थवित हैं तात्पर्य यह कि प्रपंचरूपसं
सार वृक्ष के मूल परमेश्वर और परमेश्वर के अंश स्वरूप जो ब्र
ह्मादिक सो सब शाखा समान हैं सोई वृक्ष विनश्वर औ प्रवाह
रूपसे नित्य भी है और वेद विहित कर्मोंके द्वारा संसार वृक्षको
सेवा करना भी कहा है इतनही वेदों का निश्चित अर्थ है इस
से इस वृक्षके ज्ञानी को वेदवित कहना चाहिये १

दोहा

ऊर्ध्वहि मूल शाखा अध कहत पीपल अव्यय सोय वेदहि
जाके पत्र है जो जाने वेदवित होय १॥

परम्परोपदेशद्वारेण तस्मादेवोपदेशार्थं यजुर्वेदस्य प्रस्तुतत्वा
द्धः शाखमिति तस्मात्प्रथमोपदेष्टुः परमेश्वरादर्वा-
चीनाउपदेशत्वेन निकृष्टा विवस्वन्मनुप्रभृतयो नानादिक्ष
प्रसारकारणाः कार्योपचारेण शाखा इव शाखा यस्य तम
धः शाखं तथाश्वस्त्यमिवाश्वत्थमन्यतमं तथाप्यश्वत्थः ज्ञा
दिकामनया पूजितः सर्वान्कामान्प्रयच्छति एवं यजुर्वेद-
विधया पूजितास्त्रुहेमसमास्फालिता तांस्तानैहिकान्राज्यभोगा
दीन्कामानामुत्रिकांश्च स्वर्गभोगादीन्कामान्प्रयच्छति अत
एवाव्ययमविनाशि परमकारणभूतत्वादव्ययमविनश्वरं
नित्यमिति यावत् यद्वानादेः परमेश्वरादारभ्याद्य यावत्स
र्वैः संपालितत्वादव्ययं प्रवाहरूपेणानवच्छिन्नमित्यर्थः छ
न्दांसीति छन्दयते संब्रियते अश्वादिरेभिरिति छन्दांसि छदि
धातोरौणादिके सिद्धं छन्दांसि कवचास्तेषां भाववत्त्वेन स
माश्रितजनस्वत्वप्रदत्वेन च पर्णानीव पर्णानि यथा पर्णा
नि वृक्षं भूषयन्ति छायया च समाश्रितजनमुपकुर्वन्ति एवं
कवचा यजुर्वेदयाजिनं पुरुषं युद्धे परबलकृतबाणवर्षणे
नोपकुर्वन्तीति तमेवंभूतं यजुर्वेदवृक्षं वेद जानाति स एव
वेदवित्तस्य यजुर्वेदवृक्षस्य तत्त्वविदिति स्तूयते १॥

[illegible]

संसारस्वरूपतद्योपायचिन्तामन्यस्मिन्नध्याये दर्शयति
ऊर्ध्वो विश्व ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि द्रविणं स
वर्चसमिति हि श्रुतिः ऊर्ध्व उत्तमः सर्वतः श्रेयो निकृ
ष्टमणावाभूतानि सोऽप्येकप्रकारेण तिष्ठतीत्यभिप्रायः त
थापि तत्प्रवाहरूपः पूर्वब्रह्मकालपर्यन्तं तिष्ठति तथा सर्व
नापित्वव्ययतो फलकारणत्वाच्छेदसोपानत्वं न हि क

द्वाविदध्यज्ञानात्परलोकफलोत्पत्तिः अव्यक्तेपि सूक्ष्मरूपेणा
सतिस्वर्गादौ च भूतानीत्यपश्चाद्धैवप्रस्तुताः गुणैः सत्वा
दिभिः प्रतीतिमात्रस्वरूपत्वात्प्रवालं विषयाः मूलानिभग
वद्रूपादीनि भगवानाद्यकर्मानुबंधेन हि फलं ददाति ॥
तथाच भागवते प्रथमस्कंधे ब्रह्मवाप्रत्यग्रमूलं प्रकृ
तिः समूलं सत्वादयो वा बीजमूलं भूतानि शाखाः छंद
सिपर्णानि देवनरतिर्यक्च स्थशाखाः पक्षेभ्यो हि फलं जा
यते साधनापिफः भक्तिः फलममुक्तिश्च फलं मोक्षोप
मोऽ मोक्षोरसः अव्यक्ते च शाखाव्यक्ते च शाखाः अव्यक्ते
चमूलं व्यक्ते च मूलं पक्षोस्यो गुणालोलपत्रो नक्षीयते
नक्षीयते नसेवकदाचनान्यथाजायते नान्यथाजायत
इति यथास्थितमस्यानोपलभ्यते अनादिविस्तुः स्वमा
दिरेतोजगतोस्य मध्यमिति भागवते अनाद्यंतपरब्रह्म
नदेवानर्षयोविदुरिति मोक्षधर्मे असंगशास्त्रेण सगरा
हिन्यसहितेन ज्ञानेन ज्ञानासिनोपासनायासितेनेति
भागवते छेदस्य विमर्षपूर्व नतस्ततःतस्य वा बंधकं भव
ति तथाहि मूलस्य ब्रह्म प्रतीयते तच्चोक्तं तच्छ्रुतावेव वि
मर्षीयस्यच्छेदः तन्नभातिवान्यानीति तेदर्ध्वतमेव
प्रपद्ये प्रपद्यत तच्चोक्तं तत्रैव तं वै प्रपद्येतयं वै प्रपद्यन
श्रोवतिनद्रक्ष्यति नजायतेनम्रियते तद्ब्रह्ममूलंतच्छित्वा
स्थिति नाशायत्तो न दृष्टस्तु प्रतिबुद्धो भवेत्तस्मात् इतिमोक्ष
धर्मे छेदनोपायोऽसंगशास्त्राद्विनिः नच भगवतोऽन्यःपारमो
क्षि साधनांतरमाह १॥

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विष
यप्रवालाः अधश्च मूलान्यनुसंततानि कर्मा
नुवंधीनि मनुष्यलोके २ ॥

शांकरभाष्य टीका १

नहि संसारवृक्षादस्मात् समूलात् ज्ञेयोन्योऽणुमात्रोप्यवशिष्टो
स्ति अतः सर्वज्ञः स यो वेद सर्ववेदार्थविदिति यस्मात् संसारवृक्षे [समूले स]
र्वैते यं अन्तर्भवन्तीति तस्मात् समूलवृक्षज्ञाने स्तौति तस्यैव सं
सारवृक्षस्यापरावयवव्यापारकल्पनोच्यते अधो मनुष्यादिभ्यो
यावत् स्थावरमूर्द्ध्वं च यावद्ब्रह्मा विश्वसृजो धर्मेत्येतदन्तं यथा
कर्म यथाश्रुतं ज्ञानकर्मफलानि तस्य वृक्षस्य शाखाइव शाखाः
प्रसृताः प्रगताः गुणप्रवृद्धाः गुणैः सत्वरजस्तमोभिः प्रवृद्धाः स्थूली
कृता उपादानभूते विषयप्रवालाः विषयाः शब्दादयः प्रवाला इव
देहादिकर्मफलेभ्यः शाखाभ्यः अङ्कुरीभवन्तीव तेन विषयप्र
वालाः शाखाः संसारवृक्षस्य परममूलमुपादानं पूर्वमुक्तमथेदा
नीं कर्मफलजनितरागद्वेषादिवासना मूलानीव धर्माधर्मप्रवृ
त्तिकारणान्यवान्तरभावीनि तान्यधश्च देवाद्यपेक्षया मूलान्यनुसं
ततानि अनुप्रविष्टानि कर्मानुबन्धीनि कर्म धर्माधर्मलक्षणम
नुबन्धः पश्चाद्भावी येषामुद्भूतिमनुभवतीति तानि कर्मानुबन्धी[नि]
मनुष्यलोके विशेषतः अत्र हि मनुष्याणां धर्माधिकारः प्रसिद्धः २

आनंदगिरिकृत टीका २

समूलसंसारवृक्षज्ञाने तु फले हित्वा मूलमेव निःकृष्य ज्ञाने शक्य
मिति तत्ज्ञानार्थं प्रपातितव्यमिति मत्वा तत्ज्ञानस्तुतिरत्र विव
क्षितेत्याह नहीति अवयवसम्बन्धिन्यपरा प्रागुक्तादतिरिक्ता कल्प
ना इति यावत् आमनुष्यलोकादाविरिञ्चिलोकादधःशब्दार्थमाह मनु
ष्यादिभ्य इति तस्मादेवारभ्यासत्यलोकादिमूर्द्ध्वशब्दार्थमाह यावदि

श्री·
गी· टी·
प·

12

ति शाखाशब्दार्थं दर्शयति ज्ञानेति तेषां हेतुत्वगुणत्वेन वृद्धिमत्त्वं
सूचयति यथेति प्रवृत्तानां शब्दादिविषयाणां प्रवालत्वं शाखास्व
पल्लवत्वे अङ्कुरत्वं स्फोरयति देहादीति ऊर्द्धमूलमित्यत्र संसारवृक्ष
स्य मूलमुक्तं किमिदानीमधश्च मूलानीत्युच्यते तत्राह संसारेति
अनुप्रविष्टत्वं सर्वेषु लिङ्गेष्वनुगततया सन्ततत्वमविछिन्नत्वं रा
गादीनाञ्च कर्म्मफलजन्यत्वं प्रकटयति कर्म्मेति कर्म्मणां रागा
दीनां मिथो हेतुहेतुमत्त्वं तेषां तथात्वेनानवछिन्नतया प्रवृत्तिः
विशेषतो मनुष्यलोके भवतीत्यत्र हेतुमाह अत्रहीति कर्माधि
कृता प्राणिनिकायो लोकः मनुष्यश्चासौ लोकश्चेत्यधिकृतो ब्राह्म
णादिविशिष्टो देहो मनुष्यलोकः २

स्वामिकृत टीका ४

किंच अधश्चेति हिरण्यगर्भादयः कार्योपाधयो जीवाः शाखास्था
नीयत्वेनोक्ताः तेषु च ये दुष्कृतिनः ते पश्वादियोनिषु प्रसृता विस्ता
रंगताः सुकृतिन ऊर्ध्वं देवादियोनिषु प्रसृतास्तस्य संसारवृक्षस्य
शाखाः किंच गुणैः सत्वादिवृत्तिभिर्जलसेचनैरिव यथायथं प्र
वृद्धा वृद्धिं प्राप्ताः किंच विषया रूपादयः प्रवालाः पल्लवस्थानी
या यासां ताः शाखास्थानीयाभिरिन्द्रियवृत्तिभिः संयुक्तत्वात् किंवा
यश्चेति च शाखानामूर्ध्वं च मूलान्यनुसंततानि विरूढानि मुख्यं मूल
मीश्वररूपं परमात्मा नित्वेवानरमूलानि तत्तद्भोगवासनालक्षणानि
तेषां कार्यमाह मनुष्यलोके कर्मानुबन्धीनि कर्मानुबंधः अनंतरं
भावी येषां तानि ऊर्ध्वं धोलोकेषु उपभुक्तेयततत्तद्भोगवासनाभिर्हि
कर्मतत्त्वं मनुष्यलोके प्राप्तानां तत्तदनुरूपेषु कर्मसु प्रवृत्तिर्भवति
अस्मिन्नेवहि कर्माधिकारः नान्येषु लोकेषु अतो मनुष्यलोक इत्युक्तम्
२

पिशाचभाषा टीका ५

अधश्चेमह लोक प्रसृतानि ऊर्ध्वं जन लोक प्रसृताः गतास्तस्य शा
खाः कर्मजानवासना रूपाः शरीरेंद्रिय विषयाः कर्मफलभूताः

गुणप्रवृद्धाः गुणैः सत्वरजस्तमोभिरुपादानकारणभूतैः प्रवृद्धाः
विषयप्रवालाः विषयाः शब्दस्पर्शरूपरसगंधाः प्रवाला इव यासां
ताः शाखा अधश्चास्य महल्लोके प्रसृतानि मूलानि हितधर्माणि त
दुपकरणानि च अनुसंततानि अनुस्यूतानि कर्मानुबंधीनि कर्म
णा मितानि मनुष्यलोकग्रहणमुपलक्षणार्थं २

रामानुजभाष्य टीका ५

अधेति तस्य मनुष्यादिशाखस्य वृक्षस्य तत्कर्मकृता अपराउ पर्यंथः
शाखाः पुनरपि मनुष्यपश्वादिरूपेण प्रसृता भवंति ऊर्ध्वं च गंध
र्वयक्षदेवादिरूपेण प्रसृता भवंतीत्यर्थः गुणप्रवृद्धाः गुणैः सत्वा
दिभिः प्रवृद्धाः विषयप्रवालाः शब्दादिविषयपल्लवाः कथमि
त्यत्राह अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके ब्र
ह्मलोकमूलस्यास्य वृक्षस्य मनुष्याग्रस्य अधो मनुष्यलोके च मूला
न्यनुसंततानि च कर्मानुबंधीनि कर्माण्येवानुबंधीनि [illegible] मूला
न्यधो मनुष्यलोके च भवंतीत्यर्थः मनुष्यत्वावस्थायां कृतैर्हि
कर्मभिरधो मनुष्यपश्वादय ऊर्ध्वं च देवादयो भवंति २

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं २ ॥ ॥

परमार्थप्रपा टीका ७

अथास्य शाखादिविस्तारमाह अधश्चोर्ध्वमिति अधो देवपितृमनु
ष्यलोकाद्याः ऊर्ध्वं महर्जनस्तपो लोकमुखाः प्रसृताः विस्तृताः संति
किंभूताः गुणप्रवृद्धाः यथायोग्यं सत्वरजस्तमोभिर्जलसेकादिभि
रिव प्रवृद्धाः वृद्धिंप्राप्ताः तथा विषयाः रूपरसादयः एव प्रवालाः
पल्लवा यस्य प्रसृताः संति अधः पाताले मूलानि यदंतराणि अनुसं
ततानि सम्यक्प्रवृत्तानि विस्तृतानि मनुष्यलोके तु कर्मानुबंधी
नि कर्माधीनानि तेषामेव कर्माधिकारित्वात् मनुष्यलोके क
र्मकृत्वेतरलोकेषु तत्फलं भुंजत इत्यर्थः २

वनमाली टीका ८

तस्यैववृक्षस्यावयवसंबंधिन्यपराकल्पनोच्यतेअधश्चेति तस्य
जगद्वृक्षस्यशाखाःशाखान्वकशाखास्थानीयानिपंचभूतानि
अधोनिकृष्टंमूर्द्धमुत्कृष्टंचप्रसृतास्तदुभयत्रस्थिताःजगद्वृ
क्षस्यशाखारूपाणिभूतानिस्वकार्यशरीरादौस्वकारणेप्रकृत्या
दौचसूक्ष्मरूपेणसंतीतिभावःकीदृश्यःशाखाःगुणैःसत्वादि
भिरर्वाचीनमूलरूपैःप्रवृद्धाःलोकेप्यर्वाचीनमूलैःशाखानांवृ
द्धिर्भवति विषयाःशब्दाद्याःप्रवालाःपल्लवरूपायासांताः
प्रतीतिसुखहेतुत्वाद्विषयाणांपल्लवसाम्यंअधश्चअनुसंतता
निव्याप्तानिमूलानितानिचकर्मानुबंधीनिकर्मवानुबंधयस्वरमं
कारणंतद्युक्तानिसर्वस्यकर्मापेक्षयाप्रवृत्तत्वात् ईश्वरस्यापि
कर्मापेक्षयाफलप्रदत्वात् अस्यवृक्षस्यस्वरूपमनुष्येतथानोप
लभ्यतइत्युत्तरेणान्वयः यद्वाजीवाःसानुशयाःशाखाःतत्रदु
ष्कृतिनोधःपश्वादियोनिषुप्रसृताविस्तारंगताःसुकृतिनऊर्द्ध्वं
देवादियोनिषुप्रसृताःअधोमनुष्यत्वादारभ्यावीकपर्यंतंऊर्द्ध्वं
मनुष्यत्वादारभ्यसत्यलोकपर्यंतंप्रसृताजगद्वृक्षस्यशाखाः
कीदृशोगुणैःसत्वादिभिर्देहादिरूपेणपरिणतैर्जलसेचनैरि
वप्रवृद्धाःकिंचविषयाःशब्दाद्याःप्रवालाःशाखाग्रस्थानीयायाभि
रिंद्रियवृत्तिभिःसहसंबंधाच्चाधिष्ठानत्वाच्चपल्लवाइवपल्लवा
यासांसंसारवृक्षशाखानांतथाअधश्चमूलान्यर्वाचीनानित
द्भोगजनितरागद्वेषादिवासनानिमूलानीवधर्माधर्मप्रवृत्ति
कारणानितस्यजगद्वृक्षस्यानुसंततानिअनुस्यूतानिमुख्ये
मूलेविस्मृतिस्वरूपाद्यादिकमेवेतिनदोषःकीदृशान्यर्वाचीन
मूलानिकर्म धर्माधर्मलक्षणमनुबंधःपश्चाज्जनयितुंशीलंये
षांतानिकर्मानुबंधीनिऊर्ध्वमनुष्यलोकेमनुष्याणांहिकर्मा
धिकारःप्रसिद्धः २

ऊर्ध्वमवैनयत्नीटीका ९

किंचअधश्चोर्द्ध्वमिति तस्योक्तलक्षणस्यसंसाराख्यस्यवृक्षस्यशा

त्वाश्रयः प्रसृताः पापकर्मभिः म्लेच्छपशुपक्षितिर्यगादियो
निषु विस्तृताः च पुन ऊर्ध्वं पुण्यकर्मभिः देवगंधर्वादि
किन्नरयक्षादियोनिषु विस्तृताः कीदृश्यः शाखा गुणप्र
वृद्धाः गुणैस्सत्वरजस्तमोभिस्त्रिरूपैः सहवृद्धाः जलनिषे
कैरिव स्थौल्यं देहादिभाजः पुनः कीदृश्यः विषयप्रवा
लाः विषयाः शब्दस्पर्शरूपरसगंधाः प्रवालाः नवपल्ल
वा यासां ताः तास्तथा शब्दादिविषयानां शाखाग्रस्थानीयाभिः
श्रोत्रत्वक्चक्षूरसनघ्राणवृत्तिभिर्योगाद्ग्राह्यत्वाद्विषयाधिष्ठा
नत्वात् पल्लवस्थानीयत्वं भवतीत्यर्थः तस्य ब्रह्मलोक
ध मूलस्य मनुष्याग्रस्याश्वत्थस्याधश्च शब्दादूर्ध्वं वा
वांतराणि न्यग्रोधस्येव जटोपजटादीनि तद्वेगाज
नितरागद्वेषादिवासनारूपाणि मूलानि अनुसंततानि
विस्तृतानि संति तेषां धर्माधर्मप्रकर्मप्रवृत्तिकारित्वान्मू
लत्वात् नुच्यते च तत्मुख्यात्ता वन्मुख्यं मूलं तत्त्वासनास्व
वांतरमूलानीत्यर्थः कीदृशानि तानीत्यपेक्षायामाह म
नुष्यलोके कर्मानुबंधीनीति कर्मायेवानुबंधीनि मूला
नि येषां तानि यतस्ततः कर्मफलभोगावसाने पुनस्तु
र्मनुष्यलोके यतः कर्महेतुभूतानि तस्य लोकस्य कर्मभूमि सक
त्वप्रसिद्धत्वादित्यभिप्रायः ॥ २ ॥

^तस्यैवसंसारवृक्षस्यावयवसंबंधिन्यपराकल्पना उच्यते

श्री. गी. टी. प.

^पूर्वंहिरण्यगर्भादयः कार्योपाधयो जीवाः शाखास्थानी
यत्वेनोक्ताः इदानींतुतदनंतरोविशेषउच्यते तेषुयेकपूय
चरणाउकुतिनस्तेधः पश्वादियोनिषुप्रसृताविस्तारंग
ताः येतुरमणीयचरणाः सुकृतिनस्तेऊर्ध्वंदेवादियोनि
षुप्रसृताः अतोधश्चमनुष्यत्वादारभ्याविविपर्यंतंऊर्ध्वं
चतस्माद्देवादारभ्यसत्यलोकपर्यंतंप्रसृतास्तस्यसंसारवृक्ष
स्यशाखाः कीदृश्यस्ताः गुणैः सत्वरजस्तमोभिर्वृद्धाः इंद्रियवि
षयाकारपरिणतैर्जलसेचनैरिवप्रवृद्धाः स्थूलीभूताः
किंचविषयाः शब्दादयः प्रवालाः पल्लवाइवयासां^वृक्ष [margin: ^संसार]
शाखानांतास्तथा शाखाग्रस्थानीयाभिरिंद्रियवृत्तिभिः
संबंधात्प्रवालाधिष्ठानत्वाच्चकिंच अधश्चचशब्दादूर्ध्वंच
मूलान्यवांतराणितत्तद्भोगजनितरागद्वेषादिवासना
लक्षणानिमूलान्येवधर्माधर्मप्रवृत्तिकारणानितस्य
संसारवृक्षस्यानुसंततानिअनुस्यूतानिमुख्यंतुमूलंब्रह्मै
वेतिनदोषः कीदृशान्यवांतरमूलानिकर्मधर्माधर्मल
क्षणमनुबंधंपश्चाज्जनयितुंशीलंयेषांतानिकर्मानुबं
धीनिकुत्रमनुष्यलोकेमनुष्यश्चासौलोकश्चेत्यधिकृतो
ब्राह्मणादिविशिष्टोदेहोमनुष्यलोकस्तस्मिन्बाहुल्ये
नकर्मानुबंधीनिमनुष्याणांहिकर्माधिकारः प्रसिद्धः २

यत्वयंसंसारवृक्षोवर्णितः

णार्थानिभवंतिनयासंसारवृक्षस्यपरिरक्षणार्थानि कर्मकांडा
निधर्माधर्माधर्मतद्धेतुफलप्रकाशनार्थत्वात्तेषां पत्रत्वं यथा
व्याख्यातं समूलं संसारवृक्षं मयाममश्वत्थं वेदजानाति स वेदवि
त्कर्मब्रह्माख्यवेदार्थवित्स एव वेत्त्यर्थः संसारवृक्षस्य हि मूलं ब्र
ह्म हिरण्यगर्भावस्थश्च जीवः शाखास्थानीयः स च संसारवृक्षः
स्वरूपेण विनश्वरः प्रवाहरूपेणानंतः स च वेदोक्तैः कर्मभिः
सेव्यते ब्रह्मज्ञानेन च छिद्यत इत्येतावानेव हि वेदार्थः यश्च वे
दार्थवित्स एव सर्वविदिति समूलवृक्षज्ञानं स्तौति स वेदविदिति
तस्यैव संसारवृक्षस्यावयवसंबंधिन्यपराकल्पनोच्यते ॥ २

सदानंदी टीका ॥

एवं वेदार्थविच्चेन समूलतरुवेदिनं स्तुत्वा तस्यैव संसारवृक्षस्य क
ल्पनापरा ॥१ वैराग्यायोच्यते संग संबंधिन्यपरा मेय पूर्वं हिरण्यगर्भ
याकार्योपाधितया तरोः ॥२ शाखास्थानीयभावेन प्रोक्ताश्चात्र भूता
त्मनाहंयं विशेषस्तु कृतो मोपि वैराग्याय प्रोच्यते स्फुटं ॥३ कुत्सितच
रणा ये ते पापाः पश्वादियोनिषु सुविस्तारं गता येन्ये धर्मात्मानस्त
ऊर्ध्वगाः ॥४ देवादियोनिषु प्राप्ता विस्तारमतएव हि अधश्चोर्ध्वमनु
ष्यत्वादारभ्याब्रीकृतत्वावधिः ॥५ ऊर्ध्वं वततन आरभ्य सत्यलोका
न मा बत्तनाः शाखाः संसारवृक्षस्य कीदृश्यस्ता गुणोहैिभिः ॥६ दे
हेंद्रियाद्याकारेण सत्वाद्यैर्गुणैः स्थूलीभूताः प्रवृद्धास्ताः
सेवनैरिव पाथसां ॥७ विषयारंजकत्वेन शष्पाग्राः पल्लवा इव या
स्ता संसारवृक्षस्य शाखानां नानास्वयेरिताः ॥८ अधश्च शब्दाहूं च मू
लान्यवांतराण्यपि तत्तद्भोगजरागादिवासनालक्षणानि वै ॥९
धर्माधर्मप्रवृत्तेश्च कारकाणि समंततः तस्य संसारवृक्षस्यानुसं
तानि भवंत्यतः ॥१० मुख्यं तु मूलं ब्रह्मैवेत्यतो दोषात्कथं न तान्य
वांतरमूलानि कीदृशानीति कथ्यते ॥११ धर्माधर्मात्मकं कर्मानुब
न्धं परिणामतः येषां जनयितृ शीलमधिकारि जनेषु वि ॥१२ तानि
कर्मानुबंधीनि तत्राय भावश्चोयितः संसारवासना नाचधर्माधर्मा
त्मकर्मणां ॥१४ बीजांकुरवदन्योन्यजन्महेतुतया सदा तत्कृतो

जन्ममृत्यादिसंतानात्मा नर्थदः १४ संसारतरुरुच्छेद्यो ज्ञानेन पर
मासिना नोपेक्ष्योऽदीर्घरोगो यं यत्नजैः सन्मुमुक्षुभिः २

नीलकंठी टीका १२

अधश्च मनुष्येभ्य आ तिर्यक्स्थावरान्तयोः वीथ्यन्ता ऊर्ध्वं च मनुष्येभ्य
एवोपरि वर्गं यावद्यत्नादि हिरण्यगर्भपर्यंतं प्रसृताः प्रसरं प्राप्ताः अ
स्य शाखाः गुणैः सत्त्वादिभिः प्रकर्षेण वृद्धाः गुणप्रवृद्धाः विषया
एव रंजकतया कोमलपल्लवरूपाणि प्रवालानि यासां ताः संसारवृ
क्षस्योपरि मूलं ब्रह्म उक्तं अधश्चावरं मनुष्यलोके च तस्य मूलानि वा
सनारूपाणि अवांतरमूलानि प्रवाहनित्यानि यतः कर्मानुबंधीनि ^संततानि^
कर्मैव धर्माधर्माख्यं अनुबंधः पश्चाद्भावि येषां तानि कर्मानुबंधी
नि वासनाभ्यः कर्माणि कर्मभ्यो वासना इत्यनवरतं संतानोऽयं वृ
क्ष इत्यर्थः २

आनंदी टीका १२

तस्येत्थंभूतस्य संसारवृक्षस्य शाखा महदादयस्ताः प्रकृतिविकृ
तयः गुणैः सत्त्वादिभिः प्रवृद्धाः सात्त्विक एकादशकः प्रवर्तते वै
कृतादहंकारात् भूतादेस्तन्मात्रः सतामसः तैजसादुभयमि
त्यु[illegible]पदिष्टक्रमेणेंद्रियगणैकादशकतन्मात्रभेदेन विका
रविशेषं प्राप्तास्तथा विषयप्रवालाः विषयाः स्थूलाः शब्दादय
एव प्रवालाः पल्लवाः शाखापत्रयोः पर्वरूपाः भोगापवर्गयोः पु
रुषार्थयोः पुष्पफलयोरुद्गमस्थानानि यासां ताः अधश्चोर्ध्वं प्र
सृताः परस्परं प्रकृतित्वेन विस्तारं गताः तथाहि महत्तत्त्वं प्रधाना
प्रकृतित्वेनाधोगतमप्यहंकारप्रकृतित्वेनोर्ध्वगतम् एवमहंकार
स्य महत्तत्त्वापेक्षयाधोगतत्वेपि तन्मात्रेंद्रियापेक्षयोर्ध्वगतत्वं
तन्मात्राणां चाहंकारापेक्षयाधोगतत्वम् भूतापेक्षयोर्ध्वगतत्व
मेवं पुनः मूलानि पुरुषाधिष्ठिताः सैव प्रकृतयः संभूय च
तुर्विंशतितत्त्वरूपेण व्यक्ततामापन्नाः तासां समुदायरूपाणि सांख्य
प्रसिद्धानि लिंगानि सूक्ष्मशरीरसंज्ञकानि कर्मानुबंधीनि पुण्या
पुण्यरूपकर्मणोत्पादितानि मनुष्यलोके इत्युपलक्षणमासत्यास्

भोगभूमिषु यस्मान्नसंतन्तानि संस्तानि च कारांऊर्ध्वमपि तथा चो
क्तं पूर्वोत्पन्नमसक्तं नियतं महदादि सूक्ष्मपर्यन्तम् संसरति निरुप
भोगं भावैरधिवासितं लिंगम् पूर्वोत्पन्नमादिसर्गे तत्वोत्पत्ति सम
नन्तरमुत्पन्नमूल असक्तं सूक्ष्मत्वात् पाषाणमप्यनुप्रविशति धर्मेण
गमनमूर्ध्वं गमनमधस्तादवत्यधर्मेण ज्ञानेन चापवर्गो विपर्यया
दिष्यते बंधः वैराग्यात् प्रकृतिलयः संसारो भवति राजसाद्रागात्
ऐश्वर्यादविघातो विपर्ययात्तद्विपर्यासः न विना भावैर्लिंगं न वि
ना लिंगेन भावनिष्पत्तिः लिंगाख्यो भावाख्यश्च भवति तस्माद्विधा
सर्गः अष्टविकल्पो दैवस्तैर्यग्योनश्च पंचधा भवति मानुष्यश्चैक
विधः समासतो भौतिकः सर्गः ऊर्ध्वं सत्वविशालस्तमोविशाल
श्च मूलतः सर्गः मध्ये रजोविशालो ब्रह्मादिस्तम्भपर्यन्तः २॥

रामकंटीका ५४

+ यस्य चास्य त्रयस्यो लक्ष्मेणाथः शाखाः प्रस्ताऊर्ध्वं च प्रसृताः अतः
च शाखोहेतौ यस्मादधोमर्त्यलोकं शाखेनो कायां कर्मभूमौ मूलान्य
नुसंततानि क्लेशा एव प्रसृता इत्यर्थः कर्माण्यपि हि क्लेशमूला
न्यत एव ता हि शिमूलानि कर्मानुबंधीनि कर्माणि मनुष्याः कि
याश्च नवं पुंगमयितृशीलेयेषां तानि तथोक्तानि भोगभूमिषु हि भो
गत्वेन क्लेशा एव यथा विजृंभन्ते तथा कर्मभूमिषु तन्यव कर्मत्वेन
विजृंभन्ते नतश्च कर्मप्रभवा एव भोगभूमयऊर्ध्वप्रसृतशाखात्वे
नाध्यवसिताः तथोभयरूपाश्रयस्य शाखाः कीदृशा इत्याह गु
णप्रवृद्धा इति गुणैः सत्वादिभिः स्वस्वाधात्मना परिणमद्भिः प्रवृद्धा
वृद्धिं प्रापिताः यावद्धि प्रसरस्तासां स सर्वो गुणानुविद्ध एव भो
गात्मना कर्मात्मना वा विजृम्भते तेन यथा रसेन शाखा हृदयस्य व
र्धन्ते एवं गुणैः कर्मभूमयः फलभूमयश्च प्रवर्धन्ते नदात्मका एव
ता इत्यर्थः तथा विषयप्रवाला विषया शब्दादयो बुद्धिप्रधानास्तभू
मिष्वध्यवसिताः प्रवालस्थानीयाः पल्लवकल्पा यासां मूपरितनी

+ ननु किमयमुक्तस्य ऊर्ध्वं मूल एव अधः शाख एव
वस्पाडतदूर्ध्वान्तरमप्यस्याशीत्याशंकायां त
त्प्रतिपादनार्थमाह॥

श्री०
गी० टी०
पं०

षयस्तनीभूचसर्वास्तेवद्भिर्भिसिञ्चमानाम्भविषयत्वेनपरिणता गुणाख्यवपर्यायेणागमागमहेतुत्वमापाद्यमानाः देवत्वात्तिर्यङ् नीतिनानार्थम [illegible] २ ॥

16

लासिकी [illegible]टीका १५ श्ला

किंच — न स्वेश्वरस्य शाखा जीवाः अधो निकृष्टास्तु पश्वादियोनिषु ऊर्ध्वं चोत्कृष्टास्तु देवादियोनिषु प्रसृता वैतत्यमापन्नाः कीदृश्यो गुणप्रवृद्धाः गुणैः सत्त्वादिभिः प्रकर्षेण गुणवैषम्येन वृद्धिं गताः तथा विषयप्रवाला विषया रूपादयः प्रवालाः स्वरूपाच्छादकतया पत्रस्थानीयाः किंच तासां जीवशाखानां मनुष्यलोके कर्मानुबन्धीनि निर्हृतम्भाम्भात्मककर्मवासनारूपाणि मूलानि अधश्च पश्वादियोनिषु चकारादूर्ध्वं च देवादियोनिषु जीवत्वप्राप्त्यनन्तरं संततानि विस्तृतिमापन्नानि [illegible] २ ॥

पैवोलीटीका

तस्यैव संसारवृक्षस्य अवयवव्यापारकल्पनामाह अधश्चेति पूर्वोक्तेन ऊर्ध्वपरमपुरुषकारणमुक्त्वोर्ध्वमूलमिति इदानीं प्राग्भावीयकर्मफलजनितरागद्वेषादिवासनामवान्तरकारणत्वेनाह अधश्च मूलानीति तस्य संसारवृक्षस्य पूर्वोक्ताः शाखाः अधो मनुष्यलोकमारभ्य स्थावरपर्यन्तम् ऊर्ध्वं मनुष्यलोकादारभ्य हिरण्यगर्भलोकपर्यन्तं कर्मज्ञानानुसारेण ज्ञानकर्मफलभूता शाखा इव प्रसृता गुणैः सत्त्वरजस्तमोभिः प्रवृद्धाः स्थूलीकृता विषयप्रवाला विषयाः शब्दादयः कर्मफलेभ्यो देहादिभ्यः संसारवृक्षस्याङ्कुरीभवन्तीति विषयप्रवालाः शाखाः अधश्च मूलानि वर्तमानदेहापेक्षया प्राग्भावीयकर्मफलवासनाः अधः अर्वाग्भूता वर्तमानदेहारम्भकधर्मप्रवृत्तिहेतुत्वात्मू

लाविवर्तमानसंसारस्यकारणानिमनुष्यलोकेअनुसंतता
निमनुष्यदेहोपार्जितानिकर्मानुबंधीनिकर्मधर्माधर्मलक्षण
अनुबंधःपश्चाद्भावियेषांतानि २॥

रत्नावीरसमिद्धोधिनी

अधश्चेति तस्यधनुर्वेदवृक्षस्यप्रोक्तलक्षणस्यशाखाअवांतरधनु
र्वेदामन्वादिपरंपरयाउपदेशक्रमेणाधिगतधनुर्वेदविद्यावद
वोराजानोयेनरकादिलोकाधःस्थितमनुष्यवसरणाद्यभावेनापाति
तस्वधर्मत्वात्प्रसृतागतास्तथाचइहसंमुखमरणादिनासम्यक्प
रिपालितस्वधर्मत्वादूर्ध्वंस्वर्गादिलोकान्प्रसृतागताः कीदृशाश्चते
गुणप्रवृद्धाःसर्पिनीविग्रहोयानमासनंद्वैधमाश्रयः षड्गुणाश्च
नृपाणांसंधानादृगुणाः संध्यादिभिःषड्भिःप्रवृद्धाःप्रकर्षेणानेकदेशाधि
कारित्वेनवृद्धिंप्राप्ताविषयप्रवालाविषयादेशास्तएवप्रवालाःपल्ल
वस्थानीयायासांराजरूपावांतरशाखानांताविषयप्रवालाअने
केदेशेभ्योधिगतधनसमृद्धापन्नैः शाखैव दे दीप्यते हिरूपःअ
धश्चेति ईश्वरतत्त्वमेकमेवास्यमुख्यंमूलमिति मूलानीति बहुव
चनंमनुप्रभृतिभ्योनंतरंधनुर्वेदोपदेष्टृपरमाप्तवतांविद्यामि
श्रादीनांग्रहणंकरोति मूलान्यवांतरमूलान्युपदेष्टृरूपाणिबहू
निमनुष्याणांमनोःप्रथमधनुर्वेदाचार्यस्यापत्यानांलोकेभुवने
उत्पत्तिभूमौकर्मानुबंधीनि कर्मपुण्यपापात्मकंतदेवानुबंध्यने
नरभाविमेषांतानिकर्मानुबंधीनि अधश्चेतिचकारादूर्ध्वंचनरकलो
केषुस्वर्गलोकेषुचानुसंततानिविरूढानि अयमत्राभिप्रायः धनु
र्वेदवृक्षस्यावांतरमूलभूताउपदेष्टारउपदेशस्य धनुर्वेदरहस्यो
द्घाटनपूर्वकोपदेशनेनस्वर्गादीनुत्तमान्लोकान्प्रापयंति तदनुद्घा
टनपूर्वकोपदेशनेनतुनरकादीनधोलोकानधिगच्छंति तत्रस्वर्गे
नरकेचपुण्यपापोपस्थितान्सुखदुःखादीनुपभुंज्यकर्मक्षयेक्षणमत्र

[illegible]

ब्रह्मलोकं गच्छन्ति तत्रैव एवानुवर्त्य [illegible] नन्वयमनु
र्वेदोक्तस्य सम्यगाचरणेन त्रैवर्णिकानां मत्पदावाप्ति
र्भवतीति तदुपदेष्टॄणां केवलेन ज्ञानेन मत्पदावाप्तेरुल्ल
ब्धत्वादिति समाधेयं अत एव त्रैवर्णिकानां सम्यगभ्यस्तचतु
र्वेदानामप्यध्ययनमात्रेण स्वधर्मानुष्ठानेन भवेत्किं तत्तदुक्त
स्वधर्मपालनेनेति ॥२॥

मधुभाष्य

२॥

और कार्यरूप उपाधि विशिष्ट हिरण्य गर्भ आदि जो सकल जीव सोई शाखारूप पूर्व श्लोकमे कहा है तिन के मध्यमे जो अकर्म कारी अर्थात कुत्सित कर्म करते हैं तेई अधः अर्थात पशु आदि योनिसे जाते हैं और जो सत कर्म करते हैं वे ऊर्ध कहे देव योनि मे प्राप्त होय हैं येई संसार वृक्ष के शाखारूप सत्व आदि गुणों की वृत्तिसे जल सेचन के समान यथा योग बढ़ते हैं और शाखाके अग्रतुल्य इन्द्रिय औ इन्द्रियों के विषय जो रूप रसआदि सोई प्रधान अर्थात पल्लवरूप हैं और अधोभाग मे ऊर्ध भागमे औ समस्त मूलमे परमेश्वर ही मुख्यमूल हैं और तहां गवासनारूप अवान्तर वासना सब अवान्तर मूल हैं और अवान्तर वासना के कार्य कहते हैं कि कर्म मात्र ही सकल वासना के अनुबन्ध अर्थात् उत्तर भावी कहे होनहार सोई वासना समस्त मनुष्य लोकमे कर्म अनुबन्धी होता है अर्थात ऊर्द्ध अधो लोकमे भुक्त जो नानाप्रकार के भोग सोई सोई भोग वासना के द्वारा ही कर्म तय होनेसे मनुष्य लोक को प्राप्त लोगों को सोइ सोई वासना अनुरूप सकल कर्मोमे प्रवृत्ति होती है और जिसहेतु मनुष्य लोकहीमे कर्म का अधिकार है और कोई लोकमे नहीं है इससे मनुष्य लोकहीमे वासनारूप मूल कोकर्मका अनुबन्धी कहा है शोच है कि हाय मुङ सकल साधन मनुष्य देह पायके न कुछ्छ कर पाके इस मूलको भी भूलगये किसीको देख या किसीके उपदेशमे प्राप्त भये थे वो कान बहरे ही रह गये २

चौपई

नीचेऊपर फैली तिरसाखा उगाहइ दृक्षपीपल सोभाखा मूल सिखर पर्यंत विस्तार कर्मबंधी नरलोक उतार २॥

18

न रूपमस्येह तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्वा ३ ॥

शांकरभाष्यटीका १

यस्त्वयं वर्णितः संसारवृक्षः न रूपेति न रूपमस्य इह यथा वर्णितं तथा नैवोपलभ्यते स्वप्नमरीच्युदकमायागन्धर्वनगरसमत्वात् दृष्टनष्टस्वरूपो हि स इत्यत एव नान्तो न पर्यन्तो निष्ठा समाप्तिर्वा विद्यते तथा न चादिरित आरभ्यायं प्रवृत्त इति न केनचिद्गम्यते न च संप्रतिष्ठा स्थितिर्मध्यमस्य न केनचिदुपलभ्यते अश्वत्थमेनं यथोक्तं सुविरूढमूलं सुष्ठु विरूढानि विरोहं गतानि मूलानि यस्य तमेनं सुविरूढमूलमसङ्गशस्त्रेण असङ्गः पुत्रवित्तलोकैषणादिभ्यो व्युत्थानं तेनासंगशस्त्रेण दृढेन परमात्माभिमुख्यनिश्चयदृढीकृतेन पुनः पुनर्विवेकाभ्यासाश्मनिशितेन छित्वा संसारवृक्षं सबीजमुद्धृत्य ३

आनंदगिरिकृतटीका ३

पुनः पुनः रागादिना प्रवृत्तत्वेनानादित्वात् संसारवृक्षः स्वयमुच्छिद्यते न चोच्छेत्तुं शक्यते केनापीत्याशंक्याह यस्त्विति यथा पूर्वं वर्णितं यथा वा लोके प्रसिद्धं तथास्य रूपमिह शास्त्रेऽनुभूयते तथा चाज्ञानापनोद्यत्वं युक्तमित्याह यथेति तस्याप्रसिद्धौ हेतुमाह स्वप्नेति तस्य स्वप्नादिसमत्वे दृष्टनष्टस्वरूपत्वं हेतुं करोति दृष्टेति इत्येवमयतीति शेषः तमेवाभेयत्वे हेतुं कृत्वावसानमपि तस्य न भातीत्याह अत एवेति ज्ञानं विना भ्रान्तिवासनाकर्मणामप्रत्यस्तनिमित्तत्वान्नावसानमस्तीत्यर्थः इदं प्रथमत्वमपि नास्य परिच्छेत्तुं शक्यमित्याह तथेति आद्यन्तवन्मध्यमपि नास्य प्रामाणिकमित्याह मध्यमिति संसारवृक्षस्याप्रवृत्त्यशादितस्य तारणभङ्गस्य स्वयमेवोच्छेदसम्भवात् तदुच्छेदार्थं न प्रयतितव्यमित्याशंक्याह दृश्य

+ यस्मादेवंभूतत्वादयं संसारवृक्षो दुरुच्छेदोऽनर्थकरश्च तस्मादेनं दृढेन वैराग्येण शस्त्रेण छित्वा तत्त्वज्ञाने
+ यतेतेत्याह अश्वत्थमिति सार्धेन एनमश्वत्थं सुविरूढमूलमत्यन्तं नानावासनाभिर्बद्धमूलं संतमसंगः
संगराहित्यमहंताममतात्यागस्तेन शस्त्रेण दृढेन सम्यग्विचारवता छित्वा पृथक्कृत्य ॥ ३

श्वत्थमिति सुस्थानं वैराग्यपूर्वकं पारिव्राज्यं दृढीकृततत्त्वमेव विवेकपूर्वक
त्वेन स्फुटयति पुनः पुनरिति ३

स्वामिकृतटीका ३

किंच न रूपमिति इह संसारे स्थितैः प्राणिभिरस्य संसारवृक्षस्य तथा
ऊर्ध्वमूलत्वादिप्रकारेण रूपं नोपलभ्यते न चान्तः अवसानमनन्तत्वा
न्न चादिरनादित्वान्न च संप्रतिष्ठा स्थितिः कथं तिष्ठतीति न चोपल
भ्यते ३

पिशाचभाष्यटीका ४

अस्य संसारवृक्षस्य यथोपवर्णितस्य यथोक्तरूपं नोपलभ्यते नान्तः
न चावसानमुपलभ्यते न चादिः आदिरिदं प्रथममनया प्रवृत्तिरस्य सं
सारवृक्षस्य नोपलभ्यते न च संप्रतिष्ठा मध्यं मायामरीच्युदकगन्ध
र्वनगरादिवद्दि[illegible]स्वरूपत्वात् अश्वत्थमेनं यथोक्तमूलं सु
विरूढमूलम् असंगशस्त्रेण संगस्याभावः असंगः शस्त्रमिव शस्त्रं ते
न दृढेन परमार्थनिश्चयदृढीकृतेन छित्वा संसारवृक्षसमूलमुद्धृत्य
३

रामानुजभाष्यटीका ५

न रूपमिति अस्य वृक्षस्य चतुर्मुखादित्वेन ऊर्ध्वमूलत्वं तत्संतानरूपं
परया मनुष्यपश्वादयोऽधश्चाग्रत्वेनाधःशाखत्वं मनुष्यत्वे कृ
तैः कर्मभिः मूलभूतैः पुनरप्यधश्चोर्ध्वं च प्रसृतशाखत्वमिति यथे
दं रूपं निर्दिष्टं न तथा संसारिभिरुपलभ्यते मनुष्योऽहं देवदत्तस्य पु
त्रोऽहं यज्ञदत्तस्य पिता तदनुरूपपरिग्रहश्चेत्येतावन्मात्रमुपल
भ्यते तथास्य वृक्षस्यान्तो विनाशोऽपि गुणमयभोगेष्वसंगकृत इति
नोपलभ्यते तथास्य गुणसंग एवादिरिति नोपलभ्यते अस्य प्रति
ष्ठा चानात्मन्यात्माभिमान इति नोपलभ्यते प्रतितिष्ठत्यस्मिन्निति अ
ज्ञानमेवास्य प्रतिष्ठा अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण
दृढेन छित्वा ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति
भूयः एवमनन्तरप्रकारेण सुविरूढमूलं सुदृढं विविधरूढमूलमस
न्द्यात् सम्यग्ज्ञानमूलेन दृढेन गुणमयभोगासंगाख्येन शस्त्रेण छि

त्वान्न ततो विषयासंगाद्देनोत्तमदं परिमार्गितव्यमन्वेषणीयं यस्मि
न्गता न निवर्त्तन्ते [illegible]
[illegible]

अभिनवगुप्तकृत टीका ९

स्पष्टार्थं १ ॥

परमार्थप्रपा टीका ७

अथ तत्स्वरूपैकत्वमाह न रूपमस्येति द्वाभ्यां इह संसारे स्य मू
लप्रपंचवनरोः रूपं स्वरूपं तथा लौकिकदृष्ट्या नोपलभ्यते यथा
तानह दृष्टो स्यर्थः इदं ब्रह्मदामिति वक्तुरिफलत्वात् वपरंत्र स्यांतः प
र्यवसानं न तथा प्रतिष्ठा स्थितिः आदिरादि विर्भवस्तन्नोपलभ्यते
अथ तस्योपरमप्रकारमाह अश्वत्थमिति एतेन निरूपितप्र
कारं सुविरूढमूलं प्रकारान्तरेणान्तच्छेद्यं अश्वत्थं दृढेनानेन
न असंगशस्त्रेण वैराग्यकुठारेण छित्त्वा १

वनमाली टीका ८

अस्य जगद्वृक्षस्य रूपं सविकारत्वादिकं त्वं लाभंगुरमापात
रमणीयं यथा स्थितं प्राग्वर्णितं तथा नोपलभ्यते किं वा दिरूपत्वाति रे
नो विनाशः प्रतिष्ठा स्थितिरनन्त आरंभोऽस्य मध्यमस्ति नोपलभ्यते ना
दित्वात् एतावताकालतोऽनसमाप्तिर्भविष्यतीत्यतो नोपलभ्य
ते अपर्यंतत्वात् प्रतिष्ठाऽप्यमध्यमस्य नोपलभ्यते आत्मन्योक्तं निरू
पत्वेन ततनप्रतियोगिकस्यापि दुर्निरूपत्वात् अनादयन्त्वा
गादिना सुविरूढमूलं अमुं नवढमूलं प्रागुक्तमश्वत्थमेनं असं
गशस्त्रेणासंगः स्पृहाऽभावः संगविरोधि वैराग्यं प्रबलितं लोकै
षणाद्यागरूपम् न देवशसंगगहेषभयसंसारविरोधित्वात्
तेनासंगशस्त्रेणाहटेन भगवतानोक्तं दीक्षेनेन पुनः पुनर्वि
वेकाभ्यासशाणेन छित्त्वा निःशेषमुत्कृत्य ततः पदं तत्परि
मार्गितव्यमित्युत्तरेणान्वयः १

कुसुमवैजयन्ती टीका ९

श्री॰
गी॰टी॰
प॰

१०

किंचनरूपमितियथास्यसंसारस्यास्यवृक्षस्यमहदन्वात्मकचतुर्म
ख्वादित्वेनोर्द्धमूलत्वंतत्रतेनतिपरंपरारूपमनुष्या॰ अन्वेना
धः प्रस्थावित्वंच पुनरपिमनुष्यत्वकृतैः कर्ममूलमतैरधश्चोर्द्ध
प्रसृतशाखत्वंमयोपवर्णितंतत्तथास्यवृक्षस्येहमनुष्यलोकेरूप
संसारिभिर्जनैर्नोपलभ्यतेनप्राप्यतेकिंतुमनुष्योहंदेवदत्तस्य
पिताहंयज्ञदत्तस्यपुत्रोहंतदनुरूपकर्मकारीसुखीदुःखीवा
स्मिन्देशेऽस्मिन्ग्रामेनिवसामीत्येतावन्मात्रमेवज्ञायतेनातो
ह्वस्यान्तोनाशो॰ नोपलभ्यतेकथमयमनर्थव्रातसमदिलोवि
नश्येदितिनज्ञायतेयदाऽस्यान्तः अपंदीर्घपवस्थूलपवस्थैतप
वदैन्तादेवज्ञानंतस्यैवंयाथात्म्यननिर्णयोनज्ञायतेइत्यर्थः नचादि
र्नवास्यवृक्षस्यादिः कुतोऽयमीदृशोजातोऽस्तीतिकारणेनोपल
भ्यतेनचसंप्रतिष्ठाचपुनः सोपिनज्ञायतइत्यर्थः अस्यवृक्षस्यसंप्र
तिष्ठाकिंसमाश्रित्यायंसंतिष्ठतेइतिसमाश्रयोपिनोपलभ्यते
संप्रतिष्ठत्यस्मिन्निस्मात्मात्तानपूर्वकानात्ममात्माभिमानः सोपिन
ज्ञायतइत्यर्थः यस्मादेवंदुर्वोधोऽनर्थव्रातहेतु[illegible]तेनमुमु
क्षमस्यान्यवृक्षस्याहृढेनविवेकाभ्यासनिशितेनासंगशस्त्रे
णासंगोविषयाभिलाषस्त[illegible]हिरोध्यसंगोवैराग्यंतदेवशस्त्रंते
[illegible]नतदभिलाषनाशक
त्वान्विषयासंगरूपेणवैराग्यकुठारेणास्यविरूढमूलंसुदृढवि
विधकर्मवासनाभिः रूढमस्यानवर्द्धमूलंयस्यतंएनमश्वत्थंवि
षभूतमस्यवृक्षस्यहेतुंछित्वास्वतः पृथक्कृत्वसमस्तसंगलब्धवस्त्राश्या
त्मज्ञानेनतत्पदंपरिमार्गितव्यमित्युत्तरेणान्वयः ३

मधुसूदनी टीका ॥

इहसंसारेस्थितैः प्राणिभिरस्यसंसारवृक्षस्ययथावर्णितंऊर्ध्व
मूलधंमूलत्वादि तथ्यानेनप्रकारेणरूपंनोपलभ्यते स्वप्नमरी
चिउदकमायागंधर्वनगरवन्नष्टत्वेनदृष्टनष्ट॰स्वरूपत्वा
नस्यअतएवनस्यान्तोऽवसानंनोपलभ्यते एतावताकाले

न समाप्तिं गमिष्यतीति अपर्यंतत्वात् न वाऽस्यादिरुपलभ्यते इत आ
रभ्य प्रवृत्त इत्यनादित्वात् न वास्य प्रतिष्ठा स्थितिः मध्यमस्योपलभ्यते
र्थं तु न प्रतियोगिकत्वात्तस्य यस्मादेवंभूतः संसारवृक्षो दुरुच्छेदः
सर्वानर्थकरश्च तस्मादेनामश्वत्थमेनं सुविरूढमूलमत्यंतवद्धमूलं
प्रागुक्तमश्वत्थमेनं असंगशस्त्रेणासंगः स्पृहः असंगः संगविरो
धः वैराग्यं पुत्रवित्तलोकैषणाभ्यो व्युत्थानरूपं तदेव शस्त्रं रागद्वेषमयसं
सारविरोधित्वात् तेनासंगशस्त्रेण दृढेन परमात्मसत्ताऽभिमुख्य
दृढीकृतेन पुनः पुनर्विवेकाभ्यासनिशितेन छित्त्वा समूलमु
द्धृत्य वैराग्यशमदमादिसंपन्नः सर्वकर्मसंन्यासं कृत्वेत्यनेन ४

सदानंदी टीका ११

यस्त्वयं वर्णितो वृक्षः संसाराख्योऽस्य जंतुभिः संसाराख्योऽस्य जंतु
भिः संसारेऽस्मिन् स्थितैर्वेदैर्यथा वर्णितमद्भुतं १ रूपमेतेन प्रका
रेणनोपलभ्यते सौषुप्ते दृष्टनष्टस्वरूपत्वात् स्वप्नमायामयस्व
स्वप्नमायामरीच्यंभोगंधर्वनगरादिवत् अतोऽनास्यावसानं
कथंचिदुपलभ्यते २ एतावता सौ कालेन समाप्तिं यास्यतीति
वा अपर्यंततयाप्यस्य तथादिर्नोपलभ्यते ४ प्रवृत्त इत आरभ्ये
त्यनादित्वेन केनचित् संप्रतिष्ठा स्थितिर्नोपि मध्यमस्योपल
भ्यते ५ तस्माद्यं तन्निरूपणत्वाद्यस्मादेवमयं ततः संसाराख्योऽ
त्युच्छेदः सर्वानर्थकरस्ततः ६ अनाद्यविद्ययात्यंतवद्धमूलसु
दृढितं एनमश्वत्थनामानं संसारतरुमव्ययं वैराग्याख्येणाश
स्त्रेणरागद्वेषविरोधिना दृढीकृतेन ब्रह्मैकतानोन्मुखात्मनः
पुनः ८ विवेकाभ्यासतीक्ष्णेन छित्त्वोद्धृत्य समूलतः वैराग्यात्
षड्भूसंपन्नाः कृत्वा संन्यासमादरात् ९

नीलकंठी टीका १२

ननु योऽपि स्यान्मनःदेहाद्यध्यासस्तत्प्रतिक्षणविनाशिविज्ञान
संतानरूपो वा ब्रीह्यादिवत्प्रवाहनित्यो वाऽयं संसारस्तर्हि दुरुच्छे
द्यो वासनानां कर्मणां च बीजांकुरवदन्योन्यजन्महेतुत्वस्यावर्जनी

श्री·
गी·टी·
प·

२१

यत्वादित्याशंक्य सत्वासत्वाभ्यामनिर्वचनीयोयमित्येतत्पदमाश्रि
त्य परिहरति न रूपमिति रज्जूरगस्येवास्य रूपं सम्यग्दृशावीक्ष्य
माणं सत्त्वोपलभ्यते इह जीवस्यैव देहे यथापूर्वमज्ञानदशायां
तथा नोपलभ्यते ज्ञानदशायां तेनास्य साक्षात्वमनुभवैकवेद्य
मित्युक्तं एतेनानुपलभ्यरूपत्ववचनेन स्वप्रकाशानां विज्ञाना
नां रूपवतां बीजादीनां च सादृश्यस्य व्याहतिः न हि शशविषा
णवत्तुच्छत्वमपचाये स्यादित्यत आह नान्तो न चादिरिति उपादानस्य
मूलाज्ञानस्याद्यन्तशून्यत्वादयमप्याद्यन्तशून्य इत्यर्थः न हि आ
त्मवदपरिहार्यः स्यादित्याशंक्याह न च संप्रतिष्ठा अस्य प्रतिष्ठा
स्थितिलयस्थानं ह्रदस्य भूमिरिव नास्ति न चायं बलेन विकारो ये
न तैवलीयेत न चेष्टापत्तिः बलेन कौटस्थ्यभंगापत्तेः किं
तर्हि तत्त्वज्ञानमस्योपादाने तस्मिन्नज्ञाने न विनष्टे समूल
स्यास्योच्छेदो भवति अज्ञानस्य च तुच्छत्वं तच्छेदाभ्यपि हि ते
पत्तासीदित्यादिश्रुत्या न कार्यस्य रज्जूरगादेः प्रलयेन दृष्टप
लंभस्यानभवेन च सिद्धं तस्मादस्य प्रतिष्ठा नोपलभ्यत इति
युक्तमेवोक्तं तमेनमश्वत्थं वासनानां दार्ढ्येन सुविरूढमू
लं दृढतरमूलमपि असंगशस्त्रेण संगो देहादिताद्रूप्यबुद्धि
स्तद्वर्जनमसंगः स एव शस्त्रं तेन दृढेन परिपक्वेन छित्वा त
तः पदं तत्परिमार्गितव्यमित्यन्वयः यद्यपि स्थूलसूक्ष्म
योः संसारयोरसंगः स सुषुप्तौ स्वयमेव जायते तेन तन्मूलवा
सनाभिः प्यात्मनोः संगो न मीयते तथापि वासनानां मूलस्याज्ञा
नस्य ज्ञानेनानुच्छेदात्तत्संगधीर्दृढा भवति तस्मात् विविक्तसम
माध्यभ्यासेन कारणशरीरस्याप्यसंगः साध्यः तेन चासंग
शस्त्रेणास्योच्छेदो लवणोदकवद्रज्जूरगवद्वा प्रविलापनरू
पः कर्तव्यः न तु संख्यानामिव स्वरूपेणास्तः परिवर्जनमा
त्रं ३

अस्य संसारस्य विश्वस्यैवास्यान्यस्य सत्वादिभिर्गुणैः प्रवृद्धस्य त
थैकांतिकेन नियमेनेह क्वचिदेकत्वरूपं केवलं सात्विकं राजसि
कं तामसिकं वा नोपलभ्यंते सर्वेषां गुणानां संभूयैव कार्यारंभ
कत्वशक्तेर्विश्वे वैचित्र्यस्याविनिर्भागात् अतएव मिलित्वैव गु
णानां कार्यारंभकत्वेपि नान्तः विश्वस्य कार्यवर्गस्यैकत्वेनैव नियम
ना तामसिकत्वमिति संसारास्यान्यस्यास्यान्तस्तामसिकत्वेन समा
प्तिर्नचास्ति नचादिः प्रथममन्यस्यारंभे सत्वमेव हि रजस्तमसोः
कार्याणामनुमतये प्रकाशकमिति गुणकार्यस्यास्य संसारस्यास्य
स्य प्रथमावस्था सात्विकी वेत्यपि नास्ति नच संप्रतिष्ठा प्रवृत्तिरू
पा रज एव हि सत्वतमसोः स्वकार्यसम्मतये प्रकाशेन नियमने
वा प्रवृत्तिं कारयतीति विश्वस्य मध्यावस्था राजसिकीत्येव न तद
पि नास्ति अत्रायं तात्पर्यार्थः यद्यपि सत्वरजस्तमांसीव विश्वका
र्यकारणानि शब्दादौ कार्ये हि श्रवणादेः कारणस्य सत्वं प्रका
शं करोति तदनु तत्सम्मत्यर्थं रजः प्रवर्तयति तु नस्तत्रैव तमो नि
यमयतीति प्रथमं प्रकाशस्तदनु प्रवृत्तिः ततो नियम इति
क्रमो नास्ति व्युत्क्रमेणापि दृष्टेः तथा ह्यदृष्टवशात् क्वचि
द्विषये प्रथममेव तमसावरकेण नियमितस्य तदनु सत्वं त
त्रैव सत्वं प्रकाशयति ततो रजः प्रवर्तयति एवमेवादृष्टवशाद्र
जसा प्रथममेव प्रवर्तितस्य तदनु प्रकाशनियमौ दृष्टौ गुणा
नामन्योन्याभिभवाश्रयजननमिथुनवृत्तित्वैवैचित्र्येण विश्वे वैचि
त्र्यस्याविनिर्भागात् तथा च स्कन्दपुराणे अन्योन्यमिथुनाः
सर्वे सर्वे सर्वत्रगामिनः रजसो मिथुनं सत्वं सत्वस्य मिथुनं
रजः तमसश्चापि मिथुने ते सत्व रजसी उभे उभयोः सत्वरज
सोः मिथुनं तम उच्यते नैषामादिः संप्रयोगो वियोगो वोपल
भ्यते तथा चैतल्लदितमेव सर्वस्मिन्नध्याये स्वयं भगवताभीप्सी

श्री· गी·टी· पं·

९२

त्तिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः अन्योन्याभिभवाश्र
यजननमिथुनवृत्तयश्च गुणाः सत्त्वं लघु प्रकाशकमुपष्टम्भ
कं चलं च रजः गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः धर्मे
ण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण ज्ञानेन चापवर्गो विप
र्ययादिष्यते बंधः इत्यादिसांख्यप्रमाणोपपादकं पूर्वाध्याये स
त्त्वरजस्तमः इत्यारभ्योर्ध्वं गच्छंति सत्त्वस्था इत्यंतम्। एतमित्थम्भू
तमश्वत्थं संसारवृक्षं विरूढानि शाखागुणनीत्या धर्माधर्मादिहे
तुकतया नानाभोगभूमिषूर्ध्वाधोगामितया नवरतं प्रसरो हेर्वि
स्तारं प्राप्तानि मूलानि लिंगाख्यानि सूक्ष्मशरीराणि तदनुप्रवि
ष्टानि स्थूलशरीराणि च यस्येदृशमश्वत्थं संसारवृक्षं दृढितेन यो
गाभ्यासादिसमुत्तेजितेन असंगो वैराग्यमेव शास्त्रं तेन छित्वा।
अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः इत्या
दिश्रुत्युक्तया विवेकाख्यात्या प्रकृतिपुरुषयोः पृथक्पृथग्विभा
व्येति यावत् ३ ॥

+ तदेवंविधस्योक्तस्य भवस्य वक्ष्यमाणज्ञानाभावादाह॥

रामकंठीटीका १४

+ अस्य यथाप्रतिपादितस्याश्वत्थस्य तथानेन प्रकारेण रूपं स्वभावो
नोपलभ्यते तत्त्वतो नैव प्रतिपद्यते अन्यथैव स्वीयमविद्येश्वरमा
यामात्रनिबंधनतया तत्त्वतः निःसाररूपत्वेन स्थितो ज्ञातनम्भूत्वा
त्वान्यथैव परमार्थसत्त्वेनावभासमानो ममकारग्रहेण प्राणिनो
निव भाति यथास्य स्वरूपं नोपलभ्यते न चास्य प्रतिष्ठांतराव
र्तिनी सम्यक् स्थितत्वस्यापि न लभ्यते यतो येन येन रूपेणास्य स्थि
तिस्तत्सर्वं परिणामित्वादस्थिरमत एवंविधस्यास्य स्वभावाः
प्रकाशस्याध्यवधायकस्य छेदोपायमाह एवं यथाप्रतिपादित
स्वरूपं देहवतां क्लेशनिमित्तकर्मानुरूपपरिपाकानुभवाधि
करणभूतभुवनसमात्मकमश्वत्थमेतत्साधर्म्यादश्वत्थेन निरूपित

मतएवसविरूढमूलंसुदृढाद्येनविविधंकृत्वारूढानिप्ररोहंप्राप्तानिलोके
शाएवमूलानियस्यतंतादृशमसंगशस्त्रेणममताग्रहरूपगाढग्रंथत्वा
गात्मनाविवेकपाषाणकषणेनवशात्रितेनतीक्ष्णेनकुठारेणछित्वामू
लतोद्विधाकृत्वा ॥ २ ॥

लासिकी [illegible]टीका १५

बृ१

किंच अस्येश्वरस्यस्वरूपंव्यापकत्वसर्वज्ञत्वसर्वकर्तृत्वरूपतयायथाभव
ति तथेहजीवलोकेनोपलभ्यतेनानुभूयतेकेनचित् तथान्तस्तनोप
लभ्यतेनं तथापि नचादिरनादित्वात् नचसंप्रतिष्ठासंस्थितिराश्रय
रूपाचनोपलभ्यते एनमीश्वररूपमश्वत्थंसुविरूढमूलंसुविरूढ
दृढमूलंवृत्तरूपंयस्यतम् दृढेनवैराग्यशस्त्रेणछित्वापरिच्छि
द्यविवेच्य ॥ ३ ॥

पंचोले टीका

वासनारूपंकर्मतत्वाऽऽरभतेपुमान् नरूपमिति योयंसंसाररूपो
वृक्षोवर्णितः अस्यइहलोकेयथावर्णितंरूपंनोपलभ्यतेचवृ
नः नअंतः नआदिः नसंप्रतिष्ठास्थितिः मध्यभागः केनचिन्नोप
लभ्यते एनंसंसारवृक्षंअसंगशस्त्रेणपुत्रवित्तलोकैषणाभ्यो
व्युत्थानेनवैराग्येणारूढेणपरमात्माभिमुख्यं दृढीकृतेनपु
नः पुनः विवेकाभ्यासाश्मशितेनशस्त्रेणपरशुनासविरूढमूलं
नानाप्ररोहगतमूलंसंसारवृक्षंछित्वासवीजमस्तमूल्य ३ ॥

गणवीरसमिद्धोधिनी ॥

नरूपमिति अस्ययत्नुर्वेदहृदन्तस्ययेनप्रकारेणोर्ध्वमूलाधःशा
खत्वेनस्वरूपंवर्णितं तथातेनप्रकारेणास्यरूपंनोपलभ्यते
मूलशाखोनांबाहुल्यात्तथांतः पर्यंतएतावताकालेनसमाप्तिं
गमिष्यतीतिनोपलभ्यते नचास्यादिरियतआरभ्यप्रवृत्तइतिचो
पलभ्यते तथास्यसंप्रतिष्ठास्थितिर्मध्यंनोपलभ्यते आद्यंतप्रति

योगित्वात्तस्येति कारणगुणाः कार्यमनुगामिन इति न्यायेनादि
मध्यान्तशून्यपरतत्त्वकारणसमुद्भूतस्य यजुर्वेदस्यादिम
ध्यान्तशून्यत्वमुचितमेवेति भावः अश्वत्थमिति तत्तद्दैहिका
मुष्मिककामप्रदत्वेन शून्यतमत्वादश्वत्थमिवाश्वत्थमेनं
यजुर्वेदहृदं सुविरूढमूलं सुष्ठु यथा स्यात्तथा विशेषेण रूढं
प्रसिद्धिं गतं पवनतनयलक्षणं मूलं कारणं यस्य तत्सुविरूढमूलं
परमेश्वरकारणकमित्यर्थः असंगशस्त्रेणेति अविद्यमानोऽय
जुर्वेदादन्यत्र संगः सजनं यस्य तदसंगं निरंतरं तादृशं यच्छस्त्र
मभ्यासरूपं तेनाभ्यासशस्त्रेण दृढेण पुनः पुनस्तत्परतया
स्थितीकृतेन दृढाभ्यासेनेत्यर्थः छित्वा सारासारपृथक्करणे
न छेदमिव प्राप्य यजुर्वेदं दृढाभ्यासेन सुनिश्चितीकुर्येति
यावदिति ३॥

मधुभाष्य

३॥

भाषाअनुवादटीका १

इस संसारमे वर्तमान जो प्राणी हैं वे संसार वृक्षका ऊर्द्धमूलआदि मे
द नहीं जानते हैं और अत्यन्त बड़ेपनके हेतुसे इसका अन्तभी नहीं
जाना जाय है तथा अनादि हेतुसे आदि भी नही कोई जानिशके
है और स्थिति अर्थात यह संसार किसतरह स्थित औ कैसा है सो
भी खबर किसी को नही है इससे यह संसार वृक्ष दुच्छेद्य कहे इ
स का काटना कठिन है औ अनर्थकारी है इसी हेतु इस संसार
को दृढ वैराग्य रूप शस्त्रसे छेदन करके तत्वज्ञान की यत्न कर
ना चाहिये यह डेढ श्लोकसे कहते हैं कि यह अश्वत्थरूप दृढ
मूल संसार को अहं ममता त्यागरूप दृढ असंगशस्त्रसे सम्यक
विचार से छेदन अर्थात पृथक करके १

चौपई

नाइहरूपमिलैत्योंजोई अंत न मध्य लखै पुनकोई अश्व
त्थकोजो दृढमूलहि दृढअसंगशस्त्रसें छेदहि १

ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥४॥

शांकरभाष्य टीका १

तत इति ततः पश्चात् यत् पदं वैष्णवं तत् परिमार्गितव्यं परिमार्गितव्यं परिमार्गणमन्वेषणं ज्ञातव्यमित्यर्थः यस्मिन् पदे गताः प्रविष्टा न निवर्तन्ति नावर्तन्ते भूयः पुनः संसाराय कथं परिमार्गितव्यमित्याह तमेव च यः पदशब्देनोक्त आद्यमादौ भवं आद्यं पुरुषं प्रपद्य इत्येवं परिमार्गितव्यं तच्छरणतयेत्यर्थः कोऽसौ पुरुष इत्युच्यते यतो यस्मात् पुरुषात् संसारमायावृक्षप्रवृत्तिः प्रसृता निःसृता ऐन्द्रजालिकादिव माया पुराणी चिरन्तनी ॥४॥

आनंदगिरिकृत टीका २

उद्धृत्य किं कर्तव्यं तदाह तत इति पश्चादश्वत्थाहंकृत्यवस्थितमित्यर्थः किं तत्पदं यदन्विष्य ज्ञातव्यं तदाह यस्मिन्निति येन सर्वं पूर्णं पुरिषु वा शयानं पुरुषं प्रपद्ये शरणं गतोऽस्मीत्यर्थः निर्वर्णवादान्तरोधितं दृष्टान्तमाह यद्वेति ॥४॥

स्वामिकृत टीका ३

[illegible] ततस्तस्य मूलभूतं तत्पदं वैष्णवं परिमार्गितव्यमन्वेष्टव्यं कीदृशं यस्मिन्गताः प्राप्ताः सन्तो भूयो न निवर्तन्ते पुरुषं तेनावर्तनं इत्यर्थः अन्वेषणप्रकारमेवाह यतः पुराणी चिरन्तनी संसारप्रवृत्तिः प्रसृता विस्तारिता तमेव चाद्यं प्रपद्ये शरणं प्रजामि इत्येवमेकान्तभक्त्यान्वेष्टव्यमित्यर्थः ॥४॥

५ गी

पैशाचभाष्य टीका ४

ततः पश्चात्तत्पदं वैष्णवं परिमार्गितव्यं अन्वेष्टव्यं ज्ञातव्यमित्यर्थः कथं परिमार्गितव्यमित्याह तमेव विष्णुमाद्यं मोक्षेभवं पुरुषं जगत्पूर्वकं प्रपद्ये शरणं गच्छामि यतः यस्मात्संसारमायाप्रवृत्तिराविर्भावः प्रसृता निःसृता पुराणी नित्या इति ४

+कथमनादिकालप्रवृत्तो गुणमयभोगसंगस्तन्मूलं च विपरीतज्ञानं निवर्तत इत्यत्राह॥

रामानुजभाष्य टीका ५

+तत इति अज्ञानादिनिवृत्तये तमेव चाद्यं कर्तृत्वादिभूतं मयाध्यक्षेण प्रकृतिः सूयते सचराचरं अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते मत्तः परतरं नान्यत्किंचिदस्ति धनंजयेत्यादिषूक्तमाद्यं तमेव शरणं प्रपद्येत यतः यस्मात्कर्तृत्वस्य प्रवृत्तिर्येन गुणमयभोगसंगप्रवृत्तिः पुराणी पुरातनी प्रसृता उक्तं हि मयैव पूर्वमेतत् दैवी ह्येषेति प्रपद्य यतः प्रवृत्तिर्निवापादः तमेव चाद्यं पुरुषं प्रपद्ये शरणमुपगम्येति यतः अज्ञाननिवृत्त्यादेः कर्तृत्वस्यैतस्य साधनभूता पुराणी प्रवृत्तिः प्रसृताः पुरातनानां मुमुक्षूणां प्रवृत्तिः पुराणी पुरातनानां मुमुक्षूणां मामेव शरणमुपगम्य निर्मुक्तबन्धाः संजाता इत्यर्थः ४

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं ४ ॥

परमार्थप्रपा टीका २

किं कर्तव्यमित्याह तत इति ततस्तस्मात्संसारतरोः परमुत्कृष्टं मूलभूतं तत्पदं देशज्ञाने प्रागुक्तं विष्णोः परमं पदं परब्रह्माख्यं तत्परितः सर्वशक्तिमत्तं मार्गितव्यं सद्गुरुप्रसादविवेकोपलब्धिनेन मार्गणीयं बोद्धव्यं तत्किं पदं यस्मिन् गताः प्रविष्टाः सन्तो भूयो न निवर्तन्ति पुनरावृत्तिं न प्राप्नुवन्ति अथ तत् किमाकारेण प्रविष्टा इत्याह तमेवेति तमेवाद्यं आद्यं सर्वस्य जगतः मूलभूतमित्यर्थः पुरुषं प्रपद्ये शरणं व्रजामि तं कं यतः पुराणी अनादिप्रवाहरूपा प्रपंचप्रवृत्तिः प्रसृता विस्तारिता तमधिकरणरूपमित्यर्थः अथ क्रमेण ज्ञानप्रयत्न

असंगशस्त्रेण दृढेन छित्वेत्यत्र आश्वलोपनिषदुक्ता श्रुतिः न कर्मणा
न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः परेण नाकं निहितं गुहायां
विभ्राजते तद्यतयो विशन्तीति भाष्यं एके योगिनस्त्यागेनैव परेणो
त्कृष्टेन वैराग्येण अमृतत्वमानशुः प्राप्ताः परं तु न कर्मणा
फलाभिसंधिकृतेन न प्रजया मामा पुत्रस्य लोकोस्तीति श्रुतेः न ध
नेन न लाभ पुरुषादिषु व्ययीकृतेन अमृतत्वं किं नाम अमृतत्वाय यतयः
संन्यासिनो विशन्ति कुत्र तान्वा विशन्ति नाकं स्वर्गपमलोकि किं गुहा
यां हृदयाकाशे निहितं निधिवद्गोपितमपि विभ्राजते अर्थप्रका
शकत्वेन शोभते ततः परं तस्मिन्मार्गे नवास्मिन्नत्र शानमयी श्रु
तिः तद्यथेते श्लोकाः अणुः पंथा विततः पुराणो मां स्पृष्टोनुवित्तो
मयैव तेन धीरा अपियंति ब्रह्मविदः उत्क्रम्य स्वर्गं लोकमितो विमु
क्ताः तस्मिन् शुक्लमुत नीलमाहुः पिंगलं हरितं लोहितं च एष
पंथा ब्रह्मणा हानुवित्तस्तेनैति ब्रह्मवित्तैजसः पुण्यकृच्चेति भा
ष्यं तत्रा शु श्लोकाः वदेपप्रलोक्याः मंत्राः अपि संतोतियान्तवल्कोव
दति तेकथं अणुः सूक्ष्मः सम्बुलो पलक्षितः पंथा मार्गोस्ति वि
ततो विशिष्टतरः पुराणो नादिसिद्धः मां स्पृष्टः मया प्राप्तः अनन्तरं
मयैव अनुवित्तः अनुष्ठितः तेन मार्गेण कृत्वा धीरा ध्यानेश्वसयोगिनः
ब्रह्मविदः उर्ध्वं क्रमण स्वर्गं लोकं मुक्तमप्यपतिगच्छंति किंभूताः इतः
प्रपंचाद्विमुक्ताः तस्मिन्मार्गे मतं दर्शमाह शुक्लमित्यादि एष पंथा योगि
न केवलं मयैवानुष्ठितः किं तु ब्रह्मणाप्यनुवित्तोनुष्ठितः तेन ब्रह्म
विदेशैर्ष्येव तान् पुण्यकृत्तदनुष्ठाता तैजसः प्रकाशात्मा यति प्राप्नोति
नान्यः ४

वनमाली टीका ८

ततो गुरुकृपया स्वरूपं ज्ञात्वा आत्मवत्तां उद्दिश्य वासितेन नदेसर्वं पदं य
यत इति पदं स्वरूपं वेदान्तवाक्यैः परिमार्गितव्यं श्रवणादिना त्वे
ष्टव्यः सोन्वेष्टव्यः स विजिज्ञासितव्य इति श्रुतेः यस्मिन्पदे गताः
साक्षात्कारेण प्रविष्टाः साधवस्वरूपं साप्रज्ञं शमाद्यन्वयः न निव
र्तन्ति न निवर्तन्ते भूयः पुनः संसारेन पतंतीत्यर्थः परिमार्गणाय

कारमाह तमेव चाद्यं सर्वादौ विद्यमानं पुरुषं येनेदं पूर्णं तं पुरुषं प्र
पूर्वाशयानं सर्वान्तर्यामिणं प्रपद्ये शरणं गतोऽस्मीत्येवं तदेकशर
णतया तदन्वेष्टव्यमित्यर्थः ते कं पुरुषं यतो यस्मात्पुरुषाद्यवृ
त्तिः संसारस्य प्रवृत्तिः पुराणी चिरंतन्यनादिः प्रसृतानेन जग
हेतुकारणपुरुषं प्रपद्य इत्यन्वयः ४

ऊकमवैजयन्ती टीका ४

किंच ततः पदमिति ततो विषयासंगाद्धेतोः यद्वा ततः संसारा
श्वत्थवृक्षमूलाद्व परिशिष्टं तं तत्पदं वैष्णवस्थानं वैकुंठं परिमा
र्गितव्यं सत्संगलब्धश्रवणकीर्तनादिसाधनैरन्वेष्टव्यं कीदृशं त
त्पदमित्यपेक्षायामाह यस्मिन्निति यस्मिन्विष्णुपदे गताः भक्तिज्ञा
नवैराग्यैः साधनैः प्राप्ताः जना भूयः पुनर्न निवर्तंति पुण्यक्षये तथा
स्वर्गादिवत्संसारे न पतंतीति ननु अनादिकालप्रवृत्तो गुणमयभो
गसंगस्तन्मूलविपरीतता तेन च कथं निवर्तनं स्यादाशंक्य तन्निवृत्ति
लक्ष्मस्वरूपं वैष्णवमाह तमेवेति यतो यस्मादखिलविदविदात्मक
जगत्स्रष्टुः सर्वेश्वरात्पुरुषोत्तमादियं पुराणी चिरंतनी प्रवृत्तिर्गु
णमयभोगसंगात्मिका प्रसृता विस्तृता भवति मयाध्यक्षेण प्र
कृतिः सूयते सचराचरं अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते मत्तः
परतरं नान्यत्किंचिदस्ति धनंजयेत्यादिश्रुतेः तमेवाद्यं सर्वकारणं
पुरुषं विदविदंतरात्मानं प्रपद्येत शरणत्वेन दैवी ह्येषा गुणम
यी मम माया दुरत्यया मामेव ये प्रपद्यंते मायामेतां तरंति ते इत्यादिस्मृ
तेः लक्षणयाभिरयेदयामपस्यैव गुणमयभोगसंगोऽज्ञानं च
निवर्तेतेत्यर्थः प्रपद्यत इति प्रवृत्तिरिति वा द्वाः तमेव चाद्यं पुरुषं
प्रपद्ये शरणमुपगम्येति यतोऽज्ञाननिवृत्त्यादेः कृत्स्नस्यैतस्य सा
धनभूता पुराणी प्रवृत्तिः प्रसृता पुरातनानां मुमुक्षूणां प्रवृत्तिः
पुराणी पुरातनता मुमुक्षवो मां शरणमुपागम्य निर्मुक्तवंथा
मवन्नित्यर्थः ४

मधुसूदनी टीका १

ततो गुरूपसत्त्यनंतरमश्वत्थाहर्ध्वमवस्थितं तदेवं पदं वेदे

नवाक्यविचारेणपरिमार्गितव्यंअन्वेष्टव्यंसोन्वेष
व्यःसविज्ञासितव्यइतिश्रुतेःतत्पदंश्रवणादिनाज्ञातव्य
मित्यर्थःकिंतत्पदंयस्मिन्पदेगताःप्रविष्टास्तानेनावर्तंतेभूयः
पुनःसंसारायकथंतत्परिमार्गितव्यमित्याह यःपदशाहेनो
क्तःतमेवचाद्यमादौभवंपुरुषंयेनेदंसर्वंपूर्णंतंपुरुषंपुरु
षवाशयानंप्रपद्येशरणंगतोस्म्येवंतदेकशरणतयांन्वेष
व्यमित्यर्थःतंकंपुरुषंयतोयस्मात्पुरुषात्प्रवृत्तिःमायामय
संसारवृक्षप्रवृत्तिःपुराणीचिरंतनीअनादिरेषाप्रसृतानिः
सृताऐंद्रजालिकादिवमायाहस्त्यादितंपुरुषंप्रपद्येइत्यन्व
यः

ननिवर्तन्ति
पुरुष
न

गी॰
टी॰
पं

27

नीलकंठीटीका

तमिममश्वत्थं छित्त्वा किं कर्तव्यमत आह ततइति नकेवलं
निर्विकल्पसमाधिना तदसंगमात्रेण कृतार्थता किंतर्हि ततोऽसं
गानंतरं तत् श्रुतिप्रसिद्धं पदं पदनीयं ब्रह्म परिमार्गितव्यं श्रुतियु
क्तिबलेनाहमेव ब्रह्मास्मीति ज्ञातव्यं यस्मिन्पदे निर्विकल्पेन गताः
प्राप्ताः संतो न निवर्तंते न पुनर्निवर्तंते तमेव चाद्यं पुरु
षं पुरिशरीरे शयानमहमपि प्रपद्ये शरणागतोस्मीति भावयेत्
भगवतएववाइदंवचनं लोकशिक्षार्थं वर्तमानचकर्मणीतिव
त् कोसौ पुरुषः यतः पुराणी आद्या प्रवृत्तिः सोकामयत बहु
स्यां प्रजायेयेति इत्येवं रूपा प्रसृता अस्मास्वपि प्रवृत्ता यतोवय
मपि इदानीं कामयामहे धनादिना वयं भूयांसः स्याम प्रजया प्र
जायेमहीति चेति येनेयं प्रवृत्तिर्दर्शिता तत्स्वरूपमेनैवमानिवर्ति
ष्यतइत्यर्थः ४

आनंदी टीका

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ततः परं विवेकख्यातेरुत्तरं तत्पदं परिमार्गितव्यम
न्वेषितव्यं यस्मिन्गते न निवर्तंते भूय इति कैवल्यप्राप्त्युपदेशः
तथा चोक्तं योगानुशासने दृष्टानुश्रविकविषयवितृष्णस्य वशी
कारसंज्ञा वैराग्यमिति अस्यार्थः स्त्र्यन्नपानैश्वर्यादिवितृष्णस्य स्व
र्गवैदेह्यप्रकृतिलयत्वाद्यानुश्रविकविषयवितृष्णस्य दिव्यादिव्य
विषयसंप्रयोगेपि विषयदोषदर्शिनश्चित्तस्य प्रसंख्यानबलाद

नाभोगात्मिकाहेयोपादेयशून्यावशीकारसंज्ञावैराग्यं तत्परंपुरुष
ख्यातेर्गुणवैतृष्ण्यं अस्यार्थः दृष्टानुश्रविकविषयदोषदर्शीपुरुषोभ्यासा
त्तत्त्वशुद्धिप्रविवेकाप्यायितबुद्धिर्गुणेभ्यो व्यक्ताव्यक्तधर्मेभ्यो विरक्त इ
ति तद्द्वयं वैराग्यं तत्र यदुत्तरं तज्ज्ञानप्रसादनमात्रं यस्योदये प्रत्युदितख्या
तिरेवं मन्यते प्राप्तं प्रापणीयं क्षीणाः क्षेतव्याः क्लेशाः छिन्नः श्लिष्टपर्वा भवसंक्र
मो यस्याविच्छेदाज्जनित्वा म्रियते मृत्वा च जायते इति ज्ञानस्यैव पराकाष्ठा
वैराग्यं एतस्यैव नान्तरीयकं कैवल्यमिति पुराणी प्रवृत्तिः सर्वोत्पन्नमस
क्रमितीत्थं विविक्तमादिसर्गात्प्रभृति लिंगस्य संसरणायतो यस्मात्पुरु
षात्प्रवृत्ता विस्तारं प्राप्ता तमेवाद्यं पुरुषं पुरुषोत्तमं परमात्मस्वरूपमहमा
त्मा प्रपद्ये तेन सहैकीभवामीति ४

रामकंठीटीका

यदेवं यत्त्वानतिपादितस्वरूपं देवतानां क्लेशानिमित्तकर्मानुरूपपरिपाका
[illegible]धिकरणं मूलभूतं तत्त्वानामकमस्थं तत्त्वार्थमात्रस्यत्वेन निरू
पितमतएव सर्वविरूपमूलं सद्बुद्धादिलिंगविविधं कृत्वाहत्वानि प्ररोहतस्या
मानि क्लेशायव मूलानिय स्यंततादृशाम संगशास्त्रेण [illegible]नायहस्वरूपया
[illegible]त्मवत्यागात्मनां विवेकपाषाणकषणवशाच्चितेन तीक्ष्णेन तत्कुठारे
णाच्छित्वा मूलतो द्विधाकृत्वा ततो नन्तरं पुनः पुनः प्रतिपादितस्वरूपप
दनिरुत्तरं धाम ममागमन्वेषणीयं कीदृशं यस्मिन्प्राप्तो योगी भूयो न निवर्त
ते पुनः संसारवर्त्मनि नाविर्भवेत् अकृत्रिमस्वभावविश्रान्तिलक्षणं मोक्षम
वाप्नुयात् यस्मादेतस्मिन्नेव परप्रकाशावरणहेतो महति विघ्ने यथोक्तस्व
रूपेण विहते सति योगी यदेतदुक्तमवधानविक्षेपाद्योगी प्राप्नुयात्स एव प
रमः पुरुषः परमकारणं परमात्मा ततस्मिन्नदं प्राप्ते परं पुरुषं प्रपद्ये तत्सा
मापन्नो भवेद्योगीत्यर्थः कं तं परं पुरुषं प्रपद्ये यतो यस्मादेकस्मात्सर्वकार
णभूतात्पुराणी प्रवहमानत्वाच्चिरंतनी प्रवृत्तिर्यथा प्रतिपादितजगत्क्रीड
नकनिर्माणात्मिका क्रियाप्रवृत्ता इत्थमवभासमानत्वात्प्रकर्षेण सृता
गता व्यापिनी संवृत्तेत्यर्थः किमुक्तं भवति यदेव परपदप्राप्तिलक्षणपर
मात्मस्वभावविश्रान्तिरुपजायते तदेव तदिच्छामात्रैककारणत्वं जगद्वै
चित्र्याभासस्य योगिनः प्रतिपद्यते तएव ४

लासिकी [illegible]टीका

गी॰ टी॰ ४

९८

ततस्तस्मादीश्वरात्तत्पदं मोक्षरूपं प्रशान्तं पदं परिमार्गितव्यं याचितव्यं
किं तदिति विशेषेणाह यस्मिन्पदे गताः संतो न निवर्तन्ति संसारे भूयो ना
वर्तन्ते तेनान्तकेनापि अनुपलब्धस्वरूपादीश्वरात्कथमित्याह त्वावहपदया ।
द्यापयेत्यतः कार्यलिंगेन तमन्वमाप्यया च नप्रकारमाह तमेवेति तमे
वाद्यं पुरुषमीश्वररूपं प्रपद्ये शरणं व्रजामि तं कमित्याह यतो यस्मादीश्वरा
त्पुराणी चिरन्तनी संसारप्रवृत्तिः प्रसृता निर्गत्य विस्तृतिमापन्ना

पंचोले टीका

ततः पश्चात्तदैश्वरं पदं परिमार्गितव्यं ज्ञातव्यं यस्मिन्गताः प्राप्ताः ।
प्रतिष्ठाः भूयः पुनरपि संसारे यन्न निवर्तन्ते परिमार्गस्य प्रकारमाह
तमेवेति परमात्मवाच्यमाद्यं पुरुषमहं प्रपद्ये तच्छरणागतो भवामि
इति ज्ञेयं यतः संसारवृक्षस्य प्रवृत्तिः पुराणी चिरन्तनी प्रसृता निः
सृता ४ ॥

इति वीरमसिद्धोयिनी ॥

तत इति ततो यत्नवैराग्याभ्यासाभ्यामनन्तरं तत्पदमिति तद्यथा
वर्णाश्रमस्यानुष्ठेयत्वेन प्रसिद्धं पदं व्यवसितिर्ज्ञानस्थानलक्षणं त्रि
वस्तुविषयत्वप्रमाणमनात्पदं वस्तु स्वधर्मरूपं परिमार्गितव्यमन्वेष्ट
व्यमतितीक्ष्णेन यत्नेनान्वेषणीयमिति यावत्, तथा च श्रुतिः सोऽन्वे
ष्टव्यः स विजिज्ञासितव्य इति अस्यार्थः स्वस्ववर्णाश्रमोचितो धर्मो
ऽन्वेष्टव्योऽन्वेषणीयो विजिज्ञासितव्यो विशेषेण संदेहराहित्येन ज्ञात
मिष्टव्य इति यस्मिन्निति अत्र निमित्तसप्तमी यत्पदं स्वधर्मवस्तु
निमित्तीकृत्य गता गतप्राणाः त्रिविधप्रवीणभूयः पुनर्न निवर्तन्ते
नावर्तन्ते सम्यक्पालितस्वधर्माणां यत्नवैराग्याधिकारिणां निष्कल्म
षत्वात्परमपदाधिगतेन पुनः संसारावृत्तिर्भवतीत्यर्थः तमेवाद्यं
श्रुतिरप्याह न स पुनरावर्तते इति अतः स्वधर्मनिष्ठं नश्रेय इति पूर्वं

यदुक्तं तदुपपन्नं भवति कथं परिमार्गितव्यमित्यपेक्षायां
भवति तमेवेति आद्यं भवमाद्यं पुरुषं सर्वस्य यन्नैर्वेदस्य वी
जभूतं प्रपद्ये तदनुशिष्टानुष्ठानेन संसेवे भगवतानानावता
रेषु साधवः परित्राता असाधवो नाशिता दुष्टवालिप्रविषी
र्णे चाखर्वगर्वं पुनर्मर्यादामवापितमित्यस्मान्प्रति च तदेवा
नुशिष्टमतो ह्यमपितदनुष्ठानेन भगवंतं संतोष्येइति यन्न
वैदवीनभूतत्वमेव विवृणोति यत इति यतो यस्मादाद्यपु
रुषात्पुराणी विवस्वन्तमारभ्याद्ययावदद्यकालीनाप्रहति
र्यन्नवैदमयी प्रसृता परंपरोपदेशेन प्रसारंगता अयमभि
प्रायः भगवतास्मान्प्रति यन्नवैदस्य इदं स्वर्गापवर्गभोग्य
यानुशिष्टमस्माकं च तदवश्यमनुष्ठेयमित्येवं मां प्रपन्नाः त
त्रिषु प्रवर्तास्वधर्ममार्गगणाद्योपयुक्ता अप्रपूर्णकामा मां ततस्ते
एवं यदि विपर्यये पुनस्ते स्वधर्मं निमित्तीकृत्य विगतामवोन पुनः
संसारायावर्त्तते इति ४॥

मधुभाष्य

८॥

भाषाअनुवादटीका

तदनन्तर संसारके मूल कारण स्वरूप तत्वदसे कहे जाते जिस ईश्वरपद को अन्वेषण करनाउचित हैं सोपद कैसाहै इस अपेक्षापर कहते हैं कि जहां जायकर फेर और संसार आवर्तन कहे आवागमन होना नहीं और भगवतपद ढूंढने की रीति कहते है कि जिससे इस पुराने संसार की प्रवृत्तिभई है उसी आदिपुरुषके शरणागत होते हैं इसीतरह एकान्त भक्तिके द्वारा ढूंढे ४

चौपई

ताते सोपद लषणो योग्य यामें जाय न ह्वैं फिरलोग
आदिपुरुषकी शरणजुहोई प्रवृत्तिपुराणी जासें होई ४॥

निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनि
वृत्तकामाः द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छं
त्यमूढाः पदमव्ययं तत् ५

शांकरभाष्य टीका १

कथंभूतास्तत्पदं गच्छंतीत्युच्यते निर्मानेति निर्मानमोहा मान
श्च मोहश्च मानमोहौ तौ निर्गतौ येभ्यस्ते निर्मानमोहाः मान
मोहवर्जिताः जितसंगदोषाः संग एव दोषः संगदोषः जितः
संगदोषो यैस्ते जितसंगदोषा अध्यात्मनित्याः परमात्मस्वरू
पालोचने नित्यास्तत्पराः विनिवृत्तकामाः विशेषतो निर्लेपेन नि
वृत्ताः कामा येषां ते विनिवृत्तकामा यतयः संन्यासिनो द्वंद्वैः प्रि
याप्रियादिभिर्विमुक्ताः सुखदुःखसंज्ञैः परित्यक्ता गच्छंत्यमू
ढा मोहवर्जिताः पदमव्ययं तद्यथोक्तं ५

आनंदगिरिकृत टीका २

परिमार्गणपूर्वकं वैष्णवं पदं गच्छतां संज्ञानवतां प्रकाराः पूर्व
कं कथयति कथमित्यादिना मानोहंकारः मोहस्त्वविवेकः जि
तसंगदोषाः शत्रुमित्रसंनिधावपि द्वेषप्रीतिवर्जिता इत्यर्थः त
त्परत्वं श्रवणादिनिष्ठत्वं संन्यासिनो वैराग्यद्वारात्यक्तसर्वकर्माण
इत्यर्थः आदिशब्देन तद्धेतुग्रहः मोहवर्जितत्वमसक्तहेतुतः सं
जातसम्यग्दर्शित्वं ५

स्वामिकृत टीका ३

तत्प्राप्तौ साधनांतराणि दर्शयन्नाह निर्मानेति निर्गतौ मानमोहौ
अहंकारमिथ्याभिनिवेशौ येभ्यस्ते जितः पुत्रादिसंगरूपो दोषो यैः
अध्यात्मे आत्मज्ञाने नित्याः प्रतिष्ठिताः विशेषेण निवृत्तः कामो ये
भ्यः सुखदुःखहेतुत्वात्सुखदुःखसंज्ञानि शीतोष्णादीनि द्वंद्वा
नि तैर्विमुक्ता अत एवामूढा निवृत्ताविद्याः संतः तदव्ययं पदं
वैष्णवं गच्छंति ५

पिशाचभाष्य टीका ४

श्री॰
गी॰ टी॰
५॰

३१

क्तं चैतत्कृतया जितसंगदोषाः जितः संगो विषयसंकल्पस्तएव दोषः जितः संगदोषो यैः ते जितसंगदोषाः विषयसंकल्परहिता इत्यर्थः अध्यात्मनित्या आत्मज्ञाननिरताः विनिहतकामाः त्यक्तकामाः द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैः सुखादिशब्दवाच्यैः गच्छंति अवश्यं भवंति अमूढाः विवेकिनस्तत्तद्वैसव्वंपदंमव्यविनाशि ५

रामानुजभाष्य टीका ५

निर्मानेति एवं मां शरणमुपगम्य निर्मानमोहा निर्गतमोहा अनात्मन्यात्माभिमानरहिता जितसंगदोषाः जितगुणमयभोगसंगाख्यदोषाः अध्यात्मनित्याः ... आत्मनियतत्वेन तदध्यात्मे आत्मज्ञाननिरताः विनिहतनाहितरकामाः सुखदुःखदुःखसंज्ञैर्द्वंद्वैर्विमुक्ताः अमूढाः आत्मानात्मस्वभावज्ञाः तदव्ययंपदं गच्छंति अनवच्छिन्नज्ञानाकारमात्मानं यथावस्थितं प्राप्नुवंति मां शरणमुपगतानां मत्प्रसादादेवैताः सर्वाः प्रहृतयः सुशकाः सिद्धिपर्यंता भवंतीत्यर्थः ५

अभिनवगुप्तकृत टीका ६

अनेन शास्त्रांतरेषूपदृश्यते अस्यार्थः सर्वं सर्वोपास्तनीयं अस्मादिति तस्य भगवत्सुशोपासानाम ... मिमच्यते मूलं प्रशांते रूपंतत्तद्धैहि निबन्धनं तत्त्वामि: छंदांसि प्रणीतानि एवं यथा प्रहृतस्य मानत्वफलत्वरसनात्तदयः पर्णाः सूच्यंते एवं वलत्रतस्य वेदोपलक्षितशास्त्रात्मिका प्रतीतिरित्याख्यायते गुणैः सत्वादिभिः प्रहृद्धादेवादिस्थावरांततया तस्य च शुभाशुभात्मकानि कर्माणि पल्लवमूलानि तंबिस्तेति विशेषक्रियाभिधीयमानासाम प्रवादत्रविशेषणपदमुपायते देहीभिश्च ध्यानतपूजादिविधिवत् तेनापोह्यछानिमूलानस्याच्छिंद्यादिति तत्पदं प्रशांतं अव्ययं पदं तदेव ५

परमार्थप्रपा टीका २

अथ यत्नोतिमुक्ता इति भूतार्थप्रकाशत्वाह निर्मानमोहा इति निर्गतौ मानमोहौ अहंकारमिथ्याभिनिवेशौ येभ्यः जितः पुत्रादिसं

सर्वतो॰

गद्वेषो येस्ते अध्यात्मज्ञाने नित्याः परिनिष्ठिताः विशेषेण निवृत्तः
कामो येभ्यस्ते सुखदुःखसंज्ञानि शीतोष्णादीनि तैर्विमुक्ताः एवं
विधास्तदव्ययं पदं गच्छंतिनामे ५

वनमाली टीका ५

परिमार्गणेसाधनांतरमाह निर्मानेति मानो हंकारो गर्वः मो
हस्त्वविवेको विपर्ययो वा ताभ्यां निर्गतानिर्मानमोहाः तौ निर्ग
तौ येभ्यस्ते वा तथा जितसंगदोषाः प्रियाप्रियसन्निधावपि रागद्वे
षवर्जिताः अध्यात्मनित्याः परमात्मस्वरूपालोचनतत्पराः विनि
वृत्तकामा विशेषतो निवृत्ताः कामा भोगाभिलाषा येषां ते द्वंद्वैः
शीतोष्णक्षुत्पिपासादिभिः सुखदुःखसंज्ञैः सुखदुःखहेतुत्वा
त्सुखदुःखनामकैः विमुक्ताः इति अमूढाः रजस्तमोरहिताः ज्ञान
रूपाः वैविध्यरहिता इत्यर्थः एतादृशास्तदव्ययं पदं गच्छंति ५

ऊसमवैजयंती टीका ५

ननु येत्वव्यक्तं प्राप्नुवंति ते त्वव्यक्तमनसो जनाः किं लक्षणा भवंती
ति चेत्तत्राह निर्मानमोहा इति मानः सत्कारजन्यो गर्वः मोहो मिथ्या
भिनिवेशस्ताभ्यां निर्गताः अनात्मन्यात्माभिमानरहिता इत्यर्थः
जितसंगदोषाः जिता गुणामयभोगसंगाख्याः प्रियभाषादिलिंहलक्ष
णा वा दोषा यैस्ते तथा निर्मानमोहा जितसंगदोषा इत्येकपदं वा अ
जितस्य श्रीकृष्णस्य संगस्तस्य निरूपणं तस्मिन्ये दोषा विघ्नकारिणस्ते
जितसंगदोषा अतएव निर्गता मानमोहा जितसंगदोषा येभ्य
स्ते यद्वा मानमोहाभ्यामजितसंगं कृष्णप्रपन्नं जनं दृष्ट्वा ये ति
रस्कुर्वंति निंदंति वेति [illegible] मानमोहा जितसंगदोषा येभ्यस्ते
न प्रत्यहं नरदेवोपासकास्तेनिर्गताः हरीकृता येस्ते तथा कृष्णान
न्यभक्ता इत्यर्थः यद्वा अजितसंगे संयोगं ददातीत्यजितसंगदात
इकिस्तामोषन्ति दहंतीति शब्दार्थे विषयाः मानमोहाभ्यामजि
तसंगदोषाः मानमोहाजितसंगदोषाः निर्गतास्ते येभ्यस्ते तथा
यद्वा निर्गतौ मानमोहौ येभ्यस्ते तथा आसमंताज्जिताः प्राकृत
गुणविषयसंगापवदोषा यैस्ते तथा ते वने वने तथा अध्यात्मनि

त्याः आत्मनि पदृज्ञानेन तदध्यात्मं तस्मिन्नित्या निरता यद्वा अध्यात्मं
स्वपरात्मनि विषयको विमर्शः स नित्यो नित्यकर्मव्यो येषां ते त
था विनिवृत्तकामाः विशेषेण निवृत्ताः आत्मज्ञानेन कामा येभ्यो
वा ते तथा पकं पदं वा अध्यात्मनित्यास्ते आसमंताद्धि निवृत्तका
मास्तेन तथा यद्वा एवासहदेवे विशेषेण निवृत्ता अर्पिताः कामा अ
भिलाषा येस्ते तथा अयद्वा सहदेवाद्धि निवृत्ताः कामा येषां ते तथा
वा ते चते च तथा शीतोष्णादि निमित्तकैः सुखदुःखसंज्ञैः सुखानि
च संज्ञा नाम येषां ते द्वंद्वैर्विमुक्ता यद्वा सुखदुःखानां संज्ञा सम्य
क्ज्ञानं येभ्यस्ते द्वंद्वैः शीतोष्णादिभिर्विमुक्ताः अतएव अमूढाः
मोहशून्याः प्रपत्त्यभिज्ञा इत्यर्थः जनाः अव्ययं जन्ममरणादिष
ड्विकारशून्यं तत्पदं प्रकृतिगुणसंबंधरहितं ज्ञानेकाकारं शु
द्धमात्मस्वरूपं प्राप्यमस्वरूपं गच्छंति प्राप्नुवंति मच्छरणाश्र
मानो मत्प्रसादादेव मत्प्राप्तिपर्यंताः निर्मानमोहादिलक्ष
णाः सर्वाः प्रवृत्तयः सुलभा भवंतीत्यभिप्रायः ५

+परिमार्गणपूर्वकं वैस्नवं पदं गच्छंतामंत
राणहू ॥

मधुसूदनी टीका ९

+मानोहंकारो गर्वः मोहस्त्वविवेको विपर्ययो वा ताभ्यां निष्क्रा
ता निर्मानमोहाः तौ निर्गतौ येभ्यस्ते वा तथा अहंकाराविवे
काभ्यां रहिता इति यावत् जितसंगदोषाः प्रियाप्रियसन्निधा
वपि रागद्वेषवर्जिता इति यावत् अध्यात्मनित्याः परमात्मस्वरूपा
लोचनतत्पराः [illegible] द्वंद्वैः शीतोष्णक्षुत्पिपासादिभिः
सुखदुःखसंज्ञैः सुखदुःखहेतुत्वात्सुखदुःखनामकैः सुखदुःख
संसर्गैरिति पाठांतरे सुखदुःखाभ्यां संगः संबंधो येषां तैः सु
खदुःखसंगैर्द्वंद्वैर्विमुक्ताः अमूढाः वेदांतप्रमाणसंजात
सम्यग्ज्ञाननिवारितात्मज्ञानाः तदव्ययं यथोक्तं पदं गच्छंति
[illegible] ५

^विनिवृत्तकामाः विशेषतो निरवशेषेण निवृत्ताः कामा विषयभोगा येषां ते विवेकवैराग्यद्वारा त्यक्तसर्वकर्माण इत्यर्थः [illegible]

^एव

^परित्यक्ताः

सदानंदी टीका ॥

नीलकंठीटीका

एवमैकांतिकसुखस्याच्छादकेसंसाराश्वत्थेतच्छेदकमसंग॰
शास्त्रंचोक्त्वातस्यसुखस्यप्राप्तावधिकारिणंतस्यस्वरूपंचाह द्वाभ्यां
निर्मानेति मानोदर्पः मोहोविपर्ययस्तद्रहिताः निर्मानमोहाः जित
संगःकर्ताहमित्यभिमानः दोषोरागादिस्तेयैस्तेजितसंगदोषाः अध्या
त्मआत्मनिनित्याःनिष्ठावंतःआत्मध्यानपराइतियावत् विनिवृत्तका
माःत्यक्तसर्वपरिग्रहाः द्वंद्वैःसुखदुःखैरित्युपलक्षणंशीतोष्णादीनाम
पि तैर्विमुक्तास्तितिक्षावंतइत्यर्थः अमूढाःविद्ययाऽविद्यानाशंकृत
वंतः तत्पदंअव्ययंअपुनरावृत्तिंगच्छंति ५

आनंदीटीका

मानोगर्वःमोहोनात्मन्यात्मज्ञानंताभ्यांनिर्गताःअतएवजितःसंगस्य
पुत्रवित्ताद्यासक्तेर्दोषोयैःअध्यात्मनित्याःसदापरमात्मज्ञानैकनिष्ठाः
विनिवृत्ताज्ञानाभ्यासाद्विच्छिन्नाःकामाविषयस्पृहायेषां अमूढाःस
त्त्वोद्रेकादभिभूतरजस्तमसः तदव्ययंपदंपरमेश्वरसायुज्यंगच्छंतितत्प
दंलक्षयति ५

रामकंठीटीका

अतएव तदव्ययंनित्यत्वादपक्षयादिरहितंपदंस्वाभाविकात्मलक्षणंस्थानम
मूढाःप्रत्यग्दिनज्ञानशालित्वात्प्रबुद्धागच्छंतिप्राप्नुवंति तादात्म्यलभं
तेइत्यर्थः कीदृशाःसंतोनिर्मानमोहाःअनात्मादिष्वात्मादिप्रत्ययलक्ष
णाभिमानमयान्मोहान्निष्क्रांतायतोजितसंगदोषाःसंगआसक्तिर॰
नात्मादौवस्तुन्यात्माभिमानेनगाढनिमग्नचित्तत्वमेवदोषःसंसार
हेतुत्वात्सहृदयजितास्तिरस्कृतायैस्तेतथाविधाःकथंभूतैःसजेयइ
तिहेतुगर्भविशेषणमाह अध्यात्मनित्याइति अध्यात्ममात्मनिपार॰
मार्थिकेस्वस्वभावेनित्याःसदातदेकनिष्ठाइत्यर्थः कथमध्यात्मनित्य
त्वंस्यादितिपूर्ववद्विशेषणंविनिवृत्तकामाइति कामयन्तइतिकामा
ऐहिकामुष्मिकाइष्टाःशब्दादयोभोगाविनिवृत्तास्तत्त्वज्ञानाभ्यासा
द्विच्छिन्नास्तेयेषांतेतथाविधाःकामाहिवाह्यविषयान्प्रतिचित्तमाक
र्षयंतोध्यात्मनिष्ठतांविघ्नयंत्यतोविनिवृत्तकामाअध्यात्मनित्याःस्युरतःके
विनिवृत्तकामत्वंचकथंस्यादितिपूर्ववद्विशेषणमाह द्वंद्वैर्विमुक्ताः॰

गी॰
टी॰
प॰

सुखदुःखसंज्ञैरिति द्वंद्वैः द्वन्द्वत्वस्य शीतोष्णजरामरणादिभिस्त
थैतद्विपरीतैरत्यभिह्लादादिभिरनित्यशरीराद्यहंकारनिबंधनैः क्ले
शैः सर्वैरेव सुखदुःखात्मकत्वाद्यभिमानैर्विमुक्ताः परिवर्जितास्ते हि
तथाविधा निवृत्तकामा भवंति तदयमत्र क्रमो विवक्षितो यद्भगवद
नुग्रहाविर्भूतविवेकजज्ञानत्वात्प्रबुद्धयोगिनो हेयोपादेयविवेकव
मबुद्धयो जायंते तेषां चाद्यात्मकत्वेन संवेद्यत्वमापन्नान्सर्वांस्वकृता
भावान्हेयत्वेनात्मतत्त्वं च यथाप्रतिपादितस्वरूपमुपादेयत्वेन निश्चि
न्वतो हृत्स्वात्मकत्वेन वर्तमानैः क्लेशैर्विमुच्यंते तेभ्यो निवृत्तास्ततो हि
यधर्मिणा सहजनित्यानंदमये स्वात्मन्येव नित्यावहिता भवंति तत
स्तेषु भावेषु प्रतिपादितोपपत्त्याशास्त्रीयकर्मपरित्यागे सति
सत्स्वपि मानेष्वपि शरज्जलदपटलेष्विव वायवो निसंगा भवंति ततश्च
निस्संगत्वान्निर्मला विक्षिप्ता विपर्ययप्रत्ययाः संतः परमात्मन्येव प
रमार्थसत्वे स्वप्रतिष्ठां हृत्प्रतीतयः परमं पदमाप्नुवंति कीदृशं तत् ५

+नतु तत्पदं केनचिद्विद्यामपीत्याशंक्याधिकारि
स्वरूपमुक्त्वैव बहूनां तत्प्राप्तिमार्गं करोति ॥

लासिकी [illegible]टीका

+मानो देहादिष्वात्मप्रतीतिर्मोहः स्वस्वरूपापरिज्ञानं ताभ्यां निष्क्रांताः स्व
स्वभावपरिज्ञानेन देहाद्यभिमानरहिताः तथा संगो विषयेष्वासक्तिर्जितः
संगरूपो दोषो यैस्ते तथाध्यात्मनित्या नित्यमात्मनि प्रतिष्ठा तथा विशेषे
ण निवृत्ताभिलाषाः एवमभ्यासतारतम्येन सुखदुःखसंज्ञैर्द्वंद्वैरहिताः
नन्वेवं तेषां जडत्वप्रसक्तिरित्याह अमूढाः प्रबुद्धाः एवंविधा अधिकारि
णस्तत्पदं नाशरहितं गच्छंति [illegible]
[illegible] ५

पंचोलीटीका

अथ पदप्राप्तौ साधनान्युपदिशति निर्मानेति निर्मानमोहाः
मानमोहाभ्यां निर्गताः जितसंगदोषाः संग एव दोषो जितो ये
पुत्रादिसंगदोषो यैस्ते जितसंगदोषाः अध्यात्मनित्याः परमा
त्मस्वरूपालोचनपराः विनिवृत्तकामा येषां ते द्वंद्वैः सुखदुः
खसंज्ञैः विमुक्ताः अमूढाः ज्ञानिनः तदव्ययं पदं ग
च्छंति ५ ॥

सम्यग्धर्मप्राप्तौ साधनान्याह निर्माणेति नमत्सम: कोप्य ऽ
न्यो योद्धेत्येवमात्मान: श्लाघ्यमान: मोह: स्वधर्मस्य गुह्या दे: ग
गादिप्रेम्णत्यागस्तौ मानमोहौ निर्गतौ येभ्यस्ते निर्मानमोहा:
स्वधर्मभूतोयं युद्धमार्गोव प्रथमनुष्ठेय इत्यत्र कात्मन: श्लाघा
केवलस्वधर्माद्या: प्रतिबंधरूतेत्वमतिनिश्चयवंतस्तथा जितसं
गदोषा: सज्जते कायवाङ्मनोभिरेभिरिति संगा विषयास्तेष
वहोषदेत्वा दोषा जिता: संगदोषा विषयदोषा यैस्ते जि
तसंगदोषा विषयान्यदित्यन्यस्वधर्मतत्परा इत्यर्थ: अध्या
त्मनित्या अधिअधिकोयमात्मा आत्मायत्नोयतितुद्धिनित्
नुष्ठानमनायत्नस्तस्मिन्यत्ने नित्या नित्यवर्तिनो धिकयत्नवं
त इतियावत विनिवृत्तकामा विनिवृत्तोस्तमित: कामपेपि
कोराज्यभोगादिलक्षण ऐहिक: स्वर्गापवर्गलक्षणोथ
मं प्राप्तिकामनया येषां ते विनिवृत्तकामा उभयलक्षणोपक
लेनिवृत्तस्पृहा इत्यर्थ: तथा सुखदु:खसंज्ञैर्द्वंद्वै: सुखैर्विमु
क्ता जयेमति सुखंमेभवेदन्यथा तदु:खमिति संकल्पवद्भि:
ता अमूढा मोहरहितास्तस्सर्वोक्तं नित्यंपदं स्वधर्मं वक्ष्य प्रा
प्नुवंतीतिभाव: यद्वानुष्ठितस्वधर्मोत्पन्नात्तत्पदं स्थानं वे
स्वधर्माप्राप्नुवंतीत्यर्थ: ५॥

मधुभाष्य

निर्मानेति स्वरूपं कथयति ५॥

34

भाषाअनुवादटीका

सोई परमेश्वर की प्राप्ति के विषय मे दूसरी उपाय देखावते हु
ये कहते हैं कि जिन मनुष्यों के मान अहंकार औ मिथ्या वस्तु
मे रुचि नही है अर्थात मानादि दूर हो गये हैं और जिनके पु
त्र स्त्री धन आदि से आशक्ति रूप दोष निवृत्त भये हैं और जि
न को आत्मज्ञान मे भली प्रकारसे निष्ठा है और जिनकी वासना
अच्छीतरह निवृत्त हो गई हैं और सुख दुख के हेतु रूप शीत उ
ष्ण हानि लाभ आदि द्वन्द्व से अच्छीतरह छूट गये हैं ऐसे जो ति
हन अविद्य कहे ज्ञानीजन हैं तेई अव्यय रूप को प्राप्त होते हैं ५

चोपई

मानमोह बिनजित संगदोषा अध्यातम नित विगत अभि
लाषा सुखदुखसंज्ञकद्वंद्व विमुक्त पंडित जात हैं जो अ
व्ययपद उक्त ५

35

नतद्भासयते सूर्योनशशांकोनपावकः यद्ग
त्वाननिवर्त्ततेतद्धामपरमंमम ६

शांकरभाष्य टीका १

तदेव पदं पुनर्विशिष्यते नेति तद्धामेति व्यवहितेन धाम्ना सम्ब
न्धः धाम तेजोरूपं पदं नभासयते सूर्य आदित्यः सर्वावभासनश
क्तिमत्वेपि सति तथा नशशाङ्कश्चन्द्रोन च पावकोनाग्निरपितद्
धाम वैष्णवं पदं गत्वाप्राप्य ननिवर्तन्ते यच्च सूर्यादिभिर्नभासय
ते तद्धाम पदं परमं विष्णोर्मम पदं यत्गत्वाननिवर्त्तन्तइत्युक्तं ६

आनंदगिरिकृत टीका २

तत्रैव पदं वेद्यं कर्त्तुरन्यत कर्मेति द्वैतापातनोऽवेद्यं वेदप्रमत्वना
त्प्रेप्सितिनत्वासिद्धिरित्याशंक्याह तदेति उक्तमनूद्यादित्यादीति य
द्गत्वेति ६

स्वामिकृत टीका ३

तदेवंगन्तव्यपदंविशिनष्टि नतदिति यत्पदंसूर्योदयःसर्वावभा
सकाःनप्रकाशयंति तत्प्राप्ययोगिनोननिवर्त्ततेतद्धामस्वरूपंपर
मंमम सूर्यादिप्रकाशाविषयत्वेनजडत्वेनोस्यादित्वदोषप्रसं
गोनिरस्तः सर्वावभासकोपिसूर्यस्तद्धामभासयितुंनसमर्थः सू
र्यस्तमायतिनिशिसर्वावभासकप्रदीपेवद्धोपितद्भासयितुमसम
र्थः द्वयोरभावेतिविद्योतकोऽसर्वविषयप्रकाशोग्निरपितद्धाम
भासयितुमसमर्थः तद्धामवैस्मवंपदंमत्वाप्राप्यननिवर्त्तते
पुनःसंसारिणोनभवंति ६

पिशाचभाष्य टीका ४

यन्मेपरंधामतन्नसूर्योनभासयते नापिशशांकःनापिपावक
स्तत्गत्वा योगिनोननिवर्त्तन्ते नहिपुनरागच्छन्तीत्यर्थः

रामानुजभाष्य टीका ५

नेति तदात्मयोतिर्नसूर्योभासयतिनशशांकोनपावकश्च यद्ग
त्वापुनःननिवर्त्तन्तेतत्परमंधाममपरमंज्योतिःममममदीयंआदि

ग्न्यादीनामपिप्रकाशकत्वेनास्यपरमत्वं आदित्यादीनांज्योतींषिनः
तानज्योतिषः प्रकाशकानितानमेवहिसर्वस्यप्रकाशकंवाग्न्यानि
तज्योतींषिविषयेंद्रियसंबंधविरोधितमोनिरसनद्वारेणोपकारका
णिअस्यचप्रकाशकोयोगः तद्विरोधिवानादिकमंनत्रिवर्तवोक्तं
भगवत्स्वपादमूलमसंगादियत्नात्वाष्मनेनिवर्तंतेतद्धाममपरम
ज्योतिर्ममहिभूतिभूतिभूतोममांशस्यस्यर्धेः ६

अभिनवगुप्तकृत टीका ६

सूर्यादीनांतत्रानवकाशः तेषांकालाद्यवच्छेदात वेद्यत्वात्क
रणोपकारकत्वात्‌ तस्यतदिक्कालानवच्छेदाद्देदकत्वात्कर
णप्रवर्तकत्वात्तदतीतत्वात्‌ ६

परमार्थप्रपा टीका ७

स्वपदंविशिनष्टिनतदिति तत्पदंपरब्रह्मसूर्यः शशांकः पा
वकोऽग्निर्वानभासयते नप्रकाशयतितस्यभासासर्वमिदंविभाती
तिश्रुतेः सूर्यादीनामपितत्प्रकाशभास्यत्वात्‌ यद्गत्वापियोगिनो
ननिवर्तंते नपरावर्तंतेतन्ममपरंधामेतिशेषः ६

वनमाली टीका ८

तदेवपदंविशिनष्टि नतदिति यद्देसर्वंपदंगत्वायोगिनोननि
वर्तंतेतत्पदंसर्वावभासनशक्तिमानपिसूर्योनभासयतेनश
शांकश्चनपावकोऽग्निर्भासयते अतः सूर्यादीनांप्रकाशनासाम
र्थ्यात्तत्राह तद्धामज्योतिः स्वयंप्रकाशमादित्यादिः सकलज्योतिः
प्रकाशकंपरमंप्रकृष्टंममवासुदेवस्यस्वरूपात्मकं राहोःशि
रइतिवद्भेदेषष्ठी नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतो
भांतिकुतोयमग्निः तमेवभांतमनुभातिसर्वंतस्यभासासर्वमि
दंविभातीतिश्रुतेः ६

ऊस्मवैजयन्ती टीका ९

कीदृशंतत्कृतत्वमपदमित्यपेक्षायामाहनतद्भासयतइतिसूर्यो
विषयेंद्रियसंयोगविरोधितमोनिरसनद्वारेणदिवसेसर्वंघट

पटादिवस्तुप्रकाशकोपितज्ज्योतिर्नभासयते

…कोपितज्ज्योतिर्नभासयतेतथा

शशांकोरात्रौतमोनिरसनद्वारावस्तुप्रकाशकोपितन्नभासय

तेतथापावकोभौमदिव्योदर्यादिरूपेणवस्तुप्रकाशकोपितं

न्नभासयतेमत्पदंयत्कृत्वाप्राप्यपुनर्यतःसकाशान्ननिवर्तन्ते

नेसंसारेनप्राप्नुवंतीत्यर्थः ममसर्वेश्वरस्यपरमंधामशक्तिविभू

त्यादिभिःसर्वोत्कृष्टेनज्ञानमपीमत्स्वरूपमदेशभूतत्वाद्धाम

स्वरूपंवामल्लोकंवाभवतीत्यर्थः सर्वेषांसूर्यादिज्योतिर्गणा

नामहमेवप्रकाशकस्तेनमत्प्रकाश्यमता अतःप्रकाशकंमा

दीपकंघटपटादयश्चनप्रकाशयंतीत्यभिप्रायः ६

मधुसूदनी टीका ६

^तदेवंयदंगत्वानविशिनष्टि॥

^यद्गत्वेत्येवंपदंगत्वायोगिनोननिवर्तन्तेतत्पदंसर्वावभासन

शक्तिमानपिसूर्योनभासते सूर्यास्तमयेपिचंद्रोभासको

दृष्टस्तत्राहनशशांकः सूर्याचंद्रमसोरुभयोरप्यस्त

मयेग्निः प्रकाशकोदृष्टस्तत्राह नपावकः भासतेइत्युभय

त्रापिसंबध्यते कुतः सूर्यादीनांतत्प्रकाशनसामर्थ्यमित्यत

आह तद्धामज्योतिःस्वप्रकाशमादित्यादिसकलजडज्योतिर

वभासकंपरमंप्रकृष्टंममविष्णोःस्वरूपात्मकंपदं नहियो

यद्भास्यःस्वस्वभासकंनभासयितुमिष्टेतथाचश्रुतिः नतत्र

सूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः तमे

वभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीतिपदे

नतत्पदंवेद्यमवेद्यंवा आद्येवेद्यमिन्नवेदितृसापेक्षत्वेन

द्वैतापत्तिर्द्वितीयेत्वःपुरुषार्थत्वापत्तिरित्यपास्तं अवेद्यत्वेस

त्यपिस्वयमपरोक्षत्वान्न नचावेद्यत्वं सूर्याद्यभास्यत्वेनोक्तं

सर्वभासकत्वेनतुस्वयमपरोक्षत्वं यद्गत्वादिनाग्निनेनेत्यत्रव

इति एवमुभाभ्यांश्लोकाभ्यांफलेनहेतुनाचव्याख्यातमिति

द्रष्टव्यं ननुयद्गत्वाननिवर्तन्तेइत्ययुक्तं यदिगत्वातिनिवर्तन्ते

श्री॰
गी॰ टी॰
पं॰

37

तएवस्वर्गवत् अथनावर्त्तंते नहिंनगच्छंति तेनगत्वेतिननिवर्त्तंते
इतिचपरस्परविरुद्धं सर्वेक्षयांतानिचयाः पतनांताःसमुच्छ्र
याःसंयोगाविप्रयोगांतामरणांतंहिजीवनमितिहिशास्त्रेलो
केचप्रसिद्धंअनात्मप्राप्तिः पुनरावृत्तिपर्यवसानानतुआत्मप्रा
प्तिरितिचेत् नसुषुप्तौसतासोम्यतदासंपन्नोभवतीतिश्रुतिप्र
तिपादितायाअप्यात्मप्राप्तेः पुनरावृत्तिपर्यंतत्वदर्शनात् अ
न्यथासुषुप्तस्यमृतस्येवपुनरुत्थानंनस्यात् तस्मादात्मप्राप्तौग
त्वेतिनोपपद्यते तस्यौपचारिकत्वेपुनिवृत्तिर्नोपपद्यतेइत्येव
प्राप्तेब्रूमः गंतुर्जीवस्यगंतव्यब्रह्माभिन्नत्वाद्गत्वस्यौपचारिके
अज्ञानमात्रव्यवहितस्यतस्याज्ञानमात्रेणैवप्राप्तिव्यपदेशात्
यदिब्रह्मणः प्रतिबिंबोजीवस्तदायथाजलप्रतिबिंबितसूर्य
स्यजलापायेबिंबभूतसूर्यगमनंततोनावृत्तिश्च यदिचबुद्ध्य
वच्छिन्नोब्रह्मभागोजीवस्तदायथाघटाकाशस्यघटापायेमहा
काशंप्रतिगमनंततोनावृत्तिश्च तथाजीवस्याप्युपाध्यपाये
निरुपाधिस्वरूपगमनंततोनावृत्तिश्चेत्युपचारादुच्यते एक
स्वरूपत्वादेवधर्मस्यचोपाधिनिवृत्यानिवृत्तेः सुषुप्तौत्वज्ञाने
स्वकारणेभावनाकर्मपूर्वप्रज्ञासहितस्यांतःकरणस्यजीवोपा
धेः सूक्ष्मरूपेणावस्थानात्तस्यवाज्ञानात्मनस्तद्भवःसंभवति
ज्ञानादज्ञाननिवृत्तौतुकारणाभावात्कुतःकार्योदयःस्यादज्ञा
नप्रभवत्वादंतःकरणाद्युपाधीनां तस्माज्जीवस्याहंब्रह्मास्मीति
वेदांतवाक्यजन्यसाक्षात्कारादहंब्रह्मेत्यज्ञाननिवृत्तिर्गत्वेत्यु
च्यते निवृत्तस्यचानाद्यज्ञानस्यपुनरुत्थानाभावेनतत्कार्यसं
साराभावान्ननिवर्त्ततइत्युच्यतइतिनकोपिविरोधः जीवस्यतु
पारमार्थिकंस्वरूपंब्रह्मैवेत्यसकृदावेदिततदेतत्सर्वंप्रतिपा
द्यतेउत्तरेणग्रंथेन तत्रजीवस्यब्रह्मरूपत्वादज्ञाननिवृत्यात्स्व
रूपंप्राप्तस्यततोनप्रच्युतिरितिप्रतिपाद्यते ममैवांशइतिश्लोका
र्धेन सुषुप्तौतुसर्वकार्यसंस्कारसहिताज्ञानसत्वात्ततःपुनःसं

सारेजीवस्येतिमनःषष्ठानींद्रियाणीतिश्लोकार्धेनप्रतिपाद्यतेतेन
तस्तस्यवस्तुनोसंसारिणोपिमाययासंसारंप्राप्तस्यमंदमतिभिर्दे
हतादात्म्यप्रापितस्यदेहाद्व्यतिरेकःप्रतिपाद्यते शरीरमित्या
दिनाश्लोकेन श्रोत्रंचक्षुरित्यादिनानयथायथंस्वविषयेष्विंद्रि
याणांप्रवर्तकस्यतेभ्योव्यतिरेकःप्रतिपाद्यते एवंदेहेंद्रिया
दिविलक्षणामुत्क्रांत्यादिसमयेस्वात्मरूपत्वात्किमितिसर्वे
नपश्यंतीत्याशंकांविषयविक्षिप्तचित्तादर्शनयोग्यमपितेनप
श्यंतीत्यतरमुच्यते उत्क्रामंतमित्यादिनाश्लोकेन तेज्ञानचक्षुषः
पश्यंतीतिविहितयत्नतोयोगिनइतिश्लोकार्धेन विमूढानानु
पश्यंत्येतद्विहितयत्नेनापीतिश्लोकार्धेनेतिपंचानांश्लोकानां
संगतिः [illegible] ८

नीलकंठीटीका

ननुयदितदूर्ध्वंपदंगच्छंतितर्हिततःपातोऽप्यवश्यंभावीपतनां
ताःसमुच्छ्रयाइतिन्यायात् नतद्यस्मिन्गतानानिवर्ततीत्य
नुपपन्नमित्याशंक्यतस्यपदस्यस्वरूपमाह नतदिति नतत्पदं
सूर्योनभासयति रूपादिहीनत्वेनचक्षुरयोग्यत्वात् एतेनसर्वे
षांबाह्येंद्रियाणांनिवृत्तिः यद्धिरूपवच्चक्षुर्योग्यंतत्सूर्येणचक्षु
रनुग्राहकेणभासयितव्यंनतथेदमित्यर्थः नशशांकश्चंद्रोऽपिभास
यति यन्मनोग्राह्यंवस्तुतच्चंद्रेणमनोनुग्राहकेणभासयितव्यंन
तथा यन्मनसानमनुतइतिश्रुत्यातस्यमनोग्राह्यत्वनिषेधात्
नापिपावकःभासयतियद्धिवाचावाच्यंतत्तदनुग्राहकेणपाव
केनभासयितव्यंनतथा यद्वाचानभ्युदितमितिश्रुत्यातस्यवाग्
गोचरत्वनिषेधात् नचक्षुषागृह्यतेनापिवाचेत्यादिश्रुत्यंतरंच
यतश्चेदंमनोवाचामगम्यंतेनस्थूलसूक्ष्मकारणप्रपंचातीतंप्रत्य
गद्वयं नांतःप्रज्ञंनबहिःप्रज्ञंअस्थूलमनणुइत्यादिश्रुतिभिःसर्व
विशेषरहितंयच्छ्रुतिपादितंतत् ममपरमंधाममहनिरूपज्ञानादपर
मादन्यज्ज्योतिश्चिन्मात्रं ममेतिषष्ठीराहोःशिरइतिवदुपचारात्
मदभिन्नंज्योतिःस्वयंप्रकाशमित्यर्थः अतएवयद्गत्वाप्राप्यज्ञात्वे
त्यर्थः ननिवर्तंतेनिवृत्तिकारणस्यमूलाज्ञानस्याभावात् एवंव्या
ख्यानेहियदाह्येवैषएतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयंप्रति
ष्ठांविंदते अथसोऽभयंगतोभवतीतिश्रुत्यर्थोऽनुगमोदृश्ये
अदृश्येइतिदृग्योग्यत्वेनसूर्यभास्यत्वमेतद्दस्यते अनात्म्येआ
त्मनोमनसोयोग्यंआत्म्यंतदस्यनअनात्म्येइतिमनसोऽप्ययोग्यत्वे
नचंद्रस्याभास्यत्वंनिरस्यते अनिलयनेनिलीयतेऽस्मिन्सर्वंस्थूल
सूक्ष्ममितिनिलयनंकारणंतद्भिन्ने अतएवानिरुक्तेनिर्वचना
योग्येवाचामगोचरइत्यर्थः तेनपावकाप्रकाश्यइतिसिद्धं यत्तु
सूर्याद्यप्रकाश्यमर्चिरादिमार्गगम्यंसत्यलोकादप्युपरितनमप्रा
कृतंवैकुंठपदंनित्यंदेशांतरेऽस्तितद्गत्वापुनर्ननिवर्ततइतिव्याचक्ष
ते तेषांनरूपमस्येहतथोपलभ्यतइतिदृश्यस्यतुच्छत्वादेवनाह
शस्यापितुच्छत्वमपरिहार्यंदृश्यत्वाविशेषात् तस्माद्यथाकृतमेव

श्लोकार्थः ॥

आनंदीटीका

अयंपरमात्माहिसूर्यादीनांभासकः नततेरयंभास्यतेयथादीपैः सूर्यादयस्त्वर्थः येननिवर्ततेतांलक्षयति ॥

रामकंठीटीका

तत्पदंसूर्यादयोनभासयंतितेषांहिप्रकाशकारणात्तरलव्यजात्मकेचेतनाचेतनभावाः भिव्यंजकत्वेनप्रकाशकमनमप्रकाश्यसंवित्प्रकाशात्मनापरमपदप्रतिपादितेनस्वस्वभावेन परमात्मेच्छामात्रेणभासयत्प्रकाशयत्यतः सूर्यादीनांकथंतत्पदंप्रकाशयंस्यादथतदेवममयथोक्तस्वरूपस्यपरमकारणस्यपरमेश्वरस्यधामस्थानेयत्प्राप्यतत्समापद्ययोगिनोननिवर्ततेनपुनःसंसारभ्रमिमनुजीववदितिरति नतुस्वेच्छामात्रेणसर्वभावप्रकाशकेनप्रकाश्यवित्प्रकाशैकस्वभावेपरमात्मन्येवैकस्मिंस्तत्वेपरमार्थसत्वेनव्यवस्थितेप्रतिशरीरेसुखादिधर्मयोगिनोन्योन्यभिन्नाःकइमेजीवानामयएषोक्षमिंद्रियवर्गस्यस्वविषयेप्रवृत्तिनिवृत्तीलक्षयन्तीतिसंशयानान्प्रतिजीवविवेकार्थमाह

लासिकी टीका

+ नतुनदितिसर्वनामपदेनप्रसिद्धंवेऊंतदादिपदंस्यादित्यतआह ॥

+ सूर्यादयस्तत्पदंवैऊंतदादिपदवन्नप्रकाशयंति नतुतत्पदंकिंत्वत्स्वरूपाद्व्यतिरिक्तंयेन तत्पदस्यात्मनश्चभेदोनिरुच्यतेइत्याशंक्याह यत्पदंप्राप्यननिवर्ततेपुनःसंसारसरणिनालभंते तन्ममेश्वरस्यपरमंधामोत्कृष्टस्वरूपं राहोःशिरइतिवद्धावनिकोत्रभेदेनतात्विकः [illegible]

[illegible] ॥

पंचोलेटीका

तदेवपदंविशेषतोदर्शयति नतदिति सर्वावभासकःसूर्यः । आदित्यस्तेनऊमवैलवंतेजोरूपंपदंभासयितुमसमर्थः प्राशांकोसर्वावभासकःशशांकोपितन्नभासयितुमसमर्थः द्वयोरभावेनिविडांधकारेसर्वविषयप्रकाशकोग्निरपितन्नभासयितुम

समर्थः यद्धाम वै सर्वं पदं प्राप्य गत्वा न निवर्तन्ते पुनः संसारि
णो न भवन्ति यच्च सूर्यादिभिर्न भासयते तद्धाम मत्स्वरूपं परं विष्णोः ६

रगावीभसमिद्धोधिनी

तदेव गन्तव्यं विशिनष्टि न तदिति सूर्यः सूर्योवभासकस्तत्पदं
स्वयमर्करूपं नावभासयते सूर्यस्यापि धर्मेणैव देदीप्यमानत्वश्र
वणाद्ध्यसौ विभास्य एव सूर्यः तथा शशांकोपि शीलिमांशुश्चंद्रोपि
तद्धर्मं न प्रकाशयति सूर्यचंद्रमसोरुभयोरप्यस्तमये ग्निः प्रका
शकोऽस्त्वित्याशंकायां न पावको न प्रकाशयति तद्व्यांतरवत
स्य स्वधर्मानुष्ठानरूपकर्मयोगानवदर्शनादिति भावः यद्धर्मस्य
ज्ञात्वा विदितं यथा गुरुरूपशास्त्रोपदेशमनुष्ठानेन प्राप्यापि गत्वा न
निवर्तन्ते न पुनः संसारिणो भवन्ति कर्मयोगिन इति शेषः तद्
धर्मस्य परमेश्वरस्य परममुत्कृष्टं सूर्यादीनामपि प्रकाशकं धा
म ज्योतिः स्वयंप्रकाशं सूर्यादिसकलजडज्योतिरवभासकं स्व
रूपात्मकं पदमित्यर्थः तथा च श्रुतिः न तत्र सूर्यो भाति न चंद्र
तारकं नेमा विद्युतो भांति कुतोयमग्निः तमेव भांतमनुभाति
सर्वं तस्य भासा सर्वमिदं विभातीत्यस्यार्थः तत्र धर्मे स्वयंज्योति
षि सूर्यो न भाति न चंद्रतारकं चंद्रश्च तारकाश्च तत् चंद्रतारकमि
ति समाहारद्वंद्वः तदपि न भाति चंद्रतारकादीनां सूर्यप्रकाशेन
प्रकाशकत्वश्रवणादिति इमा विद्युतोपि न भांति कुतोयमग्निः
तमेव भांतं धर्ममनु सर्वं सूर्यादिप्रकाशो भाति तस्य धर्मस्य भा
सा दीप्त्या न तदावरणेनेत्यर्थः सर्वमिदं विश्वं विभात्यनुष्ठितस्व
धर्मत्वादेवाप्रसमस्त्याशोभते इति ६॥

मधुभाष्य

न तदित्यादिना कर्षतीत्युक्ते जीवस्य स्वातंत्र्यं प्रतीतं तन्निवा
रयति ६॥

भाषाअनुवादटीका

अब उसी अव्यय पद को विशेष रूप से कहते हैं कि उस पद को सूर्य चन्द्र अग्नि भी प्रकाश नहीं कर सकते हैं और योगी जन जिस पद को प्राप्त होय फेरि संसार मे आवर्तन कहे गमनागमन नहीं करते हैं सोई धाम कहे तेज रूप हमारा स्वरूप है जहां सूर्यादि की गति नहीं तहां इव इन्द्रनदता कौन प्रसङ्ग है ६

दोहा

नहि तहां भासत सूर्यहि नहि शशी पावक जोय जहां जाय नहि फिर नहे परमधाम मम सोय ६॥

60

ममैवांशोजीवलोकेजीवभूतःसनातनः मनः
षष्ठानींद्रियाणिप्रकृतिस्थानिकर्षति ७

शांकरभाष्यटीका १

ननु सर्वाहि गतिरागत्यन्ता संयोगाविप्रयोगान्ताः इति प्रसिद्धं हि
कथमुच्यते तद्धामगतानां नास्ति निवृत्तिरिति शृणु तत्र कारणं म
मैवेति ममैव परमात्मनो नारायणस्यांशो भागोऽवयव एकदे
श इत्यनर्थान्तरं जीवलोके जीवानां लोके संसारे जीवभूतः भोक्ता
कर्तेति प्रसिद्धः सनातनः पुरातनः यथा जलसूर्यकः सू
र्यांशो जलनिमित्तापाये सूर्यमेव गत्वा न निवर्तते तथा अयमप्यं
शः तेनैवात्मना संगच्छत्येवमेव यथा वा घटाद्युपाधिपरिच्छिन्नो घ
टाद्याकाशः आकाशांशः सन् घटादिनिमित्तापाये आकाशं प्राप्य न
निवर्तते इत्येवमत उपपन्नमुक्तं यद्गत्वा न निवर्तन्त इति ननु निरव
यवस्य परमात्मनः कुतोऽवयव एकदेशोंऽश इति सावयवत्वे च वि
नाशप्रसङ्गोऽवयवविभागादिति नैष दोषोऽविद्याकृतोपाधिपरिच्छि
न्न एकदेशोंऽश इव कल्पितो दर्शितश्चायमर्थः क्षेत्राध्याये विस्तर
शः स च जीवो मदंशत्वेन कल्पितः कथं संसरत्युत्क्रामतीति चेदुच्य
ते मनः षष्ठानीन्द्रियाणि श्रोत्रादीनि प्रकृतिस्थानि स्वस्थाने कर्ण
शष्कुल्यादौ प्रकृतौ स्थितानि कर्षत्याकर्षति ७

आनंदगिरिकृतटीका २

तत्र प्रसिद्धिं प्रमाणयति संयोगा इति गमनस्यागमनान्तत्वप्रसिद्धे
रयुक्तं यद्गत्वेत्यादि इत्युपसंहरति कथमिति आक्षेपं परिहरति
शृण्विति भगवत्प्राप्तेर्निवृत्त्यन्तत्वाभावः समभ्यर्थः जीवस्य परांश
त्वेपि कथमुक्तदोषसमाधिरित्याशंक्य प्रतिबिम्बपक्षमादाय दृष्टा
न्तेन प्रत्याचष्टे यथेति अवच्छेदपक्षमाश्रित्य दृष्टान्तान्तरेणोक्तदोषस
माधिं दर्शयति यथा वेति आक्षेपसमाधिमुपसंहरति अत इति प
रस्य निरवयवत्वान्न देशत्वं जीवस्यायुक्तमिति शङ्कते नन्विति त
स्य निरवयवत्वं साधयति सावयवत्वे चेति वस्तुतो निरंशस्यापि परस्य

कल्पनया जीवोंऽशो भविष्यतीति परिहरति नैष दोष इति वस्तुतस्तु
जीवस्य नांशत्वं परमात्मतावन्मात्रतया दर्शितत्वादित्याह दर्शित
श्चेति यदि परस्यांशत्वेन कल्पितो जीवो वस्तुतस्तदात्मैव न तर्हि
तस्य संसारित्वं पुनरावृत्तिर्वेति शङ्कते कथमिति जीवस्य संसरण
मनुक्रमणेनोपपादयितुमुपक्रमते उच्यत इति ७

स्वामिकृत टीका ३

ननु च सर्वोऽपि गतिरागमान्ता कथं त्वदीयं धाम प्राप्ताः सन्तो न निवर्त
ते यदि न निवर्तन्ते न हि सन्ति संपद्य न विदुः सन्ति संपद्यामह इत्यादिश्रु
तेः सुषुप्तिप्रलयसमये त्वत्प्राप्तिः सर्वेषामस्तीति को नाम संसारी स्या
दित्याशङ्क्य संसारिणं दर्शयति ममेति पञ्चभिः ममैवांशो योऽयमवि
द्यया प्रतिबिम्बो जीवभूतः सनातनः सर्वदा संसारित्वेन प्रसिद्धः असौ
सुषुप्तिप्रलययोः प्रकृतौ लीनतया स्थितानि मनः षष्ठं येषां तानी
न्द्रियाणि श्रोत्रादीनि पुनर्जीवलोके संसारे भोगार्थमाकर्षति यत
श्च कर्मेन्द्रियाणां प्राणस्य चोपलक्षणार्थं अयं भावः सत्यं सुषुप्तिप्रलय
योरपि मदंशत्वात्सर्वस्यापि जीवमात्रस्य मयि लयादस्त्येव मत्प्राप्तिः
तथाप्यविद्ययावृतस्य सानुशयस्य प्रकृतिके मयि लयेन मुक्तेः सा
वै गतिरागमान्ता न तु मे अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्तीत्यादिना त
तश्च पुनः संसाराय निर्गच्छन् अविद्यातः प्रकृतौ स्थितानि स्वोपाधिभूता
नीन्द्रियाण्याकर्षति विशुद्धानां तु शुद्धस्वरूपप्राप्तेर्न निवृत्तिरिति यथा ज
लसूर्यः सूर्यांशो जलरूपनिमित्तस्यापाये सूर्यमेव गतस्तेनैव रूपे
ण पुनर्नागच्छति यथा च घटाद्युपाधिपरिच्छिन्नो घटाकाशो महाका
शांशः सन्घटादेर्निमित्तस्यापाये महाकाशं प्राप्य न निवर्तते ए
वं लिङ्गशरीरावच्छिन्नो मदात्मनोंऽशो मायिकलिङ्गशरीरापाये प
रमात्मानं प्राप्य न निवर्तत इत्यर्थः ७

विश्वनाथ टीका ४

ममैवांशः एकदेशो जीवः लोके प्राणिसमूहे जीवभूतः देहवत्स
नातनः मनः षष्ठं येषां तानि षष्ठानीन्द्रियाणि प्रकृतौ कारणे माया
रूपं तिष्ठन्तीति प्रकृतिस्थानि शब्दादिविषयोपलम्भार्थं तद्भि

म्बकर्षति आकर्षति श्रोत्रादीनींद्रियाणि शब्दादिभिर्विषयैः संयोजयतीत्यर्थः ॥ ७ ॥

रामानुजभाष्य टीका ५

ममेति इत्यमुक्तस्वरूपः सनातनो मदंश एव सन्कश्चिदनादिकर्मरूपाविद्यावेष्टनतिरोहितस्वस्वरूपो जीवभूतो जीवलोके वर्तमानो देवमनुष्यादिप्रकृतिपरिणामविशेषशरीरस्थानि मनःषष्ठानीन्द्रियाणि कर्षति कश्चित्पूर्वोक्तमार्गेणास्यां अविद्यायां मुक्तः स्वेन रूपेणावतिष्ठते जीवभूतस्तानि संकुचितज्ञानैश्वर्यः कर्मलब्धप्रकृतिपरिणामविशेषरूपशरीरस्थानां इन्द्रियाणां मनःषष्ठानामीश्वरस्तानि कर्मानुगुणमितस्ततः कर्षति ॥ ७ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थ ॥ ७ ॥ [illegible]

परमार्थप्रपा टीका ७

ननु संसारमोक्षौ सर्वेषां ब्रह्मप्राप्तौ सत्यां कथं पुनः पराहतिरित्याशंक्याह ममैवेति पंचभिः ममैवांशोऽयमविद्यया ब्रह्मसाहनात् कशवास्मिदेहाहन्तो जीवभूतः सनातनः सर्वदा संसारित्वेन प्रसिद्धः समनःषष्ठानीन्द्रियाणि प्रकृतौ तिष्ठन्ति प्रेवर्तन्ते इन्द्रियाणि संश्लेषेण कर्षति आकर्षयति अनिरपितानि यस्मात्मैत्य हेतुत्वपिति नाम तद्धीनपवर्गो भवति गृहीतं वाक्यं गृहीतं वस्तु गृहीतं तदः श्रोत्रमित्यादि स्पष्टार्थं किं भूतानीन्द्रियाणि प्रकृतिस्थानि प्रकृतौ तिष्ठन्ति तानि स्वोपाधिभूतानि अयमर्थः अविद्याहतमैत्येन सानुशयस्य जीवस्य प्रकृतिकमपिलयः अतः पुनरागतिः निरस्ताविद्यस्य जीवस्य श्रोत्रेऽमपिलयः अतो मुक्तिः अयमर्थोप्यत्रयः सर्वोऽस्यादि पूर्वमेवोक्ते ॥ ७ ॥

वनमाली टीका ८

ननु यदगत्वा न निवर्तन्ते न तद्धाम परमं मम इत्युक्तं यदिहिगत्वा तत्र पुनरावर्तनं पवस्वर्गिवत् अपुनरावर्तनेन हि नगच्छन्ति योगिनो न निवर्तन्तेवेति विरुद्धं सर्वेषां तानि विषयाः पतनान्ताः समुच्छ्रयाः संयोगा विप्रयोगान्ता मरणान्तं हि जीवितमिति शास्त्रे लोके च प्रसिद्धमिति शंकां निवारयति ममेति जीवलोके संसारे विद्यमानो जीवभूतः जीवस्वरूपः प्राण

[margin: तिन]

भर्ता कर्मकर्ता स्वर्गनरकादिभोक्ता चेतनः मम नित्यनिर्मुक्तस्य सर्व
ज्ञस्य पूर्णानंदस्य नित्याचिंत्यानंतानंतशक्तेरंशएव तद्भिन्नत्वे सति
तत्सदृशत्वे च सति तदधीनत्वे प्रकृते नंदंशत्वं अत एवोक्तं सना
तन इति तत्सदृशस्य जीवस्य भगवित्युपाछ्छादितस्य मां प्राप्य म
त्प्रसादेनाविर्भूतपूर्णानंदस्याछ्छादिकाया अविद्याया निःशेषत
या नाशान्न पुनरावृत्तिः तादृशानंदाविर्भाववत्तलोकविशेषस्थवि
ग्रहविशेषविशिष्टं मां प्राप्यैव परं ज्योतिरूपसंपद्य स्वेन रूपेणा
भिनिष्पद्यत इति श्रुतेः यथोपदेशं प्राप्याविर्भूतकौंतेयत्वस्वरूपे
सूर्यस्य नीछ्छादनेनेव निवर्तनेन तथा मां प्राप्याविर्भूतं पूर्णानंद
त्वं पुनर्नोछ्छादयते विद्याया नष्टत्वान् न च निवर्तते स्वरूपभूतत्वाद
ति भावः ननु सर्वभावविनाशेप्यभगवन्मूर्तिप्राप्तोप्येवं तनं क
थं पुनरावृत्तिस्तत्राह मन इति मनः षष्ठमेषां तानि श्रोत्रत्वक्चक्षुर
सनघ्राणाख्यानि पंचेंद्रियाणि इत्यस्मान्मनो विषयभोगोपलब्धि
करणानि यानि लिंगानि जाग्रत्स्वप्नभोगजनककर्मैतद्यैः प्रकृतिस्था
नि प्रकृतौ स्वकारणे सूक्ष्मरूपेणास्थितानि पुनर्जायद्भोगजनकक
र्मोदये भोगार्थं कर्षति विषयग्रहणयोग्यतया विर्भावयतीत्यर्थः
सर्वातमत्ययीपूर्वे काविछ्छिन्नप्रेमसंततिरूपभक्त्यानिहृताशेषा
नुशायायेहरिं प्राप्तास्तेषां न पुनरावृत्तिः सर्वमेतत्तु सानुशयायप व
हरिं मानुवर्तीति पुनरावर्तन इति भावः ७

ॐ ममैवेजयन्त्री टीका

ननु सतीवः को योसौ त्वत्प्राप्यान्नुवर्तते गछ्छतीत्यपेक्षायामाह ममै
वांश इति जीवलोके प्राकृतमंडले देवमनुष्यादिकारेण स्थितः
सनातनो नित्यो न तु घटाद्युपाध्यवछिन्नाकाशवत्कल्पितः जीव
भूतो जीवरूपो ममैवांशो न त्वीश्वराभासानां ब्रह्मरुद्रादीनामेतेषाम
पि जीवत्वाविशेषात् यथाग्नेरेवांशो विस्फुलिंगः किंविशिष्टः प्रका
शादिधर्माश्रयोऽतिसूक्ष्मरूपो भवति तथानंतज्ञानानंदादिकल्याण
गुणसागरस्य ममैवांशः किंविशिष्टः ज्ञानानंदादिधर्माश्रयो ज्ञानरूपको
जीवात्मा भवतीत्यर्थः जीवभूतो ममैवांशस्सनातन इत्यादिभिर्वि

षोषणैर्घटाकाशवन्महाकाशवद्वा जीवो ब्रह्मणोंऽशः तत्करणे
नावच्छेदान्न भिन्नस्तिष्ठति विनाशाद्घटनलनाशेन तदाकाशस्य म
हाकाशत्ववदंतःकरणनाशे जीवांशस्य ब्रह्मत्वमिति विद
नोपदत्तस्यानन्तत्वे सत्याने सचममांशोपि मनःषष्ठानि मनःषष्ठ
येषां तानीन्द्रियाणि श्रोत्रादीनि तानि [illegible] इन्द्रियाणि कीदृशानि
प्रकृतिस्थानि प्रकृतिकारभूताहंकारकार्याणि कर्षति स्वकर्मा
नुसारेण पादादिष्वंगलाश्वेतत्तत्रोवहति भगवत्स्वरूपमाप्राकृत
करणादिसंबंधनिर्मुक्तो भूत्वा प्राकृते दिव्यदेहकारणादिभि
र्युक्तो भगवंतं संश्रयं भगवल्लोके निवसतीति भावः ७

^इदानीमनराणिव्याख्यास्यामः॥

मधुसूदनी टीका १

^ममैव परमात्मनोंऽशः निरंशस्यापि मायया कल्पितः सूर्यस्येव
जले नभस इव च घटमठाद्यभेदवानंश इवांशो जीवलोके संसारे
सर्वप्राणधारणोपाधिना जीवभूतः कर्ता भोक्ता संसारीति प्र
थैव प्रसिद्धस्सपगतः सनातनो नित्यः उपाधिपरिछेदेपि वस्त
तः परमार्थस्वरूपत्वात् अतो ज्ञानादज्ञाननिहत्यास्वस्वरूपप्र
स्त्रप्राप्यनत्त्वेनानिवर्तन इति युक्तं एवंभूतोपि मुख्यमात्मकथमा
वर्तनत्यमाह मनःषष्ठानीमादि मनःषष्ठं येषां तानि श्रोत्रत्वक्च
क्षुरसनघ्राणाख्यानि पंचेंद्रियाणि इस्यात्मनो विषयोपलब्धिक
रणतया लिंगानि जाग्रत्स्वप्नभोगजनककर्मेत्ये प्रकृतिस्थानि
प्रकृतावज्ञाने सूक्ष्मरूपेणावस्थितानि पुनर्जाग्रद्भोगजनककर्मोद
ये भोगार्थं कर्षति कूर्मोगानीव प्रकृतेरज्ञानात्कर्षति विषयग्र
हणयोग्यतया विर्भावयतीत्यर्थः अतो ज्ञानादनाहृताबध्यता
नादाहृतिनैवोपपन्नेति भावः [illegible] ७

सदानंदी टीका ११

गीं॰
टीं॰
प

43

नीलकंठीटीका

ननु यदि सूर्याद्यभास्यज्योतीरूपस्त्वं हे ब्रह्मं चापि मो विद्धि इति ।
स्वमेव वदते ब्रह्मत्वं स्वपेत हि ते ब्रह्मस्य मतस्त्वं वद घटादिप्रकाशकं कि
मिति सूर्याद्यपेक्षा दृश्यते नहि स्वयंज्योतीरूपः स्वविषयावभा
सने ज्योतिरंतरमपेक्षते दीपादिषु दर्शनादित्याशंक्याह त्रिभिः
ममैवेति यत् यस्मादीश्वरो जगत्स्रष्टा शरीरं प्रवाप्नोति सएष इ
ह प्रविष्ट आनखाग्रेभ्यः तत्सृष्ट्वा तदेवानुप्राविशदित्यादिश्रुति
भ्यः ईश्वर एव शरीरधारी तथा च यस्मादिनोः अपि शरीरं यदवा
णार्थे वः समुच्चयार्थे कस्मिन्नहमुत्क्रांत उत्क्रांतो भविष्यामि ।
कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति श्रुतेः प्रा
णधारणेनोपाधिना ईश्वर इव उत्क्रामति ततोहृदयात् जीव ।
लोके संसारे यो जीवभूतः प्राणी स सनातनः सर्वदैकरूपोऽहमेवेति
वक्तव्ये यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवैतस्मादात्मनः स
र्वे एत आत्मनो व्युच्चरंतीति वह्निविस्फुलिंगन्यायेन ममैवांश इ
त्यंशांशिभावोक्तिः यद्यपि वह्नेर्भेदः परिमाणं च स्वगतेन दृश्यप
ते तथापि तदुपाधिगतमेव तदुभयं तत्रोपचर्यते अयमग्निरस्मा
दग्नेर्भिन्नः अयमस्य स्फुलिंगः अयमस्मादल्प इति एवमस्थूलम
नण्वह्रस्वमदीर्घमिति श्रुतेः स्वगतविधपरिमाणशून्ये ब्रह्मणि ममै
वांश इत्यंशांशिभावेन भेदोऽल्पत्वमहत्वे वोपचारादौपाधिके ध्ये
यत्तथा च श्रुतिः बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यवरोऽपि दृ
ष्ट इति समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभि ।
र्लोकैरिति च तथा च विस्फुलिंगो वह्नेरिव न तत्त्वतः अंशः एवं जी
वोऽपि ब्रह्मैव न तत्त्वतोंऽशः अयमात्मा ब्रह्म सदात्मा ब्रह्मेमाकिन वा उते

तिदाशादिष्वपि पिंडेषु गोत्वस्यैवकार्त्स्न्येनएकैकस्मिन्नुपलंभावपरिस
मास्तिदर्शनात् निरंशेंशांशिकल्पनायाअयोगपत्वाच्च एवंजीवभूतः
शरीरमेममैवांशइवांशोरूपभेदोमनःषष्ठंयेषुतानिमनसासहषडिंद्रियाणि
प्रकृतिस्थानिइंद्रियाणांप्रकृतिःस्वभावोविषयप्रावण्यंतत्रस्थितानि
कर्षतिस्वाभिमुखलयसमाधिकालेषुसंकोचयति ७

आनंदी टीका

ममैवांशः यथाग्नेः क्षुद्राविस्फुलिंगाव्युच्चरंतीतिश्रुत्यर्थानुगमादभि
न्नोपिपरमात्मनः भूतेंद्रियादिसंघातोपाधिनाभेदंप्राप्यजीवलोकेजीव
भूतस्सनातनःसदैकरूपःप्रकृतौलीनेत्रेस्थितानिश्रोत्रांतःकारणानिषडिंद्रिया
णिचकर्षतिनिजकर्मफलभोगायदेहाद्देहान्तरंप्रापयतीविषयभोगार्थं
प्रेरयतिच [illegible] ७

रामकंठीटीका

एषजीवोनामपदार्थःप्रकृतिस्थानिषड्भावादिभावेनपरिणतायांयथोक्त
स्वरूपायांप्रकृतौस्थितानितदेकालम्बनत्वात्तदाश्रितानिप्रायान्यात्घ्रा
णादिधीन्द्रियविवक्षयापंचेंद्रियाणिमनसासहतानितिहतिसाधनभूतेनां
तःकरणेनषष्ठेनसहितानिकर्षतिउपादेयेस्वविषयेषुजनोहेयात्तन्ततो
निवर्तयन्नादिपतिविदिपतिचसजीवलोकेजगतिममैवांशःसत्प्रति
पादितस्वरूपस्यपरमकारणस्यांशोभागइवसनातननोनित्योजीवभूतो
मदविद्यावशादन्योन्याभिन्नजीवरूपतांप्राप्तः किमुक्तंभवति जीवपरमात्म
नोर्नास्तिमनागपिवास्तवोभेदःएवकारेणजीवस्यचिन्मात्रस्वरूपातिर
िक्तवस्त्वन्तरसंपर्कसंभावनाभावोवधारितस्तेनपरमार्थतःपरमकार
णादभिन्नस्यापिप्रतिदेहंविभक्तेन्द्रियवर्गापकर्षत्वादिनानानात्वप्रती
तिरचिंत्यमनमायाशक्तिजनितानास्यवास्तवी साहिमायाशक्तिस्तत्व
ज्ञानावसरविभाव्यानिस्सारस्वरूपा सप्रतिसर्वभावभेदविभ्रमोद्भावनेने
यंव्यामोहयतीति दैवीह्येषागुणमयीममामायादुरत्ययेत्यादिनाप्रागे
वप्रतिपादिताद्भुतस्वरूपा ततश्चाकाशस्यनित्यनिर्मलनिर्विभागानं
तमहिम्नोपिघटाद्यवच्छेदकवस्तुवशाद्यथांशवत्वपरिकल्पना तथा
परमात्मनोपिदेहाद्यवच्छेदकवस्तुवशाज्जीवरूपांशवत्वपरिकल्पनेयं
नत्वनन्तस्यात्मस्वरूपस्यवस्तुतोभागाःसंभवंति योपिप्रदीप्तहुताशराशी

गी॰
टी॰
पं

स्फुलिंगनिचयोपमानप्रतिपादनव्यवहारः परमात्मजीवात्मनोरा
गमेषु श्रूयते सोऽप्यौपचारिक एव न वास्तवो यतो ब्रह्मविद एकमेव त
त्त्वं परमार्थसद् ब्रह्म सत्त्वयानेकमिव चकासीत्याचक्षते तथा च कश्चि
दीश्वरो व्याकृतशाणविराड्भूतेन्द्रियोर्मिभिर्यः प्रत्यन्निवाभाति न
सैव ब्रह्माव्ययेन मह इत्याह [illegible] ।

+ नन्वेवंविधं तवेश्वरस्य परमं धाम यद्गत्वा प्राप्य मत्
मीयते जीवलोके इत्यतः सोपाधिकस्वस्वरूप
प्रदर्शनं प्रश्लोकेनं सम+
भिः श्लोके रुपक्रमते ॥

लास्तिकी [illegible]टीका

ममैवेश्वरस्यांशः इवांशः एकरूपत्वेः सनातनोऽविनाशी जीवलोके उत्क्रमणत्या
जीवभूतः तस्येश्वरांशस्यैश्वर्यमाह प्रकृतौ स्वकारणे स्थितानि लीनानि म
नः षष्ठानीन्द्रियाणि कर्षति उपभोगार्थं बहिर्निष्कर्षयति [illegible] ।

पंचोले टीका

ननु सर्वोऽपि गतिमागमनं नास्ति कथं न ह्यामगतानां नास्ति निवृत्तिरि
त्यत्र संसारिस्वरूपं दर्शयन् कारणमाह ममेति ममैवात्मनोऽंशः
भागः स्वयम् एकदेशः जीवलोके संसारे जीवभूतः कर्ता भोक्तेति
प्रसिद्धः सनातनः चिरन्तनः सन् षष्ठानि श्रोत्रादीनि इन्द्रियाणि पंच
प्रकृतिस्थानि कर्णशष्कुल्यादौ प्रकृतौ स्थितानि संसारे स्वजुक्रामन
कर्षति आकर्षति यथा जलसूर्यकः सूर्यांशो जलस्य निमित्तस्यापा
ये सूर्यमेव गच्छति न तेनैव रूपेण एवमागच्छति यथा वा घटाकाशः पिण्डि
के नाघटाकाशो महाकाशांशः सन् घटनिमित्तस्यापाये महाकाशं
प्राप्य न निवर्तते एवं मायालिंगशरीरावच्छिन्नपरमात्मनोऽंशः न
निवर्तते इति एकत्रं लिंगशरीरं एकादशेन्द्रियाणि पंच वायवः बुद्धिरूपं प्राप्य न
हि अहंकारस्य एतावल्लिंगशरीरं पंचतन्मात्राण्यपि लिंगशरीरमि
ति केचित्

गणावीरसमिद्धोधिनी॥

इदानीं कर्मस्य प्रतिबंधकमिंद्रियवर्गं वर्णयन्नत्र प्रथमं तत्स्वामि
नं जीवं वर्णयति ममैवांश इति मम परमेश्वरस्यैवांशो नितरामं
श्यापि मायया कल्पितो जीवलोके जीवानां प्राणधारिणां लो
के जीवभूतः प्राणधारी संहतः सनातनो नित्यो नित्यस्य ममां
शत्वादतः स्वधर्मानुष्ठानेन जीवस्य मद्भावप्राप्तिर्न दूरतरेति
भावः मनःषष्ठानीति मनःषष्ठं येषां तानि मनःषष्ठानि पं
चेंद्रियाणि श्रोत्रत्वक्चक्षूरसनाघ्राणाख्यानि प्रकृतिस्थानि
करणे कृतिः प्रकर्षेण करणं प्रकृतिर्व्यवहारस्तत्रावस्थितानि
व्यवहारसंपादकानीति तान्याकर्षतीत्यर्थः ७॥

मधुभाष्य

७॥

45

जो कहे कि तुमारे धाम को प्राप्त होय फेरि संसार नहीं होता सो सत्य है सकल जीव सत स्वरूप सम्पन्न होके द्वैत दृष्टि नहीं करते हैं और सुषुप्ति समय मे हम ब्रह्मभाव को प्राप्त होते हैं ऐसे श्रुति विधान करें हैं और प्रलयकाल मे भी सब जीव जिस धाम को प्राप्त होते हैं तो फेरि संसारी और किस का नाम है इस आशङ्का पर पांच श्लोक से संसारी स्वरूप देखावते हैं कि हमारा अंश जीव अविद्या से सुषुप्ति तथा प्रलय के समय प्रकृति मे लीन होके रहते हैं और मन समेत इन्द्रिय इन सबों को मेरेही अंश सनातन जीव भूत संसार के उपभोगार्थ फेर भी मनुष्य लोक मे खैंचै है यहां यह जानना चाहिये कि इन्द्रिय शब्द से ज्ञान कर्म इन्द्रीय औ पन्च प्राण लेने हैं इसीसे संसारी होते हैं ७

दोहा

मोरि अंश यह जीव है जीवलोक मे सोय मायिक इंद्रिय षट को मन सह खैंचें सोय ७॥

शरीरंयदवाप्नोतियच्चाप्युत्क्रामतीश्वरः गृही
त्वैतानिसंयातिवायुर्गंधानिवाशयात् ८

शांकरभाष्य टीका १

कस्मिन् काले शरीरमिति यच्चापि यदा चाप्युत्क्रामतीश्वरो देहादि
संघातस्वामी जीवस्तदा कर्षतीति श्लोकस्य द्वितीयपादस्यार्थवशा
त्प्राथम्येन सम्बध्यते यदाच पूर्वस्मात् शरीरात् शरीरान्तरमाप्नो
ति तदा गृहीत्वैतानि मनःषष्ठानीन्द्रियाणि संयाति सम्यक् याति
गच्छति किमिवेत्याह वायुःपवनो गन्धानिवाशयात् पुष्पादेः ८

आनंदगिरिकृत टीका २

स्वस्थाने स्थितानामिन्द्रियाणां जीवेनाकर्षणस्य काले पृच्छितं क
स्मिन्निति जीवस्योत्क्रान्तिर्नेश्वरस्येत्याशंक्येश्वरशब्दार्थमाह
देहादीति उत्क्रान्त्यनन्तरभाविनी गतिरित्येन दर्थवशादित्यके
अवशिष्टानि श्लोकाक्षराण्याचष्टे यदाचेति ८

स्वामिकृत टीका ३

तान्याकृष्य किं करोतीत्यत आह शरीरमिति यद्यदा शरीरान्तरं कर्म
वशादवाप्नोति यतश्च शरीरादुत्क्रामति ईश्वरो देहादीनां स्वामी
तदा पूर्वस्माच्छरीरादेतानि गृहीत्वा शरीरान्तरं सम्यग्याति शरी
रे सत्येवेन्द्रियग्रहणे दृष्टान्तः आशयात्स्वस्थानात् कुसुमादेः सका
शात् गंधान् गंधवतः सूक्ष्मानंशान् गृहीत्वा यथा वायुर्गगने ग
च्छति तद्वत् ८

पी

पिशाचभाष्य टीका ४

शरीरं यदवाप्नोति प्राप्नोति यदापि यदा च प्राप्तमुत्क्रामति निर्गच्छ
ति ईश्वरः पुरस्वामी देहे तत्र तस्तदा एतानि वक्ष्यमाणानीन्द्रियाणि गृ
हीत्वा संयाति वायुराशयात् गंधानिव तानि ८

रामानुजभाष्य टीका ५

शरीरमिति यच्छरीरमवाप्नोति यस्माच्छरीरादुत्क्रामति तदुभय
स्मिन् इन्द्रियाणामीश्वरः एतानीन्द्रियाणि भूतसूक्ष्मैः सह गृहीत्वा सं
याति वायुर्गंधानिवाशयात् यथा वायुः स्रक्चन्दनकस्तूरिका

श्री·
गी·टी·
पं·

याशयात्तत्स्थानात्कुसुमावयवैः सह गंधान्गृहीत्वा यत्र संयातितत् इत्यर्थः ८

श्रीमनवगुप्तकृत टीका ८

यदापि प्राप्नोति तेन ते पूर्वमेव शरीरात् तत्क्रांतः परित्यक्त वानितिहरेतद्वारेणा यद्वा पद वाच्यं तदा ईश्वरः स्वामी गृहीत्वा आदाय संयाति भुंजते कुसुमादिभ्यो वायुर्गन्धानिव सः

अन्यत्र तत्र गृहीतानि इंद्रियाणि पंचकर्मेंद्रियाणि पंचज्ञानेंद्रियाणि मनः प्राणाः पंच बुद्धिश्चेति

[illegible]

परमार्थप्रपा टीका ८

[illegible]

धनमाला टीका ८

[illegible]

रागमनराहित्येनगछत्यपिशरीरेसत्येवेंद्रियग्रहणेदृष्टांतः आ
शयात्कुसुमादेः स्थानात् गंधान्गंधात्मकान् सूक्ष्मानंशान्
गृहीत्वायथावायुर्यातितद्वत् ८

कुसुमवैजयन्ती टीका ९

जीवलोकेजीवइंद्रियाणिकर्षतीतियदुक्तंतत्कर्षणप्रकारंसदृ
ष्टांतमाहशरीरमितिईश्वरः शरीरेइंद्रियादीनांस्वामीजीवोयत्
पूर्वस्माच्छरीरादन्यच्छरीरमाप्नोतिप्राप्नोतिचपुनः अपिवायै
यदावास्माच्छरीरादुत्क्रामतिनिःसरतितदैतानिभूतसूक्ष्मैःस
हेंद्रियाणिगृहीत्वास्वकर्मानुगुणवासनयाप्रकटंसंयातित
त्रदृष्टांतः आशयात्केसरकेसरकुसुमकस्तूरिकाचंदनादिस्था
नाद्वायुर्गंधानिवसूक्ष्मावयवैःसहगंधान्गृहीत्वायथासहसं
यातितथेत्यर्थः ८

मधुसूदनी टीका ९

कस्मिन्कालेकर्षतीत्युच्यते ॥

यत्यदाउत्क्रामतिबहिर्निर्गच्छति ईश्वरोदेहेंद्रियसंघातस्वा
मीजीवः तदायतोदेहादुत्क्रामतितेनोमनः षष्ठानींद्रियाणिक
र्षतीतिद्वितीयपादस्यप्रथममन्वयः उत्क्रमणोत्तरभाविना
क्रमनस्यनकेवलंकर्षत्येवकिंतुयत्यदाचपूर्वस्माच्छरीराच्छ
रीरांतरमवाप्नोतितदैतानिमनः षष्ठानींद्रियाणिगृहीत्वासं
यात्यपिसम्यक्पुनरागमनराहित्येनगच्छत्यपि शरीरेसत्येवेंद्रि
यग्रहणेदृष्टांतः आशयात्कुसुमादेः स्थानात् गंधान्गंधात्म
कान्सूक्ष्मानंशान्गृहीत्वायथावायुर्यातितद्वत् [illegible] ८

सदानंदी टीका ९

कदाकर्षतिजीवोय[illegible]मिंद्रियाणीतिचेत् उच्यतेदेहेंद्रियादिसंघातस्वा
मीजीवोयदाबहिः १ निर्गच्छतियदादेहाद्यस्मादुत्क्रमतीत्यर्थः
मनःषष्ठानींद्रियाणिकर्षतीत्यन्वयोस्तीति २ उत्क्रांत्युत्तरभाविना
क्रमनस्ययत्तस्ततः नकेवलंकर्षत्येवकिंतुपूर्वशरीरतः ३ यदा

श्री॰
गी॰ टी॰
पं॰

सपरं देहं तदैतानींद्रियाणि सः गृहीत्वा मनसा सार्द्धं गच्छत्यागम
नोज्झितः ४ शरीरे सति हृष्टांत इंद्रियग्रहणे स्वयं पुष्पादेः स्थान
तः सूक्ष्मान् शनैर्ध्यानमकाम्यया ५ गृहीत्वा पवनो याति तद्वज्जी
वोपि तान्यतः ८

नीलकंठी टीका १२

[illegible] गृहीत्वा वायुः किं करोतीत्यत आह
योग्यमिति यदि [illegible] वेति हत्वा विषयान् शब्दादीन् ग
रैवेतेव[illegible]यति वत्तादीपः स्वस्य हि लाभाय तैलवर्त्यादिपे
क्षमाणोपि स्वविषयावभासने स्वयमेव समर्थः एवं जीवोपि चक्ष
कारत्वलाभाय मनः सहितानींद्रियाणि स्थूलदेहं च प्रेक्षमाणोपि
स्वविषयावभासे स्वयमेव करोतीति तेन प्राणिंद्रियस्तूर्यादीनि स्वभा
स्वत्वात्तैलवर्त्यादिवत् तथैतान्येवाशयान् स्वलयस्थानात् गृ
हीत्वा संयाति विषयदेशं प्रतिगच्छति प्रबोधसर्गयुत्थान
कालेषु तत्र दृष्टांतः वायुर्गंधानिवाशयात् गंधाश्रयात् पुष्पात् ८

आनंदी टीका १३

एतदेव प्रतिपादयति —
आशयात्पुष्पादेरधिष्ठानात् ईश्वरः वायोरभ्यंतरकरणाकर्षण
समर्थः विस्तरस्तत्र शास्त्रादवगंतव्यः करणान्यवदर्शयति
८॥

+ननु ततस्ततः शरीरोपात्तशुभाशुभकर्मणा पवित्रवासनाधिवासितएव जीवः शरीरांतरं प्रतिपद्यमानः संसारपरंपरा
परिवर्तनमनुभवत्कथं न वस्तुतोन्यो भिन्नो भवेदिति
भेदभ्रांतिमपाकर्तुमाह॥

रामकंठी टीका १४

+एवं मदंशत्वाद्वस्तुतो मदभिन्नो जीवपदार्थो यच्छरीरमवाप्नोति
केनचिन्निवेन शरीरेण संबध्यमानत्वाज्जातव्यपदेशं लभते इ
त्यर्थः तथा यच्चाप्युत्क्रामति तत्कर्मविपाकप्रत्ययकेन चिच्छ
रीरेण वियुज्यमानत्वात् उत्क्रांतव्यपदेशं लभते तदायमीश्व
रः स्वतंत्रस्वरूपमात्रप्रतिष्ठः परमात्मैव सन्नेतानि सूक्ष्मरूपा
णींद्रियाणि गृहीत्वाधिष्ठेयत्वेन स्वीकृत्य संयाति देहाद्देहांत
रगंतत्वव्यपदेशभाग्भवति न पुनर्निःस्वनिर्विभागव्यापक
चिन्मात्रैकस्वरूपस्यास्य देहाद्देहांतरगमनलक्षणं संयानं जन्म

मरणशाहत्वाच्च वस्तुतः संभवतीति इदमत्रतात्पर्यं पारमार्थिकस्वरू
पसत्त्वमस्पर्शभावमात्रात्मत्वजन्मनो निजमायाशक्त्युपाधिविनावच्छेदरहि
तविविधशरीरसंबंधाज्जीवनानात्वमिवावभासयत्ययमीश्वरत्वेनय
थाघटकुशूलगृहाद्यवच्छेदकवस्तुसंबंधादेकमेव निर्विभागमाकाशं
घटाकाशं कुशूलाकाशमित्यादिभेदव्यपदेशमतत्त्वविदः प्रतिपद्यते
तथैवायमीश्वरः स्वरूपप्रतिष्ठ एव सन्नव्याकृतकार्यकारणसंबंधान्ना
नात्वमिव प्रतिपद्यते न तत्संबंधेपि स्वतिष्ठैव विशुद्धसंविन्मयस्वरूप
मात्रप्रतिष्ठ एव तत्रोपमानेन प्रकटयति उतश्चिदाशयात्कमला
करादेर्यथा स्पर्शमात्रस्वभावो वायुर्गंधान् कुवलयादिमकरन्दामो
दान् सूक्ष्मरूपान् स्वीकृत्य कुसुमादिकमाशयान्तरं संयाति तथैवा
यमिन्द्रियादीनि गृहीत्वा देहाद्देहान्तरं चिन्मात्रस्वरूपप्रतिष्ठ एव संया
ति ~~किमनेनोक्तं भवति~~ किमनेनोक्तं भवति यथा तन्मदाशयगतगं
धपरमाणुपरिग्रहेपि स्पर्शमात्रगुणात्स्वरूपादप्रच्यवमानो गंध
वत्त्वं नानावपद्यते एव नो अथच न तत्संबंधात्कमलसुरभिः कुसुमदमकरन्द
भुग सुगंधिरिति भिन्नव्यपदेशं न वस्तुतोस्य भेदः संभवति चायमुपमा
नोपमेयभावो विवक्षितो यद्वत्स्वतः न संबंधेपि स्वरूपाप्रच्युतिरस्येति

[illegible]

॥ ८ ॥

लासिकी वसगुनीटीका ५

किंच अयं जीव ईश्वरांशत्वादीश्वर इति व्यपदेशार्हः शरीरं यद्यदा स्वकर्म
वशादवाप्नोति यतश्च शरीरादुत्क्रामति एतानि प्रकृतिस्थानि म
नःषष्ठानीन्द्रियाणि पूर्वस्मात् शरीरात् गृहीत्वा संयाति शरीरान्तरं ग
च्छति शरीरे संसेवेन्द्रियग्रहणे हेतवः आश्रयात्स्वस्थानात् कुसु
मादेः सकाशाद्यथा गंधवतान् सूक्ष्मानंशान् गृहीत्वा वायुर्यथा गच्छति
न हन [illegible]

॥ ८ ॥

पंचोले टीका

कदाप्राकर्षतिप्राह्णष्यवकिंकरोतिइत्यत्राह शरीरमिति ई
श्वरोदेहादिसंघातस्वामीजीवः यच्चापियदाशरीराद्‌उत्क्रामतियत्
यदापूर्वस्मात्शरीरांतरंप्राप्नोतितदा‌एतानिमनःषष्ठानिइंद्रिया
णिगृहीत्वासम्यग्यातिगच्छतितत्रदृष्टांतःवायुराशयात्‌पुष्पादेर्गं
धानिव ८

गणवीरसासिद्धबोधिनी॥

तान्याकृष्यकिंकरोतीत्याह शरीरमिति यद्यदा ईश्वरो दे
हेंद्रियसंघातस्वामीजीवो देहाद्‌उत्क्रामति निर्गच्छति तदाम
नःषष्ठानींद्रियाणिकर्षतीत्यन्वयः यदाचपूर्वस्माच्छरीरा
च्छरीरांतरमवाप्नोति तदैतानिमनःषष्ठानींद्रियाणिगृहीत्वा
संयाति सम्यक्पुनरागमनरहित्येनगच्छति इंद्रियग्रहणेदृ
ष्टांतमाह वायुरिति आशयात्‌कुसुमादेःस्थानाद्‌गंधान्गं
धात्मकान्सूक्ष्मांशान्गृहीत्वायथावायुर्याति तद्वदिति
तस्मादिंद्रियकर्मप्रवर्तनादिस्वेदवशागोमूत्रास्वयमेमूत्तंपु
द्गमात्याद्गीतिभावः ८॥

मधुभाष्य

शरीरमित्यादिना यत्‌यदाशरीरमवाप्नोति उत्क्रामति
जीवः तदेश्वरएतानिगृहीत्वासंयाति यत्रयत्रचसंयुक्तो
यातागर्भपुनःपुनः तत्रतत्रैववसतिनयतुस्वयमिच्छती
तिहिमोक्षधर्मे भावाभाववपिज्ञानन्नारीयोजानामि
श्रेयोनवतत्करोमि आप्तामहदम्यामहद्दराक्षकवन्ययथा
नियुक्तोस्मितथाचरामीतिच हत्वाजित्वापिमघवन्यःक

श्चिदुरुषायते अकर्तीवेव भवति कर्तीवेव करोति तदिति
च तथा यथा ह्यनः सुसमाहितमुत्सर्जेद्यायादेवमेवायं शरी
रे प्राज्ञ आत्मान्वारूढ उत्सर्जेद्यातीति च श्रुतिः वा
ग्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देव
तायामिति च गच्छतीति बृहल्लाणि भोगो यस्य साधितः शुक्ला
त इंद्रियद्वारादिसोपि भुंक्ते तथाह्यमेवी प्राणायामगायति पतं
ते गायतीति च श्रुतिः गुणान्वितमेवं भुंक्ते नहवै देवान्पापं
गच्छतीति श्रुतेः नहि किमिति न दृश्यते अत्यत्र प्राद ८

50

भाषाप्रनवादटीका

ओर सोई इन्द्रियोंकों आकर्षण करीके जीव का करते हैं जो यह शङ्का करो तो सुनो कि जब ईश्वर नाम देह आदि का स्वामी स्वरूप व्यावहारिक जीव कर्म्मवशते हशरी शरीर को प्राप्त होता है अथवा जब शरीर को छोडि के गमन करते हैं तब पूर्व शरीर से इन्द्रियादिकों को ग्रहण करिके गमन करैं है इस मे दृष्टान्त यह कि जैसे वायु फूलों के स्थान से सुगन्ध रूप सूक्ष्म अंश परमाणु ग्रह करके गमन करै है तैसे ही यह भी इसको भी जानो ८

दोहा

ईश्वर देह हुं त्याग जब सो ओर देह में जात ग्रहकर
इंद्रिय तिनहिको कुसुमगंधि जिम वात ८॥

श्रोत्रंचक्षुःस्पर्शनंचरसनंघ्राणमेवच अधि
ष्ठायमनश्चायंविषयानुपसेवते ९

शांकरभाष्य टीका १

कानिपुनस्तानीति श्रोत्रमिति श्रोत्रं चक्षुःस्पर्शनञ्च त्वगिन्द्रियं
रसनं जिह्वा घ्राणमेवचमनश्च षष्ठं प्रत्येकं इन्द्रियेण सहाधिष्ठा
य देहस्थो विषयान शब्दादीनुपसेवते ९

आनंदगिरिकृत टीका २

मनःषष्ठानीन्द्रियाण्येव प्रत्याहारा विशेषतो दर्शयति कानीति ९

स्वामिकृत टीका ३

तान्येवेंद्रियाणि दर्शयन्यदर्थं गृहीत्वा गच्छति तदाह श्रोत्रमि
ति श्रोत्रादीनि बाह्येंद्रियाणि मनश्चान्तःकरणमधिष्ठायाश्रि
त्यशब्दादीन्विषयानयंजीव उपभुंक्ते ९

पिशाचभाष्य टीका ४

अधिष्ठायाश्रित्यमनश्चायंदेवत्तःविषयानशब्दादीनुपसेवते
उपलभते ९

रामानुजभाष्य टीका ५

श्रोत्रमिति एतानिमनःषष्ठानीन्द्रियाणि अधिष्ठाय स्वस्वविषय
हत्त्वनयुणानि कृत्वातत्तच्छब्दादीनविषयानुपसेवते उपभुंक्ते ९

अभिनवगुप्तकृत टीका ६ पञ्चदशोऽध्यायम् ९

स्पष्टार्थं ९ ॥

परमार्थप्रपा टीका ७

अथशरीरान्तर्वर्तिमानदशायामात्मनो विषयोपभोगप्रकार
माह श्रोत्रमिति अयमात्मा मनअधिष्ठायस्वाश्रयमात्रेणप्रव
र्तनत स्त्रा हकोपलब्धितो छब्दादीन्विषयानुपभुंक्ते काराध्यासे
नसेवते श्रुतिरपि अन्यत्रमना अभूवन्नादर्शमन्यत्रमना अभू
वंना श्रौषमिति मनसा ह्येव पश्यति मनसा श्रृणोतीत्यादिस्पष्टार्थं
९

वनमाली टीका ८

तान्येवेंद्रियाणि दर्शयन्यदर्थं गृहीत्वा गच्छति तदाह श्रोत्रमिति
श्रोत्रादीनि तानेंद्रियाणि पञ्च कारानकर्मेंद्रियाणि प्राणं च मन

श्री
गी॰ टी॰
पं॰

९

स्यषष्ठमधिष्ठायैवाश्रित्यैव विषयान् शब्दादीन् अयं जीव उपसेवते भुंक्ते ९

कुसुमवैजयन्ती टीका ९

किमर्थं तानि गृहीत्वा यातीत्यपेक्षायां विषयभोगार्थमित्याह श्रोत्रमिति श्रोत्रं चक्षुः स्पर्शनं रसनं घ्राणं च पंचैतानि ज्ञानेंद्रियाणि चकारात् वाक्पाणिपादपायूपस्थानि पंच कर्मेंद्रियाणि वप्नः मनः एवकाराद् बुद्धिचित्ताहंकाराणां ग्रहणं एतानि सर्वाण्यधिष्ठायाश्रित्य स्वस्वविषयप्रहसनगुणानि कृत्वा वा विषयान् शब्दस्पर्शरूपरसगंधान् वचनादानविहरणोत्सर्गानंदान् अयं जीवात्मा उपसेवते उपभुंक्ते एतदर्थमेव तद्ग्रहणमित्यर्थः ९

+ तान्येवेंद्रियाणि दर्शयन् यदर्थं गृहीत्वा गच्छति तदाह॥

मधुसूदनी टीका ९

+ श्रोत्रं चक्षुः स्पर्शनं रसनं घ्राणमेव च चकारात् कर्मेंद्रियाणि प्राणं च मनश्च षष्ठमधिष्ठायैवाश्रित्यैव विषयान् शब्दादीन् [illegible] अयं जीव उपसेवते भुंक्ते [illegible]
९

सदानंदी टीका ९

तान्येव दर्शयन्नाह यदर्थं याति तत्तया श्रोत्रादिपंचकं येन प्राणां कर्मेंद्रियाण्यपि षष्ठं च मन आश्रित्य शब्दस्पर्शादिगोचरान् भोगानिव शायितः १ देहेन्द्रियादिषु स्वयं देहेन्द्रियस्वामी भुंक्ते तान्ध्यासादेवात्मनो मृषा सुखदुःखादिभोक्तृत्वं न तत्त्वस्य परमार्थतः ९

नीलकंठी टीका ९

कानि तानि मनःषष्ठानि तानि गृहीत्वा गत्वा वायं किं करोतीत्यत आह श्रोत्रमिति अधिष्ठाय व्यापारवन्ति कृत्वा विषयान् शब्दादीन् उपसेवते प्रकाशयति यथा दीपः स्वस्य वर्तिलाभाय तैलवर्त्याद्यपेक्षमाणोऽपि स्वविषयावभासने स्वयमेव प्रभुः एवं जीवोऽपि घटाकारत्वलाभाय मनःषष्ठानीन्द्रियाणि सर्पादीन्यपेक्षते न त्वापि घटावभासं स्वयमेव करोति तेन तराणीन्द्रियसर्पादीनि स्वभासत्वात्तैलवर्त्यादिवदित्याशयः ९

+ ज्ञात्वायुर्भोगलक्षणविपाकाभिव्यंजकजन्ममरणधर्मयोगशरीरादिसंबंधेपि वास्तवीं स्वरूपमात्र
प्रतिष्ठतामस्यात्मनः प्रतिपाद्येदानीं तदन्तरालवर्तिभोगलक्षणविपाकाभिव्यंजकदशासं
बंधेप्यस्य तां प्रतिपादयितुमाह॥

आनंदीटीका १३

अयं देहस्थः श्रोत्रादिद्वारेण शब्दादीन् भुंक्ते इत्यर्थः ९ ॥

रामकंठीटीका १४

+ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेष्वित्यादिना प्रदर्शितन्यायेनाय
मेक एवात्मा नानाक्षेत्रवर्तिविभिन्नविषयाधिष्ठातृत्वमात्रेण
नानात्वमिव प्रतिपद्यमानो विषयाञ्छब्दादीन्स्वोदितेहरूप
मेव तेन तेनोपलब्धृत्वमात्रैकस्वभावाव्यभिचारादेक एव सन्
भजते भोक्तृत्वावस्थायामपीतरेणाहंतास्वरूपमेवास्माविम
र्शः । ९ ॥

+ एवं त्वष्टो संहारैर्वैतैः साहित्यमस्योक्ता धि
नावधिस्थानासनादिरूपायां विषयग्रहणा
त्मिकायां च तत्साहित्यमे
वास्य व्यापार इत्याह॥

लासिकी [illegible]टीका १५

+ मनोन्तःकरणं विषयाञ्छब्दादीन् भुंक्ते [illegible]
[illegible]
आह ॥ ९ ॥

पंचोलेटीका

एवं ज्ञानेन्द्रियाणि भेदेन दर्शयन् यदर्थं गृहीत्वा याति जीवः
तदपि दर्शयति श्रोत्रमिति अयं जीवो देहस्थः श्रोत्रं च चक्षुः स्पर्शनं च
त्वक् रसनं घ्राणं एतानि पंच श्रोत्रादीनीन्द्रियाणि मनसा सह षट्
प्रत्येकं इन्द्रियं अधिष्ठाय विषयान् शब्दादीन् उपसेवते भुंक्ते ९

रत्नावीरसमिद्बोधिनी

श्रोत्रमिति श्रोत्रादीनि ज्ञानेन्द्रियाणि च कारात्कर्मेन्द्रियाणि
मनश्चाधिष्ठायाश्रित्य शब्दादीन्विषयानयं जीव उपसेवते
इति ९॥

मधुभाष्य

९॥

53

भाषाअनुवादटीका

इन्द्रियों के समाचार कह के अब जिस जिस लिये उन इन्द्रियों को ग्रहण करि के गमन करते हैं सो कहते हैं कि ये जीव श्रोत्र चक्षु स्पर्श जिह्वा और घ्राण ये बाह्य इन्द्रिय और अन्तःकरणको आश्रय करि के शब्द आदि विषयों को उपभोग करैं है ९

दोहा

श्रवण नेत्र त्वच रसन हि और नासिका जोय मनसंग इन में विषयको स्थित होय सेवत सोय ९॥

54

उत्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वितं वि
मूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः १०

शांकरभाष्य टीका १

एवं देहगतं देहात् उत्क्रामन्तमिति उत्क्रामन्तं परित्यजन्तं देहं पूर्वोपात्तं स्थितं वा देहे तिष्ठन्तं भुञ्जानं वा शब्दादींश्चोपलभमानं गुणान्वितं सुखदुःखमोहाद्यैः गुणैरन्वितमनुगतं संयुक्तमित्यर्थः एवम्भूतमप्येनमत्यन्तं दर्शनगोचरप्राप्तं विमूढा दृष्टादृष्टविषयभोगबलाकृष्टचेतस्तयाऽनेकधा मूढा नानुपश्यन्ति अहो कष्टं वर्तत इत्यनुक्रोशति च भगवान् ये तु पुनः प्रमाणजनितज्ञानचक्षुषस्त एनं पश्यन्ति ज्ञानचक्षुषो विविक्तदृष्टय इत्यर्थः
१०

आनंदगिरिकृत टीका २

शरीरमित्यादिश्लोके देहाद्यात्मनोऽतिरेकमुक्त्वा श्रोत्रं चक्षुरित्यादौ स्वाभिलषिते विषये यथायथं करणानां प्रवर्तकत्वात् तेभ्योऽतिरिक्तस्यात्मनो व्यक्तं तर्हि न मृतत्कामादि कुर्वन्तं स्वरूपत्वात् किमिति सर्वे न पश्यन्तीत्याशङ्क्याह एवमिति सन्निहितत्वमत्वेन दर्शनयोग्यमपि विषयपरवशा आत्मानं सर्वे न पश्यन्तीति भगवतोऽनुक्रोशं दर्शयति एवम्भूतमिति तर्हि केषामात्मदर्शनं तदाह ये तु पुनरिति १०

स्वामिकृत टीका ३

ननु च कार्यकारणसंघातव्यतिरेकेणैवंभूतमात्मानं सर्वेऽपि किं न पश्यंतीति तत्राह उत्क्रामंतमिति उत्क्रामंतं देहाद्देहान्तरं गच्छन्तं तस्मिन्नेव देहे स्थितं वा विषयान् भुंजानं वा गुणान्वितं इंद्रियादियुक्तं जीवं विमूढा नानुपश्यंति नावलोकयंति ज्ञानमेव चक्षुर्येषां ते विवेकिनः पश्यंति १०

पिशाचभाष्य टीका ४

उत्क्रामंतं शरीरात् तिष्ठंतं वापि शरीरे भुंजानं वा विषयानुपल
म्भमानं गुणान्वितं गुणैस्सत्त्वरजस्तमोभिः बुध्याद्याकारप

श्री
गी॰ टी॰
पं॰

55

रिणतैः अन्वितमतिमूढाः कार्यकारणसंघाते आत्मत्वदर्शिनः
नानुपश्यंतिनोपलभ्यते ज्ञानेवक्षुर्येषांते ज्ञानचक्षुषः ज्ञान
चक्षुषोभूत्वाकिंनपश्यंतीत्यर्थः १०

रामानुजभाष्य टीका ५

तदिति यपनंगुणान्वितं सत्वादिगुणमयप्रकृतिपरिणाम
विशेषमनुष्यत्वादिसंस्थानपिंडसंसृष्टंपिंडविशेषादुत्क्रामं
तंपिंडविशेषेवस्थितंवागुणमयान्विषयान्भुंजानंवाकदाचि
दपिप्रकृतिपरिणामविशेषमनुष्यत्वादिपिंडाद्विलक्षणं
ज्ञानैकाकारंविमूढानानुपश्यंति विमूढाःमनुष्यत्वादि
पिंडाकारात्माभिमानिनःज्ञानचक्षुषस्तुपिंडात्मविवेकवि
षयज्ञानवंतःसर्वावस्थमप्येनंविविक्ताकारमेवपश्यंति १०

अभिनवगुप्तकृत टीका ६ एकादशे श्लोके एकार्थम् १

स्पष्टार्थं १

परमार्थप्रपा टीका ७

अथैनदेवप्रकटयन्नाह उत्क्रामंतमिति विमूढाःस्वपरमात्मानंप्राणो
नहमिवमन्यंतेवाशब्दःअथवाउत्क्रामंतमितोदेहाद्गच्छंतंमन्वते
नद्रके द्रष्ट घटाकाशमात्रस्यविनाशेदेहनाशतः स्वयंभूता
निशोचंतिनद्वआत्मेतिशंकयेति तथादेहाकारेणस्थितंभुंजा
नंगुणान्वितंवाअनवेलंपश्यंति अथज्ञानरूपंचक्षुर्येषांतेतत्वद
र्शिनःस्वदेहादन्यदेहप्रतिनीयमानस्यघटस्यतदाहृताका
शवल्लिंगदेहाहृतमात्मानमुत्क्रामंतंअनवेलंपश्यंति तथाभ्रम
त्कुलालचक्रकीलकवत्स्थितंपश्यंति तथाप्रतिमारूपदेवतादृ
शितनैवेद्यवद्भुंजानंपश्यंति तथाकाचमणोदरप्रतिफलितजपा
कुसुमारुणतायोगवत्सत्वादिगुणान्वितंपश्यंति तथावोत्क्रांत
वात्मनोव्यापकत्वात्क्रमनागमनेनसंभवतिकिंतुलिंगदेहाधि
ष्ठितंमनएवगच्छतीतिपूर्वंव्याख्यानमेवं श्रुतिरपि यत्रैषमेवे
वसन्तंमनोजगामदूरकं ततआवर्तयामसीहक्षयायजीवसे

इति भाष्यं तत्र पूर्वं सनातिनाम्नो राज्ञश्चत्वारः सर्वे ध्वादयः सहोद
राः पुरोहिता आसन् तेषु सर्वेषु केश्चिन् हेषिभिर्विमैरभिचारि
केण हतस्तेषु पुनर्जीवयितं त्रयो वंधवृहस्पत्रे सूक्तं तथा इमम
त्रे पठंति [illegible] इति भोसर्वं धोयतेमनः दूरकं दूरं यथाभव
ति तथैव वैवस्वतं विवस्वतः सूर्यस्य पुत्रं यमं प्रतिजगाम ततेमनः
इहस्मेन शरीरे आवर्त्तयामसि पुनरावर्त्तयिष्यामि कस्मै प्रयोज
नाय सत्याय पुनरिह वसतये तथा जीवसे चिरकालं जीवनाय ९

वनमाली टीका ९

उत्क्रामंतं देहांतरं गच्छंतं पूर्वस्मात् स्थितं वापि तस्मिन्नेव देहे भु
ञ्जानं वा शब्दादीन् विषयान् गुणान्वितं सुखदुःखमोहात्मकैः
सत्वादिगुणकार्यैरन्वितं एवं सर्वास्ववस्थासु दर्शनयोग्यं स
च्चिदानंदघनं विमूढा देहादिभोगवासनाकृष्टचेतसस्तामत
त्वविवेकायोग्यत्वान्नानुपश्यंति येत ज्ञानचक्षुषो विवेकिनस्ते पश्य
त्येव ९

ऊसमवैजयन्ती टीका ९

ननु प्रदियः शरीरस्थः सर्वेंद्रियैः सर्वविषयान्भुंक्ते न हि सर्वैर्जनैः
सकृत्तोनूनत्तायत इत्याशंक्याविवेकिभिरेव ज्ञायेत न तु विवेकिभि
रित्याह उत्क्रामंतमिति गुणान्वितं प्रकृतिपरिणामसत्वादिगुणम
यमनुष्यादिसंस्थानशरीरसंसृष्टं यद्वा सुखदुःखमोहसंस्पादिभिर
न्वितं युक्तं गुणमयाच्छरीरादुत्क्रामंतं निस्सरंतं तस्मिन्नेव शरीरे स्थितं वा
गुणमयान्विषयान्भुंजानं वा एवंभूतमनुभवाहमयमात्मानं विमू
ढा मनुष्यत्वादिशरीराभिमानिनश्चिरंतनवासनाकृष्टचित्ततया
विवेकज्ञानहीना नानुपश्यंति कदाचिदपि प्रकृतिपरिणामवि
शेषमनुष्यत्वादिपिशाचद्विलक्षणं ज्ञानैकाकारमात्मानं नानुभ
वंतीत्यर्थः ज्ञानचक्षुषो विवेकज्ञानेनोत्पन्नमात्मानं पश्यंति
शरीराद्विविक्तमनुभवंति ९

मधुसूदनी टीका ९

^एवं देहगतं दर्शनयोग्यमपि देहात् ॥

^उत्क्रामंतं पूर्वस्माद्देहाद्देहांतरं गच्छंतं स्थितं वापि तस्मिन्नेव देहे
भुंजानं वा शब्दादीन्विषयान् गुणान्वितं सुखदुःखमोहात्मकैः

गुणैरन्वितं एवं सर्वास्ववस्थासु दर्शनयोग्यमप्येनं विमूढा दृष्टादृ
ष्टविषयभोगवासनाकृष्टचेतस्तया आत्मानात्मविवेकायोग्यत्वाना
न पश्यंति अहो कष्टं वर्तते इत्यज्ञान नु क्रोशति भगवान् ये तु
प्रमाणजनितज्ञानचक्षुषो विवेकिनस्त एव पश्यंति [illegible]
[illegible] १०

सदानंदी टीका ११

एवं देहगतं जीवं दर्शनार्हमपि स्फुटं देहांतरं च गच्छंतं पूर्वस्मा
द्देहतस्तथा १ तस्मिन्नेव स्थितं वापि देहे भुंजानमादरात् शब्दादी
न्विषयान्युक्तं सुखदुःखादिभिर्गुणैः एवं सर्वास्ववस्थासु दर्शना
र्हं हि सात्विकं विषयाकृष्टचित्तत्वाद्देहाद्यध्यासतो जडाः २ मोहा
ज्ञाना न पश्यंति स्वात्मानं तं हि लक्षणं अहो कष्टं किलेत्यज्ञानं नु क्रो
शति माधवः ३ ये तु प्रमाणज्ञानचक्षुषस्ते विवेकिनः पश्यंती
ति पुराणाख्यानेनेति श्रीहरिरुक्तवान् १०

नीलकंठी टीका १२

तमेवंभूतं मनःषष्ठानींद्रियाणि प्राणं वाधिष्ठाय तेषामुत्क्रमणेनो
त्क्रामंतं तेषां स्थित्या स्थितं तेषां भोगेन भुंजानं तेषां सत्वरजस्तमोगु
णयुक्तत्वेन गुणान्वितं च घटरूपमिव घटाकाशमिव वा घटगमना
दिमंतं स्वतस्तूत्क्रमणादिशून्यमपि विमूढास्तात्विकरूपेनानुप
श्यंति ज्ञानचक्षुषस्तु पश्यंति उपाधेरेवोत्क्रमणादिकं न तूपहित
स्यात्मन इति जानंत्येवेत्यर्थः १०

आनंदी टीका ११

निष्क्रामंतमस्मिन्नेव शरीरे वर्तमानमनुत्क्रमंतमिदं शरीरं त्य ९
क्त्वा शरीरांतरं गच्छंतम् गुणान्वितं गुणानां सत्वादीनामन्वितं
कार्यकारणत्वेन समवेतं फलं दुःखमोहात्मकमिह परत्र च भुं
जानं विमूढास्तमस्मान्यानानुपश्यंति ज्ञानचक्षुषः पश्यंति यावि
ज्ञाय विमुच्यंते तावद्देहदेहिनः यथा तृणजलायुकातृणस्या ९
श्रितः पूर्वस्यांतं गत्वा तृणांतरमाश्रयति तथात्मिन्देहे विषयानुप
भुंज्या वासिष्ठकर्मफलभोगार्थं देहान्तरमाश्रयतीति सादात्तक

र्वंति अत्रोपायमाह ९ ॥

रामकंठटीका १४

तिष्ठंतं लब्धव्यपदेशमात्मानं कस्मिंश्चिच्छरीरे तेन तेन जात्यादिना व्यप
देशेनाऽवच्छिन्नतया स्थितिमनुभवंतं तथोत्क्रामंतं तस्मात्तद्दे
शाच्छरीराच्छरीरांतराश्रयणयोगाच्छन्नं जन्ममरणयोगित्वव्य
पदेशं भजंतं तथा तदंतराले गुणान्वितं सत्त्वादिगुणसंयुक्तं शब्दा
दिविषयजं सुखदुःखात्मकं भोगमुपभुंजानं वेदकत्वमात्रेण तद्भोक्तृ
त्वव्यपदेशभाजमिति जन्ममरणस्थित्यवस्थास्वप्येतस्मिन्नेव स्वा
भाविके सर्वदेहाधिष्ठातरि स्वरूपेणागुणक्रमेण वर्तमानं विमू
ढा मायाशक्तिमहिम्ना मनागपि स्वरूपप्रत्यवमर्शानुन्मेषलक्ष
णेन विशेषेण मूढा विचेतसः सम्यग्ज्ञानरहिता नानुपश्यंति
पारमार्थिकरूपेण स्थितमपि तथा प्रत्यवमर्शाभावान्न साक्षात्कु
र्वंति के तर्हि तं पश्यंतीत्याह ज्ञानचक्षुषः ज्ञानं यथावस्थितव
स्तुसंवेदनमेव चक्षुर्लोचनं येषां ते पश्यंत्यात्मतया साक्षात्कुर्वंति
नह्यसौ रूपात्मकविषयसाधनभूतेन चक्षुरात्मनेंद्रियेण दृश्यते
तद्दर्शने सम्यग्ज्ञानमेव साधनमतस्तत्र चक्षुष्ट्वेन निरूपितं किं
च ९ ॥

+ नन्वेवं सोपाधिकत्वेनास्य जीवस्य स्थूलतया सर्वेषां दृशां गोचरत्वप्रसक्तिरित्यत आह ॥

लासिकी [illegible]टीका १५

+ एवं जीवमुत्क्रामंतं देहान्निःसरंतं वा स्थितं वापि देहे स्थितिं गृह्णंतं
वा गुणान्वितं गुणविकारैरिंद्रियादिभिः सहितं शब्दादीन्विषयान्
भुंजानं वा विमूढा देहाहंमानिनो नानुपश्यंति न साक्षात्कुर्वंति किं तु
ज्ञानचक्षुषः प्रत्यभिज्ञालक्षणज्ञाननेत्रयुक्ताः एवं जीवमेतादृशव
स्थानुपश्यंत्येव [illegible] ९ ॥

पंचोले टीका

ननु देहेंद्रियादिसंघातव्यतिरेकेणैवंभूतमात्मानं सर्वे किं न प
श्यंतीत्यत आह उत्क्रामंतमिति एवं देहगतं जीवं पूर्वदेहादुत्क्रामंतमपि
वा स्थितं तस्मिन्देहे वर्तमानं वा शब्दादीन्विषयान्भुंजानमुपल

भुञ्जानं गुणान्वितं गुणकार्यैः सुखदुःखमोहाद्यैः अन्वितं सं एवं
भूतमप्यन्तदर्शनगोचरप्राप्तमपि विमूढाः दृष्टादृष्टविषयभोगब
लात्क्रष्टचित्ततयानेकधा मूढा नानुपश्यन्ति अहो कष्टमि
त्याक्रोशति भगवान् ये तु प्रमाणजनितज्ञानचक्षुषो विविक्तदृ
ष्टयः ते एनं पश्यन्ति ९

रणवीरसमिद्धोधिनी ॥

देहगतत्वादयं जीवो दृश्यः किं न भवतीत्याशङ्क्योत्क्रामन्तमिति
पूर्वस्माद्देहाद्देहान्तरं गच्छन्तं स्थितं वापि तस्मिन्देहे भुञ्जानं
वा शब्दादीन्विषयान्भुञ्जानं वा गुणान्वितं सुखदुःखमोह
त्मकैर्गुणैरन्वितमेवं सर्वास्ववस्थासु दर्शनयोग्यमप्येतं वि
मूढा भार्यापुत्रादिभोगदार्ढ्यमोहिताः अतः कारणादेवं नानु
पश्यन्ति ये तु ज्ञानचक्षुषः ज्ञानं चक्षुर्यस्य ज्ञानविषयो निश्च
यः स एव चक्षुर्येषां ते ज्ञानचक्षुषस्ते तु सम्यगनुभवितस्व
धर्मित्वान्निष्कल्मषा एनं पश्यन्तीत्यर्थः १०॥

मधुभाष्य

उत्क्रामन्तमित्यादिना यत्नतो ज्ञानं प्राप्य प्रकृतात्मानोऽ
शुद्धबुद्धयः पूर्वोक्तमेव ज्ञानं प्रपञ्चयति १०॥

भाषाअनुवादटीका

जो कहो कि ऐसे आत्मा को कार्य कारण समूह से भिन्न रूप स
ब कोई क्यों नहीं देखते इस पर कहते हैं कि देहान्तरगामी अ
थवा उसी देह मे स्थित या विषयभोगी किम्बा इन्द्रियादियु
क्त जीव को विशेष मूढबुद्धि सब नहीं देखते हैं परन्तु ज्ञान
हीं जिस के नेत्र हैं ऐसे विवेकी मनुष्य ही देखते हैं १०

दोहा

जातहि अथवा स्थितहि को भोगत गुण संग कोय मूढ
लखें नहि ताहि को ज्ञान नयन लख सोय १०

58

यतंतोयोगिनश्चैनंपश्यंत्यात्मन्यवस्थितं य
तंतोप्यकृतात्मानोनैनंपश्यंत्यचेतसः ११

शांकरभाष्य टीका १

केचित्तुयतंतः प्रयत्नं कुर्वंतोयोगिनश्च समाहितचित्ताएनं प्रकृ
तमात्मानं पश्यंत्ययमहमस्मीति उपलभंते आत्मनि स्वस्यां बुद्धा
ववस्थितं यतंतोपि शास्त्रादिप्रमाणैरकृतात्मानोऽसंस्कृतात्मा
नः तपसेंद्रियजयेन चदुश्चरितादनुपरताअशांतदर्पाः प्रय
त्नं कुर्वंतोनैनं पश्यंत्यचेतसोऽविवेकिनः ११

आनंदगिरिकृत टीका २

ज्ञानवत्वः शब्देनन्यायानुगृहीतं शास्त्रं ज्ञानसाधनमुक्तं तत्कि
मिदानीं शास्त्रमात्रेण न्यायानुगृहीतेनात्मानं पश्यंति नेत्याह के
चिदिति प्रयत्नः श्रवणमननात्मकः शास्त्रादिप्रमाणैर्यतंतोपी
ति सम्बन्धः असंस्कृतात्मत्वं प्रकटयति तपसेति दुश्चरितादवि
रतिफलं कथयति अशांतेति अशुद्धबुद्धीनामविवेकिनां सद
पि श्रवणादि न फलवदिति मत्वाहप्रयत्नमिति ११

स्वामिकृत टीका ३

दुर्ज्ञेयश्चायं यतोविवेकिष्वपि केचिदेव पश्यंति केचिन्न पश्यंती
त्याह यतंत इति यतंतोध्यानादिभिः प्रयतमानायोगिनः केचि
दात्मानमेनमात्मनि देहेवस्थितं विविक्तं पश्यंति शास्त्राभ्यासादि
भिः यत्नं कुर्वाणाअपि अकृतात्मानः अविशुद्धचित्ताः अतएवाचे
तसो मंदमतयः एनं न पश्यंति ११

केशवभाष्य टीका ४

यतंतः यमनियमादियोगानुष्ठानेनप्रयत्नं कुर्वाणाः यतमानायो
गिनः योगः सम्यग्ज्ञानेनतत्रप्रवृत्ताः एनमात्मानं पश्यंत्युपलभंते
आत्मनि शरीरे यतंतोयोगानुष्ठानेप्रयतमानाअप्यकृतात्मानः
अप्राप्तवैराग्याभ्या[illegible]मसंस्कृतांतःकरणाः नैनंपश्यंत्यचेत
सः अविवेकिनः ११

रामानुजभाष्य टीका ५

श्री· गी· टी· पं·

59

यतंतश्चेति मत्प्रपत्तिपूर्वकं कर्मयोगादिषु यतमानास्तैर्निर्मलांतःक
रणा योगिनो योगाख्येन चक्षुषात्मनि शरीरे वस्थितमपि शरीरा
द्विविक्तं स्वेन रूपेणावस्थितमेनं पश्यंति यतमाना अप्यकृतात्मा
नो मत्प्रपत्तिविरहिणास्तत एवासंस्कृतमनसः तत एवाचेतसः
आत्मावलोकनसमर्थचेतोरहिताः नैनं पश्यंति एवं रविचंद्रादी
नामिंद्रियसन्निकर्षविरोधिसंततमसनिरसनमुखेनेंद्रियानुग्रा
हकतया प्रकाशकानां ज्योतिष्मतामपि प्रकाशकं ज्ञानं ज्योति
रात्मा मुक्तावस्थो जीवावस्थश्च भगवद्विभूतिरित्युक्तं तद्धाम परं
मममैवांशो जीवलोके जीवभूतः सनातन इति [illegible]
[illegible]
[illegible] ॥११॥

अभिनवगुप्तकृत टीका १

मनश्चास्यनेनेति नानुकरणमपलक्ष्यते अत एव शरीरस्थितियोगाति २१
शूते शरीरं नरग्रहणायोक्तामंते विषयान्वाभुंजानं मच्छानप
यंत प्रबुद्धत्वात मतुद्धात्मसर्वमेव बोधरूपमनवसंदधानाज्ञा
नेस्यैव त्पलग्नसमाधयस्तेषां यत्नपरत्वात अकृतात्मनोनुयत्ना
पिनफलायापरिपक्वकषायत्वात नहि शरदि सलिलादिसाम
ग्रीसंमर्देपि धान्यबीजान्युप्यमानानि फलसंपदे लं अत एव सा
मग्र्यवसायनभवति अस्पदेव किलमधुमाससंमूर्छनजलध
रपटलीप्रेरितमेमभः कावदेवचसाभूः यस्यांशिशिरविवशीकृता
गारविकस्स्पर्शेनैव कांतिः एवमकृतात्मनां यत्नेन सकलाग
परिपूर्णकत्वमायाति अत एव प्राप्याप्युपायं पारमेश्वरदीक्षा
टियेतथाविधक्रोधमोहादिस्थितसंदर्भगर्भीकृतांतर्हेशाले
भूपाय एव साकल्येन भजंतीति मंतव्यं तदुक्तं क्रोधाद्रोहश्च
मानेहि दीक्षितोपि न मुक्तिभागिति ॥११॥

परमार्थप्रपा टीका २

अथ ज्ञानचक्षुषोपि हेयाश्च नुभवितः शास्त्रज्ञानवंतश्चेति दर्श
यति यतंतश्चेति स्वरूपमात्मस्वरूपं यतंतः प्रयत्नं कुर्वंतो योगिन ए
नमात्मानं आत्मनि देहांतर्हृदयाकाशे वस्थितं पश्यंति यथाश्र

कृतात्मानोऽनधिगततत्त्वार्था अत एवाचेतसोऽल्पबुद्धयः शास्त्रप
ठनादिभिरुपायैर्यतंतोप्येनेनं पश्यंति ॥

वनमाली टीका ११

तदेव विवृणोति आत्मनि देहेवस्थितं ज्ञानानंदघनं योगिनः प
काग्रचित्ताः यतंतो विषयेभ्य इंद्रियप्रत्याहारं कुर्वंतः पश्यंत्ये
नं जीवस्वरूपं अकृतात्मनोऽशोधितांतःकरणाः अत एवाचेतसो
विवेकशून्या नैनं पश्यंति महांतस्तु शरीरं यदवाप्नोत्यारम्भ
यतंतोप्यकृतात्मान इत्येतमीश्वरपरतया व्याचक्षते तत्सम्यग्
वात्ते यत्त्वस्य मुख्यस्य भगवत एव संभवात् परं तु यदवाप्नोत
क्रामतीत्यादौ सर्वत्रोत्तरभावित्वात् गौणत्वं वाच्यः जीवशरीरमा
प्य यत्तु क्रमयतीत्यादि ॥

ऊस्तम वैजयंती टीका ११

येमत्प्रपत्तिपूर्वककर्मयोगेन शुद्धांतःकरणास्त एव ज्ञाननेत्रेणैनं
पश्यंति ये तु मत्प्रपत्तिविरहिणस्ते यतमाना अपि न पश्यंतीत्याह यतंतो य
मात्मा विद्वांसो यद्वा प्रत्याह यतंत इति केचिद्योगिनो यतंतो मत्प्रपत्तिपू
र्वकेषु फलानुसंधानरहितश्रवणादिमत्कर्मयोगादिषु यतमानाः
शुद्धांतःकरणा ज्ञानयोगाख्येन चक्षुषा आत्मनि स्वशरीरेऽवस्थितं
शरीराद्भिन्नस्वरूपेणैवावस्थितमेनमात्मानं पश्यंति केचित्तु योगि
नो यतंतोपि कर्मयोगादिषु यतमाना अपि मत्प्रपत्तिविरहिता म
लिनांतःकरणा अकृतात्मानो संस्कृतमनसोत एवाचेतसः स्वस्व
रूपावलोकनासमर्थचित्ताः एनं शरीरस्थमप्यात्मानं न पश्यंती
त्यात्मतत्त्वं दुर्ज्ञेयमिति भावः ॥

^पश्यंतीति ज्ञानचक्षुष इत्येतद्विवृणोति ॥

मधुसूदनी टीका ११

^आत्मनि स्वबुद्धाववस्थितं प्रतिफलितमेनमात्मानं यतंतो ध्याना
दिभिः प्रयतमाना योगिन एव पश्यंति चोवधारणे यतमाना अप्यकृ
तात्मानः यज्ञादिभिरशोधितांतःकरणाः अत एवाचेतसो विवे
कशून्या नैनं पश्यंतीति मूढा नानुपश्यंतीत्येतद्विवरणं इदानीं
यत्पदं सर्वावभासकत्वमाह यदादित्यादयोपि भासयितुं न क्षमंते
यत्प्राप्ताश्च मुमुक्षवः पुनः संसाराय नावर्तंते यस्य च पदस्योपाधिभे

श्री. गी. टी. पं.

60

दमनुविधीयमानाजीवाः घटाकाशादयइवाकाशस्यकल्पितांशा
स्तथैवसंसारमनुभवंति तस्यपरस्यसर्वात्मत्वसर्वव्यवहारास्पदत्व
प्रदर्शनेन ब्रह्मणोहिप्रतिष्ठाहमितिप्रागुक्तं विवरीतुंच त्रिभिः
श्लोकैरात्मनोविभूतिसंक्षेपमाह ॥

सदानंदी टीका ॥

विहणोतिमद्देवेशो विभागेन यथायथं ध्यानाद्यैर्यतमानायेप
श्यंति स्वादिणं यतोविवेकस्त्रात्तेमोहाक्रांताः स्वरागिणः ॥

नीलकंठी टीका ॥

यतंतो यत्नशीला योगिनश्चैनं आत्मनि बुद्धौ अवस्थितं विभुमु
क्तांन्यादिहीनं असंगं पश्यंति यतंतोपि अकृतात्मानः येयज्ञादि
भिरशोधितचित्ताः एनं न पश्यंति यतः अचेतसः अविजितचि
त्ताः पाषाणतुल्याइत्यर्थः ॥

आनंदीटीका ॥

योगिनो योगाभ्यासेन समाहितचेतसः यतंतः श्रवणादियत्नपराः
येनमात्मानमात्मनि हृदये अवस्थितं पश्यंति अकृतात्मानः अनात्म
ज्ञाः यतंतोपि यत्नपरा अपि अचेतसः असमाहितचित्ता न पश्य
न्ति नतज्ञासयनेस्त्वैरतियदुक्तं लक्षयति ॥

रामकंठीटीका ॥

येपिज्ञानचक्षुषोयोगिनः समाहितास्तथ्येन परमात्मानं यथोक्त
क्रमेण यतमाना नित्याविलप्तोत्साहतया यत्नपराः संतआत्म
न्यवस्थितं सदास्वभावतया परोक्षतया वर्तमानमेव पश्यंति यथा
वत्स्वभिजानंतीत्यर्थः अकृतात्मानस्तु यतमाना अप्येनं न पश्य
तीति किमुक्तं भवति परमेश्वरानुग्रहं विनानुष्ठितसम्यग्
ज्ञानत्वादकृतस्तद्दर्शनायासंपादितआत्मान्तःकरणं यैस्ते तादृ
शाअसत्प्रसंगभाजो यतमाना अपि नतेनकेनचित्प्रकारेणाद्य
मा अपि नैनं पश्यंति सम्यग्ज्ञानलक्षणस्य मध्यस्य तद्दर्शनसाधन
स्याभावात् यस्मादेवमद्भुतशक्तिः परमात्मा सोहमेवत्यात्मनि
तत्त्वेनं तत्त्वरूपं प्रतिपादयितुमाह ॥ ११ ॥

कथंपश्यंतीत्यपेक्षायामा लास्तिकी [illegible]टीका १५

ह योगिनोबुद्धियोगाद्यभ्यासमयोगयुक्तायतन्तः ध्यानादिभिः प्रयत्न
मानाः एनंजीवमात्मन्यवस्थितमात्मत्वेनस्थितंपश्यन्तिसाक्षात्कुर्व
न्ति ननुस्वतोव्यतिरेकेण अन्येषांदर्शनाभावमाह येचेनमेवंविवेक
शून्याअकृतात्मानोयंजीवोनकृतंआत्मायैस्ते एनंजीवंभेदेनविमर्श
नइत्यर्थः तेयतन्तोपिध्यानादिनाएनंनपश्यन्तिनसाक्षात्कुर्वन्ति

[illegible]

[illegible] ११ ॥

पंचोले टीका

अपितुदुर्विज्ञेयत्वादात्मनोविविक्तस्यापिकेचिदेवसुकृतिनः पश्यं
तिनसर्वेइत्याह यतन्तइति चपुनः योगिनःसमाहितचित्ताःय
तंतोयत्नंकुर्वन्तः एनंप्रकृतिस्थमात्मानंस्वात्मनिस्वस्मिन्बुद्धावअ
वस्थितंपश्यन्तिअनुभवन्तिअकृतात्मानः अजितेन्द्रियाःअप्रशान्तदर्पा
अचेतसःअविवेकिनंशास्त्रादिप्रमाणैरात्मविचारमकुर्वन्तो एनमा
त्मानंस्वबुद्धिस्थितमपिनपश्यन्ति ११

रसवीरसमिद्धायिनी ॥

एतदेवविवृणोति यतन्तइति एनंजीवंइहयोगिनः कर्मयो
गिनोयतन्तेस्वधर्मानुष्ठानेनेति तथाते आत्मनिदेहेस्थित
मेनंनपश्यन्ति अकृतात्मानइति नकृतःशोधितःस्वधर्मा
चरणेनात्माबुद्धिर्यैस्तेअकृतात्मानोदुष्टबुद्धयइत्यर्थः एनं
द्रष्टुंयतन्तोपिकृतप्रयत्नाअपि अचेतसइति नचेतोयेषामि
ति नञ्समासेन नञाहः कृत्स्नायांकृत्स्नायामपिनस्वतेयइ
लौकिकेतत्वावायमर्थः नकृतःस्वधर्मस्याकरणात्सकल्मष
चेतोयेषांते अचेतसोदुष्टमानसाइत्यर्थः अतएवमलिनम
नोबुद्धिवाणिषुमग्नाःमूढाः कथमेनंप्रपश्यन्तीतिभावः ११

मधुमाध

११

61

भाषाअनुवादटीका

औ़र यहै आत्मा दुर्विज्ञेय है क्यों कि विवेकियों के बीच भी को
ई देखते और कोई नहीं देख सकते है सोई कहते हैं कि ध्यान
आदि के द्वारा यत्नकारी योगी जन अपनी शरीर मे इस आ
त्मा को पृथक रूप से देखते हैं और शास्त्र अभ्यास से यत्न
करके भी अकृतात्मा अर्थात अशुद्धचित मन्दमति लोग इस
आत्मा को नहीं देखते हैं ॥

दोहा

यत्नकरत योगी हृदै देषत अपने मेहुं यत्नकरतभी
मूढ शठ लषन अचेतन तेहुं ॥

62

यदादित्यगतंतेजोजगद्भासयतेखिलं यच्चं
द्रमसियच्चाग्नौतत्तेजोविद्धिमामकं १२

शांकरभाष्य टीका १

यत्पदंसर्वस्यावभासकमप्यग्न्यादित्यादिकं ज्योतिर्नावभासयते
यत्प्राप्ताश्च मुमुक्षवः पुनः संसाराभिमुखा न निवर्तन्ते यस्य च प
दस्योपाधिभेदमनुविधीयमानाजीवा घटाकाशादयइवाकाशस्यां
शास्तस्यपदस्य सर्वात्मत्वं सर्वव्यवहारास्पदत्वंच विवक्षुश्चतुर्भिः
श्लोकैः विभूतिसंक्षेपमाह भगवान् यदिति यदादित्यगतमादित्या
श्रयं किंतत् तेजोदीप्तिः प्रकाशोजगद्भासयते प्रकाशयत्यखिलं
समस्तं यच्चन्द्रमसि यच्चशशभृति तत्तेजोवभासकं वर्तते यच्चा
ग्नौ हुतवहे तत्तेजोविद्धि विजानीहि मामकं मदीयं मम विष्णोस्तत्
ज्योतिः अथवा यदादित्यगतं तेजश्चैतन्यात्मकं ज्योतिश्चन्द्रमसि य
च्चाग्नौ तत्तेजोविद्धि मामकंमदीयं ममविष्णोस्तत्ज्योतिरित्यादि
ननु स्थावरेषु जङ्गमेषु चतत्समानं चैतन्यात्मकं ज्योतिस्तत्र कथ
मिदं विशेषणं यदादित्यगतमित्यादि नैषदोषः सत्त्वाधिक्यादावि
र्भावोपपत्तेरादित्यादिषु हि सत्त्वमत्यन्तप्रकाशमत्यन्तभास्वरमतस्त
त्रैवाविस्तराज्योतिरितितद्विशिष्यते नतु तत्रैव तदधिकमिति
यथाहि लोके तुल्येपिमुखसंस्थानेन काष्ठकुड्यादौ मुखमाविर्भ
वति आदर्शादौ तु स्वच्छेस्वच्छतरे तारतम्येनाविर्भवति तद्वत् १२

आनंदगिरिकृत टीका २

अनन्तरश्लोकचतुष्टयस्य तात्पर्यानुवादद्वारा तात्पर्यार्थमाह तत्प
दमिति जीवात्मत्वेन विरूपत्वमुक्त्वा तदीयचैतन्येनादित्यादीनाम
वभासकत्वाच्च ब्रह्मणोपि रूपत्वमित्याह यदादित्येति विरूपस्यैव
ब्रह्मणः सर्वात्मकत्वप्रतिपादकत्वेन श्लोकं व्याचष्टे यदित्यादिना आ
दित्यादौ तव तत्र स्थितं ब्रह्मचैतन्यज्योतिः सर्वावभासकमित्यर्थः
ब्रह्मणः सर्वगतत्वेन विरूपत्वमत्र विवक्षितमिति व्याख्यान्तरमाह
अथवेति चैतन्यज्योतिषः सर्वत्राविशेषादादित्यादिगतं विशेषण
मयुक्तमिति शङ्कतेनन्विति सर्वत्र सत्त्वेपि क्वचिदेवाभिव्यक्तिविशे

श्री·
गी·टी·
पं·

63

षाद्विशेषणमिति परिहरति नैषदोषइति तदेवप्रपञ्चयति आदि
त्यादिष्विति सर्वत्रैव चैतन्यज्योतिषस्त्वे त्वेपि क्वचिदेवाभिव्यक्त्या लॅप
विशेषणोपपत्तिं दृष्टान्तेन स्पष्टयति यथाहीति ॥ १२

स्वामिकृत टीका ३

तदेवंनतद्भासयतेसूर्यं इत्यनेनपारमेश्वरंपरंधामोक्तंतत्प्राप्तानां
वापुनरावृत्तिरुक्तातत्रसंसारिणोभावमशंक्यसंसारित्वरूपंदे
हादिव्यतिरिक्तंदर्शितं इदानींपारमेश्वरंरूपमनन्तशक्तित्वेननिरू
पयतियदादित्येतिचतुर्भिः आदित्यादिषुस्थितंयत्तेजोऽनेकप्रका
रंतेजोविश्वंप्रकाशयति तत्सर्वंतेजोमदीयमेवजानीहि ॥ १२

पिशाचभाष्य टीका ४

अतोयतमानाअप्यकृतात्मानोनैवपश्यंत्यपिअहमात्माअनेक
यत्नात्मसंस्कारसाध्यत्वात्दुर्विज्ञेयस्तत्रापिसकललोकप्रसि
द्धोहमित्याह यदादित्यगतंतेजः प्रकाशः अखिलंजगद्भासय
ते यच्चंद्रमसितेजः यच्चाग्नौतत्तेजोविद्धिमामकं तथाचश्रु
तिः येनसूर्यस्तपतितेजसेद्धस्तदहंज्योतिरिति ॥ १२

रामानुजभाष्य टीका ५

यदिति अखिलस्यजगतोभासकंतेषामादित्यादीनांयत्तेजस्तन्मदीयं
तेजस्तैराराधितेनमयातेभ्योदत्तमितिविद्धि [illegible]
[illegible]

+ इदानीमचिंत्यपरिणामविशेषमादित्यादीनां
ज्योतिष्मतांज्योतिरपिभगवद्विभूतिरित्याह ॥
स्पष्टार्थं १२

अभिनवगुप्तकृत टीका ६ + चतुर्दशी [illegible] १२

॥

परमार्थप्रपा टीका ७

अथनतद्भासयतेसूर्यं इत्यादिनासूर्यादीनांभक्तीनामपिप्रमाणं
नगोचरस्यात्मनोदर्शकत्वमनभिमतंकिंपुनः शास्त्राभ्यासप्र
यत्नस्येतिसूचयन्सूर्यादीनांस्वप्रकाशत्वंस्वदत्तसामर्थ्यवत्त्वंच
निरूपयन्नाह यदिति दिवात्रैलोक्यप्रकाशकमादित्यगतंयत्तेज
स्तथारात्रौचंद्रस्यज्योत्स्नारूपंअग्नेदीपरूपंयत्तेजस्तन्मामकंमदी
यंविद्धिजानीहि योसावादित्येपुरुषः सोसावहमितिश्रुतेः तैत्तिरी
यकेपि यास्तेअग्नेसूर्येरुचउद्यतोदिवमातन्वंतिरश्मिभिः ताभिः

सर्वाभिश्चैवेजनापनस्फूर्ति भाषांशोभोश्रयिसर्वे स्वरउयतः
सद्भिदितस्यनेनवयात्ऋचोदीमयः सूर्यवर्तमानाः संख्योरश्मि
भिः किरणैर्दिवस्वर्गेश्चानन्दंतिथ्यामवंतिनाभिः सर्वाभिश्च
र्मिभिनेसस्यजनायज्ञविदीमयेकुरु तद्धास्मयोपि शूद्रोहवैवास्येयज्ञादित्येनसमाजगामेति
भाष्ये शूद्रः श्रोत्रवणशक्तिमांस्तेजोरूपयाविभूत्या
वारस्येयः हस्सआदित्येनसमाजगामेतिस्पष्टं १२॥

वनमाली टीका ८

उक्तऽर्थेयस्यस्वरूपज्ञानमुक्तं हरिभक्तिर्नोभवतिसातन्मा
हात्म्यज्ञानादेवभवतीति [illegible] स्वमाहात्म्यमाहयदितिचतुर्भिः य
दादि [illegible] त्यगतंतेजःस्थितंयच्चंद्रमसियच्चाग्नौस्थितमनेकप्रकारं
भास्वरंरूपंपरप्रकाशकंतेजोविश्वंप्रकाशयतितत्सर्वंमामम
कंमदीयंविद्धिअहमेवादित्यादिषुसर्वंप्रकाशयामीत्यर्थः
यद्वादित्यादिषुपरप्रकाशनरूपंतेजस्तत्ममदीयंममहत्तमद
धीनंचविद्धीत्यर्थः नमेवभांतमनुभातिसर्वंतस्यभासासर्व
विभातीतिश्रुतेः १२

ऊसमवैजयन्ती टीका ९

एवंचेतनानांसर्वेषांज्ञानलाभादिशक्तीनिभिः प्रकाशनहेतुत्वेन
प्रकाशकत्वेनभगवदंशत्वेनचभगवद्विभूतित्वमुक्त्वाधुना
सूर्यादिषुयः प्रकाशकादिरूपोवैनतभागः सोपिभगवद्विभू
तिरितिदर्शयन् [illegible] संसारसक्तानामनुद्गतानांजीवानां [illegible]
[illegible] भुक्तिमुक्तिसाधनरूपोभगवानहमेवेतिभावेनाहचतु
र्भिः यदादित्यगतमिति यदखिलंसर्वंजगद्भासयतेप्रकाश
यति आदित्यगतंसूर्यस्थितंतत्तेजोनितिः यच्चचंद्रमसितेजोय
च्चाग्नौतेजस्तत्सर्वंमामकंमदीयंविद्धिनै [illegible] सूर्यादिभिरा
राधितेनमयात्मप्रोदनमितित्वंजानीहिउदितेनसूर्येण
ज्वलितेनवह्निनावहश्चाहष्टभोगसाधनानिकर्माणिनिष्पा
द्यंतेतिमिरजाड्यनाशादयश्चरात्रिवहेनवाभवंतिउदितेनच
न्द्रेणचौषधिपोषणंतापशांतिर्ज्योत्स्नाविहारादयश्चभूता
भवंतिइतितेषांतन्नत्साधकंतेजोमहिभूतंभवतीत्यभिप्रा
यः १२

मधुसूदनी टीका १०

श्री· गी· टी· पं· ६४

न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निरिति
श्रुत्यर्थं प्रार्थ्याने न तद्भासयते सूर्य इत्यादिना तमेव भांतमनुभा
ति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुत्यर्थमनेन व्याख्याय
ते यदादित्यगतं तेजः चैतन्यात्मकं ज्योतिः यच्चंद्रमसि यच्चाग्नौ स्थि
तं तत्तेजो जगदखिलमवभासयते तत्तेजो मामकं मदीयं विद्धि जा
नीहि यद्यपि स्थावरजंगमेषु सर्वेषु समानं चैतन्यात्मकं ज्योतिः
तथापि सत्वोत्कर्षेण आदित्यादीनामुत्कर्षात्तत्रैव विस्तरं चैतन्य
ज्योतिरिति तैर्विशिष्यते यदादित्यगतमित्यादि यथा तुल्येपि मु
खसंनिधाने काष्ठकुड्यादौन मुखमाविर्भवति आदर्शादौ तु स्व
च्छे स्वच्छतमे च तारतम्येनाविर्भवति तद्वत् यदादित्यगतं तेज
इत्युक्ताप्तु न तत्तेजो विद्धि मामकमिति तेजोग्रहणात् यदादि
त्यगतं तेजः प्रकाशः परप्रकाशसमर्थोसि तं भास्वररूपं ज
गदखिलं रूपवद्वस्तु अवभासयते एवं यच्चंद्रमसि यच्चाग्नौ ज
गदवभासकं तेजस्तन्मामकं विद्धीति विभूतिकथनाय हि तौ
योप्यर्थो द्रष्टव्यः अन्यथा तन्मामकं विद्धीति एतावद् ब्रूयात् ते
जोग्रहणमनर्थकमेवेति भाव[illegible] १२

सदानंदी टीका १२

समस्तस्यापि सूर्याद्याः क्षमाः संतोवभासने यस्येदं न क्षमंते तेजसाते
पि भासयितुं मनाक् १ यत्पदं विमलं प्राप्य नावर्तंते मुमुक्षवः
यत्पदज्ञानाद्धमी जीवाः संसरंति भवांबुधौ २ तस्येदानीं पदस्य
च सर्वात्मत्वविभूतिभिः सर्वस्य व्यवहारस्यास्यास्पदत्वं समा
सितं ३ विवरीतुं च ताभिस्त्वविभूतिं प्राहमापतिः यदादित्याश्रि
यं ज्योतिश्चैतन्यात्मकमुज्ज्वलं ४ यच्चंद्रे यत्स्थितं चाग्नौ तेजो भास
यतेखिलं तत्तेजो वेत्सि त्वं विद्धि मदीयं सर्वभासकं ५ तच्चैतन्या
त्मकं ज्योतिर्जंगमस्थावरेषु च समं यद्यपि सर्वेषु न तथाप्यका
शितं समं ६ सत्वोत्कर्षेण तत्रैवाविस्तरं ज्योतिरीश्वरं यथा तु
ल्येपि कुड्यादौ संनिधाने मुखस्य च ७ नाविर्भवति वक्त्रं न दर्प
णादौ तु निर्मले स्वच्छत्वतारतम्येनाविर्भवत्येवमेव तत् ८

यदादित्यादिगतं तेजः स्थितं भास्वरमेव वा समस्तं रूपवत्स्फु
टं भासयते जगत् ४ मदीयं वै स्वं तत्त्वं विद्धि ध्येयं स्वमत्सभिः
विभूतिकथनायैवमर्थो भगवतो मतः १२

नीलकंठी टीका १२

कथं तर्हि सूर्यादीनामपि भासकत्वं लोके दृश्यते तदपि मदा
वेशादेवेत्याह यदादित्येति अत्रादित्यादिपदैः करणाधि
ष्ठात्र्यो देवतास्तदधिष्ठेयानि करणानि च तंत्रेणोच्यंते य
दादित्यादिषु बाह्यकरणाधिष्ठातृषु तदधिष्ठेयेषु बाह्यकर
णेषु च गतं विद्यमानं तेजो विषयप्रकाशनसामर्थ्यं सर्वं जग
द्भासयते तत्तेजो मामकं मदीयं विद्धि येन सूर्यस्तपति तेजसेद्धः
येन चक्षुषि पश्यंतीत्यादिश्रुतिभ्यः एवं मनश्चंद्रमसो यद्दीप्त
रूपं च प्रकाशनसामर्थ्यं तदपि मामकमेव तथा यदाग्ना
येरवाक्तत्वादिविषयप्रकाशनसामर्थ्यं तदपि मामकमेवे
त्यर्थः अक्षरयोजना स्पष्टा १२

आनंदीटीका १२

आदित्यगतं तेजः यज्जगतो भासकं वृष्ट्यादिना धारकं च चंद्रग
तं तेजो भासकमाप्यायकं च अग्निगतं तेजः प्रकाशनदहन
शोषणस्वेदनपाचनात्मकं च यत्तत्तदेतेषां मत्तेजो नुगमादि
त्यर्थः [illegible] १२ ॥

रामकंठीटीका १४

यदेतदादित्यांतर्गतं सूर्यसंनिविष्टं तेजो ज्योतिः समस्तं भुव
नमभिव्यंजकतया प्रकाशयति यच्चंद्रमसि सोमे सत्त्रिविष
मखिलं जगदाप्याययति यच्चाग्नौ जातवेदसि स्थितं पाका
दिस्वकार्यं निवर्तयति तत्त्रिधावभासमानमपि ममैवैकस्य सं
वेद्यैकमेव प्रकारं संविदात्मकं जानीहि न ह्यसंविदात्मकत्वेक
स्य चित्स्वकार्यस्य संपादनपर्यवसायितोपपद्यते संविन्मात्रैके
व एकस्य पारमार्थिकस्य संवेदितं मे मेवासाधारणो धर्मः।

+एवमीश्वरस्य सोपाधिकं रूपमुपवर्ण्य इदानीं तदेव पारमेश्वरं रूपमनन्तशक्तित्वेन निरूपयति त्रिभिः ॥

श्री॰ गी॰ टी॰ पं

ततोहमेवसर्वमित्येतत्परमंतदतएवाह १२ ॥

लासिकी [illegible]टीका १५

+यदेतद्विश्वप्रकाशकमादित्यस्थं त्रिविधं तेजः यच्च विश्वाप्यायकं चन्द्रस्थितं तेजः यच्चाग्नौ स्थितं पाकादिनिवर्तकं तेजस्तत्सर्वं मदीयमेव विद्धि जानीहि [illegible] १२ ॥

पंचोले टीका

तत्र संसारिणां प्रभावमाशंक्य संसारिस्वरूपं देहादिव्यतिरिक्तं दर्शितमिदानीं तदेव परमेश्वररूपं यत्सर्वस्यावभासकं यन्न केनचिदवभास्यते यस्मान्नानानिवर्तते तदनन्तशक्तित्वेन सर्वात्मत्वेन निरूपयति यदादित्येति चतुर्भिः यदादित्यगतं तेज आदित्ये समस्तं जगद्भासयते यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं मदीयं वैश्वं विद्धि जानीहि अथवा यदादित्यादिगतं तेजः चैतन्यरूपं येन चैतन्येनादित्यादयो ज्ञायन्ते अप्रकाश्येन चैतन्येन सूर्यादयः सर्वमनुभवन्ति तच्चैतन्यं मदीयं मम विश्वो विद्धि जानीहि १२

रणवीरसमिद्धोयिनी ॥

इदानीं तद्भासयते सूर्य इत्यनेन यद्धर्मं परमेश्वरपरमुक्तं तस्यैव धर्मस्य सर्वात्मकत्वं सर्वव्यवहारास्पदत्वं च दर्शयितुमात्मनो विभूतिसंक्षेपमाह यदेति स्पष्टार्थ इति १२

मधुभाष्य ॥

यदादित्यगतमित्यादिना गाम्भूमिं वेदनिर्णयात्मिकां मीमांसा वेदान्तः तथा सामवेदे अश्ववीनयागलश्रुतिः सवेदान्तकत्मकालक इति सर्वेश्वरशक्तिरूपकृत्स्नकालक इतीति तत्र भूतानि ब्रह्मादीनि कृत्स्नस्यः प्रकृतिः तथा च बाष्कलाव्य श्रुतिः प्रजापतिः प्रभुर्देवाः सर्वे जीवाः लयानेरः उकबोधप्रधानं तदुनमवान्यमुद्दयतिनालानाल मातविधानमेकमिति १२

भाषाअनुवादटीका

इससे न तद्भासयते सूर्य इत्यादि इसी अध्याय के सप्तम आदि श्लो
के द्वारा परमेश्वर का जो परम धाम सो कहा गया है और तद्धा
म प्राप्त जीवों की अपुनर आवृत्ति कही गई है और तद्विषयक
संसारी के अभाव आशङ्कापर देहसे भिन्न संसारी स्वरूप को भी
देखाय है अब सोई परमेश्वर सम्बन्धी रूप इहा से ले कर चार
श्लोक से अनन्त शक्ति क्रमसे निरूपण करते हैं कि सूर्यादि मे
स्थित अनेक प्रकार तेज जो विश्व को प्रकाश करें हैं ऐसे ही च
न्द्र मे स्थित जो तेज अखिल संसार को प्रकाश करते हैं तैसे ही
अग्निस्थ तेज ब्रह्माण्ड दीप्त करै हैं सो सब तेज हमार ही है यह
जानो १२

दोहा

जोही तेज आदित्यमें जगत प्रकाशें जोय जोही चंद्रमे
अग्निमे जान तेज मम सोय १२॥

66

गामाविश्यचभूतानिधारयाम्यहमोजसा पुष्णा
मिचौषधीः सर्वाः सोमोभूत्वारसात्मकः ॥१३॥

शांकरभाष्य टीका १

किञ्च गामिति गां पृथिवीमाविश्य प्रविश्य धारयामि भूतानि ज
गदहमोजसा बलेन यद्बलं कामरागविवर्जितमैश्वरं जगद्विधा
रणाय पृथिव्यां प्रविष्टं येन गुर्वी पृथिवी नाधः पतति न विशीर्य
ते तथा च मन्त्रवर्णः येन द्यौरुग्रा पृथिवी च दृढेति स दाधार पृथि
वीमित्यादिश्चातो गामाविश्य भूतानि चराचराणि धारयामीति यु
क्तमुक्तं किञ्च पृथिव्यां जाता ओषधीः सर्वा व्रीहियवाद्याः पु
ष्णामि पुष्टिमतीः रसस्वादमतीश्च करोमि सोमो भूत्वा रसात्म
कः सोमः सर्वरसात्मको रसस्वभावः सर्वरसानामाकरः सोमः
स हि सर्वा ओषधीः स्वात्मरसानुप्रवेशेन पुष्णाति ॥१३॥

आनन्दगिरिकृत टीका २

इतश्च सर्वात्मत्वं प्रकृतपदस्य युक्तमित्याह किञ्चेति ईश्वरो
हि पृथिवी देवतारूपेण पृथिवीं प्रविश्य भूतशक्तिं जगदै
श्वरेणैव बलेन बिभर्ति ततो गुर्व्यपि पृथिवी विदीर्य नाधः प
ततीत्यत्र प्रमाणमाह तथा चेति परस्यैव हिरण्यगर्भात्मनावस्थान
मन्त्रवर्णयोरस्यपरतेति भावः देवतात्मनाधारापृथिव्योरुग्र
त्वमुद्धरणत्वसामर्थ्यं तथापीश्वरायत्वमेव स्वरूपधारणे तद
पेक्षया दुर्बलत्वादिति दृष्टव्यं ईश्वरस्य सर्वात्मत्वे हेत्वन्तरमाह
किञ्चेति रसात्मकसोमरूपतापन्नावपि कथमोषधीरीश्वरः
सर्वाः पुष्णातीत्याशंक्याह सर्वेति ॥१३॥

स्वामिकृत टीका ३

किंच गामाविश्येति गां पृथ्वीमोजसा बलेनाधिष्ठायाहमेव च
राचराणि भूतानि धारयामि अहमेव रसमयः सोमो भूत्वा व्री
ह्याद्योषधीः संवर्धयामि ॥१३॥

पिशाचभाष्य टीका ४

किं चाप्यत गां पृथिवीमाविश्य भूतानि स्थावरजंगमात्मकानि धा

श्री· गी· टी· पं·

+पृथिव्यास्तुभूतधारिण्याः धारकत्वशक्तिर्मदीयेत्याह॥

67

रयामिबिभर्मिअहमात्माओजसाबलेन किंचान्नंपुष्णामिसरसाः
करोमिरसात्मकः रसाधारभूतः १३

रामानुजभाष्य टीका ५

गामिति अहंपृथिवीमाविश्यसर्वाणिभूतान्योजसाममप्रतिदेह
सामर्थ्येनधारयामिपुष्णामीति तथाहममृतरसमयःसोमो
भूत्वासर्वौषधीःपुष्णामि १३

अभिनवगुप्त टीका ६ वक्तृदिगेजत्वर्थमु

स्पष्टार्थः १३
॥

परमार्थप्रपा टीका ७

[illegible] भाष्य
[illegible] प्रावि
[illegible] अपिवेदाम्भोरनाद्यादस्वरूपेणस्व
दत्तसामर्थ्यमनुवदंस्तः सामवेदस्तुतेः तात्पर्यमाह गामावि
श्येति द्वाभ्यां अहंरसात्मकःरसरूपआविर्भूतःसोमोभूत्वागां
पृथिवींवाविश्य सर्वाओषधीर्धान्यफलवमः पुष्णामिवर्धया
मि ततओजसाद्याद्दिसामर्थ्येनभूतानिधारयामि पोषयामि
ओषधिभ्योऽन्नमन्नात्सर्वमितिश्रुतेः १३

वनमाली टीका ८

गांभूमिमोजसाचिन्त्यशक्त्याविश्यप्रविश्यचराचरभूतानिधारया
मि भुविपतनादिधारणसामर्थ्येनमदीयमित्यर्थः अमृतमयु
रःसोमोभूत्वातत्रस्थित्वाव्रीह्याद्योषधीःपुष्णामिवर्धयामि वे
द्वेद्योओषधीनांधारणसामर्थ्यंतत्तन्मदीयमित्यर्थः १३

ज्ञानमेवज्ञपनी टीका ९

भूतधारिणः पृथिव्याधारकत्वरूपाशक्तिःसापिममैवेत्याह
गामाविश्येति गांपृथिवीमोजसाऽप्रतिहतसामर्थ्यरूपयास्वश
क्त्याआविश्यपांशुमुष्टिवद्दृढीकृत्ययेनद्यौरुग्रापृथिवीचदृढे
तिमन्त्रवर्णात् अहंभूतानिस्थावरजङ्गमानिधारयामि अन्यथा
सौसिकतामुष्टिवद्विशीर्येतजलेनिमज्जेदित्यभिप्रायः तथार
सात्मकोऽमृतरसरूपःसोमसंज्ञोभूत्वाऽहंसर्वाःओषधीर्निखिलो

डी

खि

द्विजन्मनीः पुष्णामि विविधविचित्रस्वादुरसपूर्णाः करोमि पृथिव्यां विवि
धविचित्रहर्म्याट्टालग्नासादये पुष्करवापीकूपतडागवाटिकादीनि नाना
क्रीडास्थानानि निर्मायनानाभोगान्भुंजानस्सुजीव स्यंतद्भोगमाथरू
पोहमेवेत्याशयः १३ मधुसूदनी टीका ९

किंच गां पृथिवीं पृथिवीदेवतारूपेणाविश्य ओजसा निजेन बलेन पृथिवी
धूलिमुष्टिनासंहतीकृत्य भूतानि पृथिव्याधेयानि वस्तून्यहमेव धा
रयामि अन्यथा पृथिवी सिकतामुष्टिवद्विशीर्येत अधो निमज्जेद्वा
येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः इति मंत्रवर्णात्
स दाधार पृथिवीमिति च हिरण्यगर्भभावापन्नं भगवंतमेवाह किंच
रसात्मकः सर्वरसस्वभावः सोमो भूत्वा ओषधीः सर्वाः व्रीहियवाद्याः
पृथिव्यां जाता अहमेव पुष्णामि पुष्टिमतीः रसस्वादवतीश्च करोमि
१३ सदानंदी टीका ११

जसा^ पृथ्वीमाविश्य तेजेनौखिलधारिणा धूलिमुष्टिसमां पृथ्वीं दृढीकृत्या
हमीश्वरः १ पृथ्व्याधेयानि वस्तूनि धारयामि समंततः अन्यथा सिक
[illegible]नामुष्टिवद्विशीर्येत भ्रियं २ अतो मद्बलमाविश्य पृथिव्या
येन भ्रियं गुर्वी येन पतत्येव न विदीर्येत खंडशः ३ अतो महीमावि
श्यैव भगवान्देवतात्मना बिभर्तीत्यत्र मानं हि स दाधारेति च श्रुतिः
यवाद्या ओषधीः सर्वा मत्तो जाता अहं हरिः रसस्वभाववान्सोमो भूत्वा
पीयूषमंडलः ५ रसस्वादुमतीस्ताश्च करोम्यखिलपालकः ६

नीलकंठी टीका १२

न केवलमादित्यादिगतप्रकाशेन सामर्थ्यं मामकं अपि तु पृथिव्यादि
गतं भूतधारणाद्यापन सामर्थ्यं मामपि मदीयमेवेत्याह गामिति गां पृथि
वीमाविश्य ना पृथिवीं दृढीकृत्वा भूतानि अहमेव धारयामि ओजसा ब
लेन अन्यथा पृथिवी सिकतामुष्टिवद्विशीर्येत तथा च मंत्रवर्णः येन द्यौ
रुग्रा पृथिवी च दृढेति स दाधार पृथिवीमिति च तथाहमेव सोमो रसा
त्मको जलात्मकः रसो जलं रसो हर्षं इत्यनेकार्थमंजरी जलमयो भूत्वा
सर्वा ओषधीः पुष्णामि च रसवतीः पुष्टाश्च करोमि सोमो हि स्वात्मरसा
प्रवेशेन सर्वा ओषधीः पुष्णातीति प्रसिद्धं १३

एतदेव प्रकाशयति ॥ आनंदटीका १३

गां भूमिं च शब्दाद्दिवं च सूर्यो भूत्वाहमाविश्य ओजसा भूतानि द्विध्यानि
भौमानि च वृष्टिद्वारेण धारयामि विस्तरेण चैतत्तृतीयेध्याये यज्ञप्रस्ता
वे देवान्भावयतानेनेत्यादौ एवं प्रवर्तितं चक्रमित्यन्तम् तथैवाहं रसा
त्मकः सोमो भूत्वा सर्वा ओषधीः प्राणिप्राणधारिकाः पुष्णामि तथै
व प्राणिनां देहमास्थितो वैश्वानरो जठराग्निर्भूत्वा प्राणापानसखो
जठराग्निर्भूत्वा चतुर्विधमन्नमदनीयं भोज्यं भक्ष्यं चोष्यं लेह्यं च पचामि प
रिपाकं परिणामं नयति ॥ १३ ।

रामकठीटीका १४

गां पृथिवीमाविश्य स्वशक्त्या व्याप्य भूतानि चराचराणि प्राणिनोऽहमोज
सा स्वबलेन धारयामि विभर्मि पृथिवीगता धारणशक्तिर्ममैव स्वाभा
विकं बलमित्यर्थः तथा रसात्मकास्तन्मयः सोमो भूत्वा चंद्रात्मत
यात्मानमेवावभास्य सर्वा ओषधीः समस्ताः प्राणिप्राणनहेतुभू
ताद्रव्यजातीरहमेव पुष्णाम्युपचिताः संपादयाम्याप्याययन्तु
पाममैव शक्तिरित्यर्थः तथैवाहं वैश्वानरो जातवेदा भूत्वा नतदात्म
कः सन्नहं प्राणभृतां शरीरमाविश्य आत्मायानाभ्यां वह्निः स्तूयै
तमुनाभेन व्यवस्थिताभ्यां स्वशक्तिभेदाभ्यां तन्मायुक्तः सहितः
भक्ष्यादिभेदाच्चतुर्विधमन्नमभ्यवहार्यं द्रव्यं पचामि परिणामं प्रा
पयामि जाठरस्याग्नेः सकलशरीरविभक्तात्मतया वर्तमानस्य
तन्तत्वान्नरसपाचित्वात्सर्वप्राणिजीवनहेतुर्या शक्तिः सा ममै
वैकसशक्तिमनसा संवेगितो निस्समनाध्यायपुत्रमस्यायेन
निर्वादितार्थैकोमयाभिः किंच बहुना १३ ॥

लौकिकी वरगुनीटीका १५

किंच— गां पृथ्वीं धूलिमयीं वृद्धिशरणस्वभावामाविश्य स्वशक्त्या व्या
प्य भूतानि चराचराणि ओजसा बलेनाहमीश्वरो धारयामि
बिभर्मि । पृथ्व्या धारणशक्तिर्ममैव बलमित्यर्थः ॥

द्वा

अन्यथा पृथ्वी सिकतामुष्टिवद्विशीर्येताधो निमज्जेत् अहमेवम
तोमृतरसमयः सोमो भूत्वा व्रीह्याद्यौषधीः संवर्धयामि चंद्र
मस आप्यायनरूपा शक्तिर्ममैवेत्यर्थः [illegible] १३।

पंचोले टीका

किंच गामाविश्य चेति वचनः अहं गां पृथ्वीमाविश्य ओजसा ओजो
बलं कामरागविवर्जितमैश्वर्यं यज्जगद्धारणाय पृथिव्यामाविष्टं
येन गुर्वी पृथ्वी नाधः पतति न विशीर्यते तेन ओजसा बलेन पैश्वर्य
लक्षणेन च भूतानि चराचराणि धारयामि किंच रसात्मकः रसस्व
भावः सर्वरसानामाकरः सोमः सन् पृथिव्यां जाताः सर्वाश्चौषधीः
व्रीहि यवाद्याः पुष्णामि पुष्टिमतीः रसस्वादुमतीश्च करोमि स्वात्मर
सानुप्रवेशेन १३

रसावीरसमिद्धोधिनी

किंच गामिति अहं परमेश्वर एव गां पृथिवीमाविश्य भू
तानि चराचरात्मकान्योजसा बीजबलेन धारयामि तथा
अहमेव रसात्मकः सर्वरसस्वभावः सोमो भूत्वा सर्वा ओष
धीर्व्रीह्याद्याः पृथिव्युद्भूताः पुष्णामि रसयुक्ताः करोमीत्यर्थः

१३॥

मधुभाष्य

१३॥

69

और पृथिवी को अपने बलके द्वारा स्थित करके मै चराचरा
त्मक सकल भूतों को धारण करता हूं और अमृतात्मक च
न्द्रस्वरूप होके हृद आदि सम्पूर्ण शस्य को भी बढावता हूं
१३

दोहा

पृथिवी स्थित होय भूतकों धारत हौं बलसोंहि पुष्ट कर
त हौं औषधी सोम होय रससोंहि १३॥

70

अहंवैश्वानरोभूत्वाप्राणिनांदेहमाश्रितः प्रा
णापानसमायुक्तःपचाम्यन्नंचतुर्विधं १४

शांकरभाष्यटीका १

किञ्च अहमिति अहमेव वैश्वानर उदरस्थोऽग्निर्भूत्वायमग्नि
र्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते इत्यादिश्रुतेर्वैश्वा
नरः सन् प्राणिनां प्राणवतां देहमाश्रितः प्रविष्टः प्राणापान
समायुक्तः प्राणापानाभ्यां समायुक्तः संयुक्तः पचामि पक्तिं क
रोमि अन्नं चतुर्विधं चतुःप्रकारमन्नमशनं भोज्यञ्च भक्ष्यञ्चो
ष्यं लेह्यञ्च भोक्ता वैश्वानरोऽग्निर्भोज्यमन्नं सोमस्तदेतदुभयमग्नी
षोमौ सर्वमिति पश्यतोऽन्नदोषलेपो न भवति १४

आनन्दगिरिकृतटीका २

भगवतः सर्वात्मत्वे हेत्वन्तरमाह किञ्चेति अहमेवेत्यहंशब्देन
परो लक्ष्यते भूत्वा पचामीति सम्बन्धः परस्यैव जाठरात्मना स्थितौ
श्रुतिं प्रमाणयति अयमिति वाह्यं भौमाग्निं व्यावर्तयति योऽयमि
ति देहान्तरारम्भकत्वेनीयं भूतेष्ववच्छिनत्ति येनेति जाठरात्मना
परः स्थितश्चेत्तस्य देहाश्रितत्वं सिद्धमिति न पृथग्वक्तव्यमित्याशं
क्य पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेदेति श्रुतिमाश्रित्याह प्रवि
ष्ट इति परस्य जाठरात्मनोऽन्नपाके सहकारिकारणमाह प्राणेति सं
युक्तत्वं संधुक्षितत्वं अन्नस्य चातुर्विध्यं प्रकटयति भोज्यमिति भो
क्तरि वैश्वानरमिति दृष्टिर्भोज्ये सोमदृष्टिरेवं भोक्तृभोज्यरूपं स
र्वं जगदग्नीषोमात्मना भुक्तिकाले ध्यायतो भोक्तुरन्नकृतो दोषो
नेति प्रासंगिकं सफलं ध्यानं दर्शयति भोक्तेति १४

स्वामिकृतटीका ३

किंचाहमिति वैश्वानरो जाठराग्निर्भूत्वा प्राणिनां देहस्थानः प्रवि
ष्टः प्राणापानाभ्यां तदुद्दीपकाभ्यां सहितः प्राणिनां भुक्तं भक्ष्यं भो
ज्यं लेह्यं चोष्यं चेति चतुर्विधमन्नं पचामि तत्र यद्दन्तैरवखण्ड्य भक्ष्य
ते पूपादि तद्भक्ष्यं यत्तु केवलं जिह्वया विलोड्य निगीर्यते पायसा
दि तद्भोज्यं यत्तु जिह्वायां निक्षिप्य रसास्वादेन निगीर्यते यद् [illegible]

श्री॰
गी॰ टी॰
पं॰

तेशुड्डादिनद्वेदेनयनदेष्टामिनिष्ठीश्च सारांशनिगीर्यावशिष्टंत्यज्यते
यदिदंतदंष्ट्रादितंबोध्यमितिभेदः १४

पिशाचभाष्य टीका ४

किंच वैश्वानरोभूत्वाश्रोदर्योग्निर्भूत्वाप्राणाख्यापानश्च प्राणापानौ
ताभ्यांसमायुक्तः संधुक्षितः चतुर्विधमशितंखादितंपीतंलीढं
१४

रामानुजभाष्य टीका ५

अहमिति अहंवैश्वानरोजाठरानलोभूत्वासर्वेषांप्राणिनांदेहमा
श्रितः तैर्भुक्तमन्नंभोज्यलेह्यपेयात्मकंचतुर्विधंअन्नंप्राणापान
व्यक्तिभेदसमायुक्तः पचामि अत्रपरमपुरुषविभूतिभूतोसो
मवैश्वानरोऽहंसोमोभूत्वावैश्वानरोभूत्वेतितत्सामानाधिकर
ण्येननिर्दिष्टो [illegible]

अभिनवगुप्तकृत टीका ६

अर्कादितेजस्त्रयरूपतयादशमाध्यायस्थविभूतिशिष्यतिसंहा
रचक्रकटीकरणो श्रीगुरुवः प्राहुः भूतपंचकस्यसमस्तस्यलतया
यलोकधारकत्वंतद्गगनपवमाहेश्वर्यमित्येतदनेन न
यथाहिरवितेजसः प्रकाशकत्वंधारकत्वंचतेजोधर्मात्तथताद्दा
स्यानदेवतदुक्तं यदादित्यगतमितिगामाविश्यचभूतानीतिवा
र्द्धयेनचांद्रतेजः प्रकाशकंपोषकंचजलतेजोयोगात् तदुक्तं
यंस्वहसमसौम्येनभागेनपुष्णामीतिचार्धश्लोकेन वाह्नतेजः
प्रकाशनशोषणदहनस्वेदनपचनात्मकंदर्शितम्तेजोवायु
योगात्तदेतदिहोक्तंयथाग्नावित्यनेनअहंवैश्वानरइतिश्लोके
नच नवस्त्वबोधावकाशात्तद्रूपतयासर्वगतमेव [illegible]

परमार्थप्रपा टीका ७

अथवौदर्यंसामर्थ्यमाह अहमिति प्राणिनांसर्वदेहिनांदेहेऽश्रा

श्रितो जाठरो वैश्वानरोऽग्निर्भूत्वा प्राणापानाभ्यां भस्त्रावायुभ्यामिव
समाधुक्षितो दीप्तीकृतः सन् चतुर्विधमन्नं भक्ष्यपेयचोष्यभक्ष्यादि
रूपं पचामि परिपाकं नयामि श्रुतिरपि सामवेदे हा३उ अहमन्नं १ अ
हमन्नादः १ अहं विधारयः इत्यादि भाष्यं तत्र हा३उ लोमात्वरं न
उक्तं ओ हो ई इतिवत्संबुद्धौ विकल्पे हाउ कीर्तितमिति अत्र मनुष्य
देवात्मविभागेनान्नत्रयमन्नादत्रयमस्तीति विग्रहसा विकल्पा
यो निरूपितः विधारयो धर्ता अध्येतदर्थेनापि काशान पथ्यीश्रु
तिरपि अथ यत्किंचेदमाद्रेतसोऽसृजत तत्तु सोम एतावद्वा इदं
सर्वमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नाद इति भाष्यं सृष्टिक्रम
कथनानन्तरं यत्किंचेदं सर्वमार्द्रं द्रवरूपं शोणितोद्भवप्राणिजातं
तद्रेतसः शुक्रादसृजत सृष्टवान् अथ रेतसः स्वरूपमाह तदिति
तदु तदेतावत्सर्वं रेतः सोम एव तत्ते एवं रेतसः कारणमन्नमन्नाद
श्च भवति तथा च सोम एवान्नमग्निरन्नादश्चानेन रीत्या कोऽपि यः
कामयेतान्नवानन्नादः स्यामित्यग्निरेवान्नमवरुन्धे सोमेनान्नाद्य मन्न
वानेवान्नादो भवतीति भाष्यं यः पुरुषः अहमन्नवानन्नादश्च स्या
मिति कामयेत स अग्निनाऽग्निरूपासनया अन्नमवरुन्धे प्राकाम
ति सम्मानयति सोमेन चान्नाद्यं प्राप्नोति एवमन्नवानेवान्नादो भ
वतीत्यर्थः तथा मृग्वसामापि अध्येतत्साम गायन्नास्ते अहमन्न
त्सर्वं श्रुतिरहस्यं भगवतैव प्रकटीकृतं १४

वनमाली टीका ८

जठराग्नी वैश्वानररूपेण स्थित्वा प्राणिनां देहमाश्रितः उद्दी
पकाभ्यां प्राणापानाभ्यां तत्तत्कर्मकर्तृरूपाभ्यां प्रसिद्धाभ्यां वा सहितः
प्राणिभिर्भुक्तं भक्ष्यं भोज्यं लेह्यं चोष्यं चेति चतुर्विधं भुज्यमानं प
चाग्निपक्वाच्च देहपुष्टयकारणं करोति यद्वा नैरवर्ण्यं अमस्ता
ते भूपादिनद्भक्षयन्ते केवलं जिह्वया विलोड्य निगीर्यन्ते पायसा
दिनद्रोधे यत्जिह्वया विनिर्दितमरसास्वादनेन निगीर्यते शाके
शदि लेह्यं यद्दन्तैर्निष्पीड्य तत्सारांशो निगीर्यते वा शीघ्रस्य
नेयपेयं दंष्ट्रादितचोष्यमिति भेदः १४

श्री॰ गी॰ टी॰ पं॰

72

ऊसमवैजयन्ता टीका १

भुक्तानामन्नादीनां पाकहेतुरप्यहमेवेत्याह अहं वैश्वानर इति अहं स
र्वान्तरात्मा सर्वेश्वरो वैश्वानरो जठरानलस्तच्छरीरको भूत्वा प्राणिनां
सर्वेषां ब्रह्मादिपिपीलिकान्तानां प्राणवतां देहमुदरमाश्रितः स
न् प्राणापानसमायुक्तस्तदुद्दीपकाभ्यां प्राणापानरूपाभ्यां वायु
भ्यां समायुक्तः [illegible] सन् तैः प्राणिभिर्भुक्तं चतुर्विधं भक्ष्यभोज्यलेह्य
चोष्यात्मकमन्नं दहनच्छेदनक्लेदकरूपादिभक्ष्यं चर्व्यं पायसौ
दनसूपादि भोज्यं गुडमध्वादि लेह्यं पक्वान्नं दध्यादि चोष्यमित्येवंभूतं
चतुःप्रकारकमन्नं पचामि परिपाकं नयामि श्रुतिरप्येवमेवमा
ह अहमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते इत्यादि म॰
ना सोमवैश्वानरयोः सर्वव्याप्यत्वात्स्वामीयत्वाच्च स्वामेदेनोक्तिः सं
भवत्येवेत्याशयः १४

मधुसूदनी टीका १

किंच अहमेवेश्वर एव वैश्वानरो जाठरोऽग्निर्भूत्वा अयमग्निर्वैश्वानरो योऽय
मन्तः पुरुषे येनेदमन्नं पच्यते इत्यादिश्रुतिप्रतिपादितः सन् प्रा
णिनां सर्वेषां देहमाश्रितोऽन्तः प्रविष्टः प्राणापानाभ्यां तदुद्दीपका
भ्यां समायुक्तः संधुक्षितः सन् पचामि पक्तिं नयामि प्राणिभिर्भुक्त
मन्नं चतुर्विधं भक्ष्यं भोज्यं लेह्यं चोष्यं चेति तत्र यद्दन्तैरवखण्ड्य भ शु
क्ष्यते पूपादि तद्भक्ष्यं चर्व्यमिति चोच्यते यत्तु केवलं जिह्वया विलो
ड्य निगीर्यते सूपौदनादि तद्भोज्यं यत्तु जिह्वायां निक्षिप्य रसास्वा
देन निगीर्यते किंचिद्द्रवीभूतं गुडरसालाशिखरिण्यादि तल्ले
ह्यं यत्तु दन्तैर्निष्पीड्य रसांशं निगीर्यावशिष्टं त्यज्यते यथेक्षुदण्डादि
तच्चोष्यमिति भेदः भोक्ता यः सोऽग्निर्वैश्वानरो यदन्नमद्यते स सोमः त
देतदुभयमग्नीषोमौ सर्वमिति ध्यायतोऽन्नदोषलेपो न भवतीत्यपि
द्रष्टव्यं १४

सदानंदीटीका ११

जाठरोऽग्निरहं भूत्वा सर्वेषां प्राणधारिणां देहमन्तः प्रविश्य तत्
उद्दीपकभावतः १ प्राणापानाख्यवायुभ्यां संयुक्तः संपचन् चतुर्विधं भु
क्तं प्राणिभिरन्नं तत्पाकं समग्रूपाम्यहः २ यद्दन्तैरवखण्ड्यान्नं भक्ष्यते

घनू^

भक्ष्यमे वतत् केवलं जिह्वया तु विलोड्यान्नं निगीर्यते सूपोदनादिनञ्चो
ष्यं यत्तु निक्षिप्य जिह्वया निगीर्यते द्रवीभूतं रसास्वादेन खाद्यं व
ष तले संशीखरिणोदिरसालादि तथैव च यच्च दन्तैः खनिष्पी
ड्य रसांशं विनिगीर्य्यते च ५ स्वजनेप्यवशिष्टेन चोष्यं चेति चतुर्वि
धं भोक्ता वैश्वानरो वह्निर्भोज्यमन्नं च चंद्रमाः ९ अग्निषोमात
उभयं सर्वमित्येव पश्यतः प्रायतोऽन्नगतैर्दोषैर्लेपो भवती न^
ष्यति १ श्रीमद्भगवतो वाक्यं द्रष्टव्यमिति मंगलं १४

नीलकंठी टीका १२

अहं वैश्वानरः सन् उदरस्थोऽग्निर्भूत्वा प्राणिनां सर्वेषां देहमाश्रितः
सन् प्राणापानाभ्यां वायुभ्यां समायुक्तः सम्यग्दीपितः सन् चतुर्विध
मन्नमदनीयं भक्ष्यं दन्तव्यापारापेक्षमपूपादि भोज्यं तदनपेक्षं
पायसादि लेह्यं गुडशर्करादि चोष्यं निष्पीड्य चूष्यमानमिक्षुद
ण्डादि पचामि तेन सर्वत्र सर्वा शक्तिर्या दृश्यते सा मदीयैवेति भावः त
देवं भोक्ता वैश्वानरोग्निर्भोज्यमन्नं सोमस्तदेवमुभयमग्नीषो
मौ सर्वमिति पश्यतोऽन्नदोषलेपो न भवतीत्यपि द्रष्टव्यं १४

आनंदीटीका १३

स्पष्टार्थं १४ ॥

रामकंठीटीका १४

गां पृथिवीमाविश्य स्वशक्त्या व्याप्य भूतानि चराचराणि प्राणिनो
हमोजसा स्वबलेन धारयामि बिभर्मि पृथिवीगता धारण
शक्तिर्ममैव स्वाभाविकी वशनिर्णयः तथा रसात्मकोऽम्
तमयः सोमो भूत्वा चंद्रात्मना पात्मानमेवावभास्य सर्वा ओष
धीः तत्तत्प्राणिप्राणनहेतुभूता द्रव्यजातीरहमेव पुष्णा
मि उपचिताः संपाद्यासाप्यायनरूपा ममैव शक्तिर्निर्णयः
तथैव वैश्वानरो जातवेदा भूत्वा तदात्मकः सन्नहं प्राणभृतां
शरीरमाविष्टः प्राणापानाभ्यां वह्निः सूर्येणानुभावेन चावस्थिता
भ्यां स्वशक्तिभेदाभ्यां समायुक्तः सहितः भक्ष्यादिभेदाच्चतुर्वि

यमन्नमभ्यवहार्यं द्रव्यं पचामि परिणामं प्रापयामि जाठरस्याग्नेः
सकलशरीरविभक्तात्मतया वर्तमानस्य समस्तान्नरसपाचि
का सर्वप्राणिजीवनहेतुर्या शक्तिः सा ममैवैकस्य शक्तिमतः स
र्वधिनीति सम्यगाध्यायगुक्तन्यायेन प्रतिपादितानेवोपपत्तिः
किंच बहुना १४ ॥

73

लासिकी [illegible]टीका १५

किंच अहमीश्वर एव वैश्वानरो जाठरोऽग्निर्भूत्वा प्राणिनां देहमाश्रितो
ऽन्तः प्रविष्टः प्राणापानाभ्यां तदुद्दीपकाभ्यां सहितः संधुक्षितः
प्राणिभिर्भुक्तं भक्ष्यं भोज्यं लेह्यं चोष्यं चेति चतुर्विधमन्नं पचामि
परिणामं प्रापयामि तत्र यद्दन्तैरवखण्ड्य भक्ष्यते अपूपादि तद्भ
क्ष्यं चर्व्यमिति चोच्यते यत्तु केवलं जिह्वया विलोड्य निगीर्यते
पायसादि तद्भोज्यम् यत्तु जिह्वायां निक्षिप्य रसास्वादेन निगी
र्यते द्रवीभूतं गुडादि तल्लेह्यं यत्तु दंष्ट्राभिर्निष्पीड्य सारांशो नि
गीर्यावशिष्टं त्यज्यते यथेक्षुदण्डादि तच्चोष्यमिति भेदः
[illegible] १४ ॥

पंचोलेटीका

किंच अहमिति अहमेव वैश्वानर उदरस्थोऽग्निर्भूत्वा प्राणिनां प्रा
णवतां देहमाश्रितः सन् प्राणापानाभ्यां युक्तः चतुर्विधमन्नं भो
ज्यं लेह्यं चोष्यं भक्ष्यं चेति चतुर्विधं पचामि तस्य पाकं करोमि । १४

रणवीरसमिद्धोधिनी ॥

किंचाहमिति अहमेव वैश्वानरो जाठराग्निर्भूत्वा सर्वेषां प्राणि
नां देहमाश्रितोऽन्तः प्रविष्टः प्राणापानाभ्यां तदुद्दीपकाभ्यां स
मायुक्तः सन् चतुर्विधमन्नं भक्ष्यं भोज्यं लेह्यं चोष्यं च पचामि परि
णयामीति तत्र भक्ष्यं मोदकादि भोज्यमोदनादि लेह्यं मधुन्यादि
चोष्यमिक्ष्वादिः इति चतुर्विधमन्नमहमेव जीर्णीकरोमीत्यर्थः १४ ॥

और मैं ही वैश्वानर नाम जठराग्नि स्वरूप होके प्राणियों की शरीर के मध्य मे प्रवेश कर के प्राण अपान वायु के साथ हो य जीवों का भक्ष जो भक्ष भोज्य लेह्य चोष्य चतुर्विध अन्न ति स को परिपाक करता हूं भक्ष वह है जो दांतों से पीस कर खाया जाय दाल भात चर्वन वगैरः और भोज्य जो जिह्वा के इसारे से निगला जाय खीर हलुआ आदि और लेह्य वह है द्रव रूप आस्वादन पूर्वक पान किया जाय सहत दुग्ध आद और चोष्य कहते जो चूंस कर रस लिया जाय ऊख वगैरः को जा नो १४

दोहा

मैं हि अग्नि होय जीव की देह मांहि स्थित होय अन्नप॰ वों मैं चारविध प्राण अपान युत सोय १४

74

सर्वस्यचाहंहृदिसन्निविष्टोमत्तःस्मृतिर्ज्ञानम
पोहनंच वेदैश्चसर्वैरहमेववेद्योवेदांतकृद्वे
दविदेवचाहं १५ शांकरभाष्यटीका १

किंच सर्वेति सर्वस्य प्राणिजातस्याहमात्मा सन् हृदिबुद्धौ सन्निवि
ष्टोतो मत्तः सर्वप्राणिनां स्मृतिर्ज्ञानं तदपोहनंच येषां पुण्यकर्मि
णांच पुण्यकर्मानुरोधेन ज्ञानस्मृती भवतस्तथा पापकर्मिणां
पापकर्मानुरूपेण स्मृतिज्ञानयोरपोहनंच अपायनमपगमनं
च वेदैश्च सर्वैरहमेवच परमात्मा वेद्यो वेदितव्यः वेदान्तकृत् वे
[illegible] वेदान्तार्थसम्प्रदायकृदित्यर्थः वेदविद्वेदार्थविदेवचाहं
१५

*आत्मनः *च

आनंदगिरिकृत टीका २

इतश्च सर्वात्मत्वेन सर्वव्यवहारास्पदत्वमीश्वरस्येत्याह किंचेति
प्राणिजातं ब्रह्मादिपुत्तिकान्तमात्मतया बुद्धौ सन्निविष्टत्वं तद्गुण
दोषाणामशेषेण द्रष्टृत्वमतो बुद्धिमध्यस्थगुणदोषद्रष्टृत्वादिति
यावन्मत्तः सर्वकर्माध्यक्षाज्जगद्धृदयन्तु ज्ञाथारादित्यर्थः प्राणिनां
स्मृतिज्ञानयोस्तदपायस्य च भगवदधीनत्वे भगवतो वैषम्यं स्या
दित्याशंक्याह यथायमिति स्मृतिर्नष्टार्थावगमो नभूतस्य परामर्शः
देशकालस्वभावविप्रकृष्टस्यापि ज्ञानमनुभवः धर्माधर्माभ्यामवि
विद्धं कार्यं कुर्वतो नेश्वरस्य वैषम्यमिति भावः वेदवेद्यं परं ब्रह्म भ
गवतोस्तीति शंकां वारयति वेदैरिति वेदात्मनां पोहवेद्यत्वं परि
हरति वेदेति [illegible] तदर्थसम्प्रदायप्रवर्तकत्वार्थी तदर्थयाथा
तथ्यज्ञानवत्त्वमाह वेदार्थेति १५

स्व

स्वामिकृत टीका ३

किंचसर्वस्येति सर्वप्राणिजातस्यहृदिसम्यगंतर्यामिरूपेणप्र
विष्टोहं अतएवमत्तएवहेतोः प्राणिमात्रस्य पूर्वानुभूतार्थविषय
स्मृतिर्भवति ज्ञानंचविषयेंद्रियसंयोगजंभवति अपोहनंचत
योःप्रमोषोभवति वेदैश्चसर्वैस्तत्तद्देवतादिरूपेणाहमेववेद्यः वेदां
तकृत्तत्संप्रदायप्रवर्तकश्चज्ञानदोगुरुरहमित्यर्थः वेदार्थ

श्री·
गी·टी·
पं·
25

विदहमेव १५

पिशाचभाष्य टीका ४

किंविशिष्टमभिधीयते सर्वस्य प्राणिजातस्य हृदि हृत्पुण्डरीके सन्नि
विष्टः अपोहनं हेयबुद्धिः तस्योपलक्षणार्थत्वेनोपादेयबुद्धिश्च
वेदान्तकृन्निर्मिक्तृ तथा च श्रुतिः यो ब्रह्माणं विदधाति पूर्वं यो वै वेदां
श्च प्रहिणोति तस्मै इति प्रहिणोति ददाति उपदिशतीत्यर्थः वे
दवित्तीति वेदवित् वेदार्थविदित्यर्थः तस्मादहं सर्वलोकप्रसिद्धः

+तयोश्च सर्वस्य भूतजातस्य च
परमपुरुषसामानाधिकरण्य
निर्देशप्रहेतुमाह॥

रामानुजभाष्य टीका ५

+सर्वस्येति तयोः सोमवैश्वानरयोः सर्वस्य भूतजातस्य च सकलप्र
वृत्तिमूलज्ञानोपदेशे हृदि सर्वेमत्संकल्पेन नियच्छन्न अहमात्म
तया सन्निविष्टः तथाहुः श्रुतयः अन्तः प्रविष्टः शास्ता जनानां सर्वा
त्मा यः पृथिव्यां तिष्ठन् आत्मनि तिष्ठन्निमायायाः अतो मत्तः सर्वेषां
स्मृतिर्ज्ञायते स्मृतिः पूर्वानुभूतविषयानुभवसंस्कारमात्रजं ज्ञानं
ज्ञानं इन्द्रियलिङ्गागमयोगजो वस्तुनिश्चयः सोपि मत्तः अपोहनं
अज्ञाननिवृत्तिः अपोहनं मूहनं वा ऊहनं मूहः ऊहो नाम इदमेवं प्रमा
णमित्थं प्रवर्तितुमर्हतीति प्रमाणप्रवृत्त्यर्हताविषयसामग्र्यादि
निरूपणजन्यं प्रमाणानुग्राहकं ज्ञानं तच्च मत्त एव वेदैश्च सर्वैरह
मेव वेद्यः अतोऽग्निवाय्वादिसर्वेशानामिन्द्रादीनां मदन्तर्यामिकत्वेन मदा
त्मकत्वान्मत्ति पादनपरैरपि सर्वैर्वेदैरहमेव वेद्यः देवमनुष्या
दिशरीरजीवात्मैव वेदान्तकृत वेदानामि[illegible]यं जेन वरुणाय जेनेन्य
वमादीनामतफलफलेहिते सर्वे वेदाः पर्यवस्यन्ति अन्तकृत फ
लकृत् वेदोदितफलस्य प्रदाता चाहमेवेत्यर्थः तदुक्तं पूर्वमेव
यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छतीत्यारभ्य लभते च ततः
कामान्मयैव विहितान् हितानिति अहं हि सर्वयज्ञानां भोक्ता च प्रभुरे
व चेति वेदविदेव चाहं वेदविदहमेव एवं मदभिधायिन वेदम
हमेव वेद इतो मयाप्यायो वेदार्थोनतेन सर्ववेदविदहमित्यभिप्रायः १५

अभिनवगुप्तकृत टीका ६

+ सर्वस्य वेद्यस्य यद्दृत्तत्वं सर्वस्माद्धरणं स्वतंत्रबोधस्वभावं तद्ग्राहमि

+अत एव बोधरूपतां अन्ततोध स्वरूपप्रत्यपतितत्वात्तेज्यबोधस्वभावमात्मानं परस्वभावं
परमेश्वरस्वरूपं सर्वज्ञानस्वतंत्रं सर्वकर्तारं दर्शयितुमाह ॥

तियोविमर्शलक्षणएवापूर्वाभासनामयंज्ञानेविश्वमहामहिम्नूपम
यंचटपवेतिसर्वात्मकभावविंडनासारेविकल्पनज्ञानात्मक
मयोहनेपाशवस्तहिम्नूपमायामयप्रमान्तविंतस्मरणाव स
स्कारशेषतोनीतस्यसंहृतस्यपुनरवभासनात्मकमितीयना
समस्तज्ञानानिसंहृतानीतिसर्वतनापूर्वकेस्वातंत्र्यरूपंकार्य
त्वमतः सर्वैरितिसंभूयकिलसर्वशास्त्राणांपरमेशतत्वमेव
निरूप्य वेदवेदांतकर्तृत्वेनकर्मफलतत्संबंधादिद्वारतया
शेषविश्वनिर्माणेनउन्मीलनेनपुनःस्वरूपप्रतिष्ठापनेभगव
तएवसातेऽस्मितिविश्वकर्तृत्वमतः सर्वमेवपोहनमस्येनाक
तेनेदंभवतीतिव्यतिरेकबुद्धिःवेदांतंकरोतीत्यात्मसाक्षात्कार

एवंवेदम १५ परमार्थप्रपा टीका १

अथनकेवलमन्नादिविभूतिरूपेणदेहमात्रेतिष्ठामिकिंतु
साक्षादपीत्याह सर्वस्येति अहंसर्वस्यप्राणिजातस्यहृदयाकाशे
सन्निविष्टः अंतर्यामित्वेनप्रविष्टः कुतोज्ञातमित्याह मत्तइति य
तोमत्तस्मकाशात्सर्वानुभूतार्थविषयास्मृतिर्भवतिततोज्ञानंवि
षयेंद्रियसंयोगजंवर्तमानमपोहनंच तयोःप्रमोषः अथो य
समीपेऽवस्थितस्तर्कार्तयत्सर्वंहृष्टमासीत देवेदंभविष्यतीत्या
कारेणानदपोहनं तदुक्तंस्मृतिर्व्यतीतविषयामितिरागामिगो
चराह ··· कालिकी ··· अथैतदनुभवरूपज्ञानाभावेऽस्म
दुपायमाह वेदैरिति सर्ववेदैःसंहिताब्राह्मणएकरूपैरह
मेवाततयाहृत्यावेत्तंयोग्योवेद्योस्मि परंतनसाक्षात्कारे एवकारे
णानुदेवताक्रदासः अथतदेवाह वेदांतकृदिति यदा अहमे
ववेदविन्नवेदोमांवेत्तियेनेदंसर्वंविजानातितंकेनविजानीया
दितिश्रुतेः वेदांतानुपनिषदः करोतीति वेदांतकृत उपसमीपे
अर्थागेवनिषीदतिपर्यवस्यतीत्युपनिषदस्तत्देवकर्मयंति
नेतिनेतिनवास्मात्परमस्तीत्यादिवाक्यैलक्षणाचवेदांतेष्वहमेव
नितित्मजनस्यार्थः अथैतहेदवाक्यार्थकपरमरहस्यस्योपदेश
परमगुरुरहमेवास्मीत्याह वेदविदिति संग्रहश्लोकःसा यामावा

श्री·
गी·टी·
पं·

यंमत्वाश्चतादिवद्वशः छंदांसि शाखास्थिवासंगत्यान्मनित्वात्तिशिष्य
निवहेसुख्याख्यपयत्नादेतान् एताहशपरिधारणात्स्यास्तरेवित्वेनय
वायुक्तवोवादेजत्तस्त्विपो वत्तह्विसकलेसामर्थ्यम दंत्मनाइति १४

वनमाली टीका ८

सर्वोत्तमाधिकारिभिर्ज्ञेयं निरतिशयमाहात्म्यमाह सर्वस्येति स
र्वस्य चतुर्विधप्राणिसमूहस्य हृदि नियामकत्वेन स्थितः सर्वांतर्या
मीत्यर्थः ततश्च मत्त एव हेतोः स्मृतिः एतज्जन्मनि पूर्वानुभूतार्थ
विषयकाहृत्तिर्योगिनां च जन्मांतरानुभूतार्थविषयकापि तथा
ज्ञानं विषयेंद्रियसंयोगजं भवति योगिनां च देशकालविप्रकृष्ट
विषयकमपि एवं कामक्रोधशोकादिव्याकुलत्वेन सामर्थ्याहते
स्मृतिज्ञानयोरपायश्च मत्त एव भवति कार्यमात्रजनकत्वात्सर्वां
तर्यामित्वाच्चाहमेव सर्वोत्तमः तस्मात्सर्वैर्वेदैर्वेद्योऽहमेवमा
ह वेदैश्च सर्वैरिंद्रवरुणाद्याख्यपरतया प्रतीयमानैरहमेव वेद्यः
सकलप्रवृत्तिनिमित्तानां परमे मय्येवादीनामपि सत्वात् वेदांतकृ
त् वेदांतः फलेन तत्कृत् फलदाता व्यासरूपेण वेदांतार्थमहंनि
र्णायकश्च ब्रह्ममीमांसाशास्त्रकर्ताप्यहमेवेति वा वेदविदहमेव
अन्यपरतया प्रतीयमानोऽपि यो वेदः स मत्परस्तदहमत्रमेववदन्ती
ति निगूढवेदार्थमहमेव जानामि मत्प्रसादादन्योऽपि जानातीत्यर्थः
१५

अथ वैजयंती टीका ९

सर्वप्राणिनां ज्ञानाज्ञानयोः कारणमप्यहमेवेत्याह सर्वस्य चेति स
र्वस्य निखिलप्राणिसमूहस्य चकारात्सोमवैश्वानरयोरपि हृदि
सर्वप्रवृत्तिहेतुज्ञानोदयदेशे सन्निविष्टस्तन्नियामकतयाऽहमे
व प्रविष्टः स्थितः अतः प्रविष्टः शास्ता जनानां सर्वात्मा यः पृथिव्यां तिष्ठ
न्पृथिवीमंतरो यमयतीत्याद्यात्मनि तिष्ठन्नात्मानमंतरो यमयती
त्याद्याः श्रुतयोऽप्यादुः अतो हेतोः मत्तः सकाशादेव सर्वेषां स्मृतिः
पूर्वानुभूतवस्तुविषयानुसंधिः च पुनः ज्ञानं विषयेंद्रियसंनिक
र्षजमेवस्तुनिश्चयात्मकं जायते तथा तयोरपोहनं प्रमोषश्च
मत्त एव भवति तत्तज्ज्ञानं हि जीवानां प्रमोषस्तु ब्रशान्तिरिति

स्मृतेः यद्वा ऊहनमिदं प्रमाणमित्थं प्रवृत्तिमर्हतीति प्रमाणप्रवृत्तस्ता
विषयसामर्थ्यादिनिरूपणं तत्प्रमाणानुग्राहकं ज्ञानं अपोहनमूह
नमपोहनं [illegible]ज्ञाननिवृत्तिः यद्वा अपोहनं मोहनं ऊहनं मू
ढ एव चेतिस्मृतेः एवं स्वस्य सांसारिकभोगसाधनत्वमुक्त्वाधुना मो
क्षसाधनत्वमाह वेदैश्च सर्वैरहमेव वेद्यः इंद्रवरुणाग्निवायुस्
र्यसोमादीनां मदंतर्यामिकत्वेन मदात्मकत्वादिंद्रं यजेत वरुणं
यजेत इत्येवमिंद्रादिदेवप्रतिपादनपरैरपि सर्वैर्निखिलैर्वेदैर
हमेव सर्वेश्वरः सर्वान्तर्यामी सर्वशक्तिमान् सर्वकारणत्व
त्सारथिः ज्ञातव्य एव वेद्यो वेदितुं योग्यो न तु मद्भिन्नत्वेनेंद्रादिदेवः
स्यवधारणेन सूच्यते योऽसौ सर्वैर्वेदैर्गीयत इति श्रुतेः कर्मज्ञानोपा
सनभेदेन वेदानां त्रिकांडकात्वत्र कर्मकांडेन परंपरया ज्ञा
नोपासनाभ्यां साक्षात्त्वहं यज्ञमर्थः ननु वेदवेद्यत्वमस्तीति केन प्रका
रेण जानीयामिति चेन्नत्राह वेदान्तकृत् वेदानामन्तमर्थनिर्णयं करो
तीति तथा यद्वा वेदानामन्तं शिरोभागं करोतीति तथा हे पार्थ न कृ
पणो वेदार्थनिर्णयमुपनिषद्वा अहमेव करोमीत्यर्थः नन्वन्यैरपि
वेदार्थनिर्णयः कृतस्तथैव कृत[illegible]इति कथं ज्ञायत इति
चेन्नत्राह वेदविदेव चाहमिति वेदविदहमेव वेदोपायनरूपस्तमहं
यमर्थनिर्णयं सर्ववेदार्थस्ततोऽन्यथा न भ्रान्तिविजृंभितमेवा
न्यो वेदार्थावबोधनान्मात्तदेहमेव मोक्षसाधनरूपस्त्वमभिप्रायः १५

मधुसूदनी टीका १०

किंच सर्वस्य ब्रह्मादिस्थावरान्तस्य प्राणिजातस्याहमात्मा सन् हृदि बुद्धौ
सन्निविष्टः स एष इह प्रविष्ट इति श्रुतेः अनेन जीवेनात्मनानुप्रवि
श्य नामरूपे व्याकरवाणीति च अतो मत्त आत्मन एव हेतोः प्राणिजात
स्य यथानुरूपं स्मृतिः एतज्जन्मनि पूर्वानुभूतार्थविषया इह योगि
नां च जन्मान्तरानुभूतार्थविषयापि तथा मत्त एव ज्ञानं विषयेन्द्रि
यसंयोगजं भवति योगिनां च देशकालविप्रकृष्टविषयमपि ए
वं कामक्रोधशोकादिव्याकुलचेतसामपोहनं च स्मृतिज्ञानयोर
पायश्च मत्त एव भवति एवं स्वस्य जीवरूपतामुक्त्वा ब्रह्मरूपतामाह

श्री· गी·टी· पं·

वेदैरित्यादि वेदैश्च सर्वैरिंद्रादिदेवताप्रकाशकैरपि अहमेव वेद्यः
सर्वात्मत्वात् इंद्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरु
त्मान् एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुरिति मंत्रव
र्णात् एष उ ह्येव सर्वे देवा इति श्रुतेः वेदांतकृत् वेदार्थसंप्र
दायप्रवर्तको वेदव्यासादिरूपेण न केवलमेतावदेव वेदवि
च्चाहं कर्मकांडोपासनाकांडज्ञानकांडमंत्रब्राह्मणरूपसर्ववे
दार्थविच्चाहमेव अतः साधूक्तं ब्रह्मणो हि प्रतिष्ठाहमिति

[illegible]
[illegible]
[illegible] १५

सदानंदी टीका ॥

ब्रह्मादिस्थावरांतस्य प्राणिजातस्य सर्वतः आत्मैव सन्नविशेषोऽहं बु
द्धौ सर्वावभासकः १ मत्त आत्मन एवात्र प्राणिजातस्य च स्मृतिः प
न्नजन्मनि पूर्वानुभूतार्थविषयावमा २ जन्मांतरानुभूतार्थविष
याप्यस्ति योगिनां विषयेंद्रियसंयोगजन्यं ज्ञानं तथात्मनः त्रिकाल
विप्रकृष्टैकविषयं वापि योगिनां मत्त एव नयोः कामक्रोधाद्याकुल
चेतसां ४ पापकर्मानुरोधेन विनाशः स्मृतिबोधयोः उक्तैवं जीवभा
वेन प्रविष्टः सर्वमानसे ५ आत्मानं ब्रह्मरूपेण दर्शयन्मधुनाहरिः वे
दैः सर्वैरपींद्रादिदेवताभासकैरपि ६ अहमेवाखिलात्मत्वाद्वेद्यः
सर्वेश्वरेश्वरः एष उ ह्येव सर्वे वै देवा इत्यादि वेद वेदव्यासादिरूपे
ण वेदांतार्थप्रवर्तकः संप्रदायानुमानतह्वदवेत्ताहमेव च ८ कां
डत्रयात्मके वेदे सरहस्ये समंत्रके अर्थतः सर्ववित्वाच्च सम्यग्वे
त्ताहमेव च ९ ब्रह्मणो हि प्रतिष्ठाहमित्यादीनः समीरितं १५

नीलकंठी टीका १२

किंच सर्वस्य प्राणिजातस्याहं हृदि संनिविष्ट आत्मेत्यर्थः अतो मत्त
आत्मन एव स्मृतिर्ज्ञानं च भवतः पापिनां तु तयोरपोहनं विस्म
रणं मत्तो न च भवति तथा च सर्वैर्वेदैः कर्मोपासनाज्ञानकांडात्मके
रहमेव परमात्मा वेद्यो वेदांतकृत् वेदांतोक्तविद्यासंप्रदायकृत्

वेदविन्वेदार्थविच्चाहमेव पनेनवेदांतविद्वेदविद्वस्वविभू
तिरित्युक्तंभवति १५

आनंदीटीका १३

सर्वस्ययस्यकस्यापिप्राणिनःहृदिचेतनाधिकरणेदेशेहंपरमेश्व
रएवांतर्यामितयाजीवात्मतयासंस्थितःक्षेत्रज्ञोपिपरमेश्वरएवप्रति
तएवततत्कार्यकर्त्तामत्तोमदधिष्ठानादेवस्मृतिःपूर्वानुभूतार्थः
स्मरणम् योगिनांजन्मांतरानुभूतार्थस्मरणमपिज्ञानंविषयेंद्रि
यसंयोगादिजंप्रत्यक्षादिज्ञानम् योगिनांदेशकालव्यवहित
मपिअपोहनमप्यवाहृतिर्गोत्वादश्वादीनामिव सारासारविवेकः
आत्मानात्मविचारश्चवेदैश्चसर्वैरहमेववेद्यःसर्ववेदामद्वेदना
र्थाएवेत्यर्थः वेदांतकृत्वेदःज्ञानकर्मकांडप्रतिपादकस्य
चराशिस्तस्यांतःब्रह्मैवेदंसर्वमित्यादिनिष्ठाउपनिषद्भागः
तस्यकर्त्तावेदविदेवचाहमादिविद्वानितिलक्षणलक्ष्यवेद
रूपेणतदर्थज्ञानात्तदुक्तकर्मानुष्ठानाच्चप्रकृतिपुरुषयोराणा
मन्योन्यवैलक्षण्यंलक्षयतियावदध्यायसमाप्तिम् १५ ॥

रामकंठीटीका १४

सर्वस्यकस्यचित्प्राणभृतोहमेकःपरमात्माहृदिसर्ववस्तुसंवे
दनाधिकरणभूतेशरीरैकदेशेसन्निविष्टःसर्वार्थसंवेदितत
याकृतस्थितिरतोमत्सकाशादेवात्मनःकृतसन्निधेःसर्वदेहज्ञा
नांस्मृतिर्ज्ञानंसमोहनलक्षणःशक्तिप्रसरः किमनेनोक्तंभ
वति इहसर्वदेहज्ञानांदेहविषयादिविभागविभक्तभावसंवे
दकस्वभावानांसंवेदनशक्तिस्तत्तदर्थभावाभावपरिच्छेद
कत्वात्त्रिधाप्रवर्तते तथाहि कस्यचित्कदाचिदपोहनरूप
तयाप्रसरति भावकत्वेनचप्रसरोहिप्रकाशोज्ञानात्मकःस्मृ
त्यात्मकश्च यदभूतपूर्वस्यप्रकाशनंतज्ज्ञानंयदनुभूतपूर्वस्य
प्रत्यवमर्शनंसास्मृतिरुभयथापिप्रकाशनाभावस्त्वपोहन
मितित्रिप्रकारोयंदेहज्ञशक्तिप्रसरःसंवेदकात्मनात्परमा

श्री॰
गी॰ टी॰
पं

78

र्थसंवेदितैरेकस्मान्मत्तएवप्रसरन्मायावशान्नानात्वेनसंवंधन
याप्रतीयतेइत्यर्थः यथाचैवंप्रसरोमत्तःप्रसरति तथासकलज
गत्क्रियाप्रपंचप्रथनप्रथमकारणभूतःपरापरतत्वरूपःशाब्दरा
शिरपिमत्तएव तेनचानन्तप्रपंचप्रसृतेनाप्यहमेवैकोवेद्यइत्याह
वेदैश्चसर्वैरित्यादि वेदोवर्णाश्रमविभागव्यवस्थितिविविधक्रि
यानियामकःशाब्दराशिस्तस्यान्तोनिष्ठावेदान्तआत्मैवपरमेश्वरप
कतत्वमित्यादिज्ञानव्यवस्थापकोवचनप्रपंचस्तस्योभयरूपस्याप्य
हमेवैकःकर्तेत्यनेनवेदवेदान्तात्मकशाब्दस्यस्वतःसिद्धत्वंहेतुवादि
व्यवस्थापितेश्वरप्रणीतत्वंचपराकृतमभिप्रेतं यतोयमत्राशयः
इहाह यच्चिन्मकाशस्वभावएकःपदार्थःपरमार्थसन्नित्याह श्र
येनावत्सिद्धान्तोव्यवस्थापितः सचैवंविधोहंयेनाव्यभिचारिणा
प्रत्यवमर्शात्मकेनधर्मेणतथाविधंस्वरूपंव्यवस्थापयामितम
ंरेशाब्दतत्वं नतदस्यपरमार्थतामत्स्वरूपाभिन्नस्यापिमदिच्छा
ज्ञावितेदंताभासमाननानाजगद्भावभेदव्यवस्थापकत्वेनविजृं
भमाणस्यतद्वदनंतविकल्पात्मकंस्वरूपमपरंशाब्दतत्वं तस्य
चैवंविधस्यज्ञानधर्मस्यैवविकल्पात्मकस्यश्रोत्रग्राह्यस्यनिर्वि
शेषात्मकतयावभासितःपदार्थसंकेततयामयैवसत्यसंक
ल्पेनपरमगुरुणापूर्वेषामपिपूर्वेणपरमपुरुषेणमल्पका
र्यत्तेयार्थ्याविषयतयावेदवेदान्तरूपवाचकत्वेनप्रतिनियमि
न स्मादृगर्थवाचकत्वेनचावभासमानमेववेदवेदान्तयोर्मत्का
र्थत्वं नतदनेनानन्तप्रपंचेनापिवेदवेदान्तप्राधान्यप्रतिपादने
नशाब्दात्मकेनस्वशक्तिप्रसरेणनानावाच्यनिष्ठतयावस्थितेन
नापिपरमार्थतश्चिदात्मकस्वरूपव्यतिरिक्तपदार्थान्तराभावा
दहमेवैकोवेद्यइतिवेदैश्चसर्वैरहमेववेद्यइत्यनेनोक्तं ।
तदित्थंस्थिते त्रिप्रकारःप्रमातृव्यवहारोव्यवस्थितस्तथाभौ
तिकशरीरनिष्ठाहंप्रत्ययनिबंधनोव्यवहारःसस्थूलःप्रमाता ।
यस्यचतादृक्शरीरवेदकतयातिरिक्तजीवनिष्ठाहंप्रत्ययनिबंध

नोव्यवहारः सस्वतमप्रमाता ह्यावेतौ भेदस्फुरणान्मायीयौ प्र
मातारौ यस्तु पुनरशेषवेत्तृव्यापकपरमार्थसत्यसामान्यसंवि
त्प्रकाशैकस्वभावपरमात्मनिष्ठाहंप्रत्ययनिर्वंधनोभेदप्रती
तिकल्पनामात्रसंस्पर्शशून्यस्वरूपप्रत्यवमर्शमात्रात्मकोव्य
वहारः सपरमार्थसत्यः परमपुरुष स्तत्स्वरूपसमापत्तिश्च
परासिद्धिरितिक्रमेण प्रतिपादयंशास्त्रसिद्धार्थसंग्रहं दर्शयि
तुमाह ॥ १५ ॥

लास्तिकी [illegible] टीका १५

+ अथस्वातंत्र्याविमुक्तमीश्वररूपमेवैवदेहोद्देशविशेषेनिविष्टतयापुरुषोत्तमशब्दवाच्यमुपासनार्थं निर्दिशति ॥

+ सर्वस्यैवप्राणिजातस्य हृदि सर्वसंविदधिकरणे देहैकदेशेहमी
श्वरः सम्यक् स्वातंत्र्यावियोगेनस्थितः स्वात्मनः स्वातंत्र्यावियोग
माह मत्त इति मत्त एवेश्वरात्मप्रकाशात्स्मृतिरनुभूतार्थविषया
संस्कारशेषतां नीतस्य संहृतस्यार्थस्य पुनरवभासनात्मिका ज्ञा
नं विषयेंद्रियसंयोगजन्यं विषयावभासनात्मकस्यापनरूप
म् अपोहनं च तत्प्रमोषरूपः संहारः न तु हृदस्याजीवाहा तथा
सर्वैश्च वेदैरहमेवेश्वरो वेद्यो वेदप्रवेदनीयः तथा वेदांतकृत्सं
प्रदायप्रवर्तकश्चाहमेव वेदार्थविच्चाहमेवेश्वरः न तु हृदस्यो
नवाजीवो अधुनाजीवांकुरस्या स्वात्मनः पुरुषोत्तमाख्यस्य
स्वातंत्र्ययोगेनव्यतिरेकमाह द्वाभिः १५ ॥

पंचोले टीका

किंच सर्वस्येति हे अर्जुन अहं सर्वस्य प्राणिजातस्यात्मा सन् हृदिबु
द्धौसन्निविष्टो वर्तते अतः मत्तः आत्मप्रकाशात्सर्वप्राणिनां ज्ञान
स्मृतीभवतः तयोरपोहनमभावश्च मत्त एव भवति तत्रापि ये पु
ण्यकर्माणस्तेषां पुण्यानुरोधेन ज्ञानस्मृतीभवतः तथा ये पाप
कर्माणस्तेषां पापकर्मानुरूपेण स्मृतिज्ञानयोरपोहनं अपगमः
अभावो भवति हे अर्जुन सर्वैर्वेदैरहमेव परमात्मा वेद्यो वेदितव्यः
तथा वेदांतकृत् वेदार्थसंप्रदायकृत् हे अर्जुन वेदवित् वेदार्थविदह

मेवचाहम्: १५

रणवीरसमिद्धोधिनी

किंच सर्वस्येति सर्वस्य ब्रह्मादिस्थावरांतस्य प्राणिजातस्य हृदि बुद्धौ सन्निविष्टः स्थितः अतो मत्त एव सर्वस्य स्मृतिरनुभूतार्थविषया बुद्धिवृत्तिः तथा ज्ञानं विषयेंद्रियसंयोगजं मत्त एव भवति अपोहनं स्मृतिज्ञानयोरपायश्च मत्त एव भवतीति अयं भावः यस्मात्सर्वस्य स्मृतिज्ञाने मदायत्ते अतो मया स्मृतिभ्रंशमवापितो वपांगुह्रायसजी भवति मद्वचनादरेण स्वधर्मभूतं गुरुं मात्यादीरिति वेदश्चेति बहुवचनमशेषतुर्वेदस्यादरार्थं तथा च सर्वैर्वेदैः मंत्रार्णेन यजुर्वेदेनेत्यर्थः अहं परमेश्वर एव तत्राभिहितनानाशाखाप्रयोगकौशल्येन वेद्यो ज्ञातव्यः स्वयमेव फलनिश्चयानामंते ह्यमेव प्राप्य इत्यर्थः वेदांतकृदिति वेदेषु यजुर्वेदे योक्तो निश्चयो यथावर्णितसंप्रदायो विवस्वदादिद्वारेण तत्प्रवर्तकश्चाहमेव तथा वेदवित्संप्रदायवेदविदहमेवेति भावः १५ ॥

मधुभाष्य

१५॥

भाषा अनुवादटीका

और मैंही यावत प्राणी के हृदय मे अन्तर्यामी रूप से प्रवेश करता हूं इसी से सव प्राणीयों को ईश्वरकृत अर्थ विषय का स्मरण होता है और इन्द्रियों के संयोग से जो रूपादि विषयों का ज्ञान सोहमी से होता है और अपोहन कहे स्मरण औ विषयों का ज्ञान इन दोनो का अभाव भी हमसे ही होय है और वेदोमे कहे हूये तीन तीन देवता रूप भी हम है और वेदान्तकृत अर्थात शिष्य प्रशिष्य रूपसे सम्प्रदाय के प्रवर्तक कहे ज्ञानदाता गुरु स्वरूप भी मै हीं औ वेदार्थवित भी मै हीं हो १५

चौपई

मेंहिं सभकी देहस्थित होई मोसें स्मृति ज्ञान अपोहन सोई सर्व वेदसें हों लषने योगा वेदांतकृत वेदज्ञ मो कह लोगा १५॥

द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच क्षरः
सर्वाणिभूतानिकूटस्थोक्षरउच्यते १६

शांकरभाष्य टीका १

भगवतईश्वरस्य नारायणाख्यस्य विभूतिसंक्षेपउक्तोविशिष्टोपा
धिकृतः यदादित्यगतं तेजइत्यादिनाअथाधुना तस्यैव क्षराक्ष
रोपाधिप्रविभक्ततया निरुपाधिकस्य केवलस्य स्वरूपनिर्दि
धारयिषयोत्तरश्लोकाआरभ्यन्ते तत्र सर्वमेवातीतानागतानन्त
राध्यायार्थजातं त्रिधा राशीकृत्याह द्वाविमाविति द्वौइमौपृथग्रा
शीकृतौ इत्युच्येते लोकेसंसारे क्षरश्च क्षरतीति क्षरः विनाशीत्येकोरा
शिःपरः पुरुषोऽक्षरस्तद्विपरीतोभगवतोमायाशक्तिः क्षराख्यस्य
पुरुषस्योत्पत्तिबीजमनेकसंसारिजन्तुकामकर्मादिसंस्काराश्र
योऽक्षरः पुरुषउच्यते कौतौ पुरुषावित्याह स्वयमेव भगवान्
क्षरः सर्वाणि भूतानि समस्तं विकारजातमित्यर्थः कूटस्थः कूटो
राशिरिव स्थितः अथवा कूटमायावञ्चना जिह्म कुटिलता वेति
पर्यायाः अनेकमायावञ्चनादिप्रकारेण स्थितः कूटस्थः संसा
रबीजानन्त्यान्न क्षरतीत्यक्षरउच्यते १६

१पुरुषौ

आनंदगिरिकृत टीका २

उत्तरश्लोकानां तात्पर्यं वक्तुं वृत्तं कीर्तयति भगवतइति विशिष्टो
पाधिरादित्यादिः संप्रत्यध्यायसमाप्तेरुत्तरसन्दर्भस्य तात्पर्यमा
ह अथेति नकेवलं निरुपाधिकात्मस्वरूपनिर्धारणायोत्तरग्रन्थः
किन्तु सर्वस्यैवं गीताशास्त्रस्य अर्थनिर्णयार्थमित्याह तत्रेति त
रान्तरोपाधिभ्यां परमात्मना च राशित्रयमुक्तेन सर्वात्मत्वेनाशङ्क्या
दिदोषप्रसक्त्यायुक्तं द्वाविमौइति पुरुषोपाधित्वात् पुरुषत्वं न
सात्वादिति विवक्षित्वाह पुरुषाविति परं पुरुषं व्यावर्तयति भ
गवतइति तत्र कार्यलिङ्गकमनुमानं सूचयति क्षराख्यस्येति
मायाशक्तिं विना भोक्तृणां कर्मादिसंस्कारादेवोक्तकार्योत्प
त्तिरित्याशङ्क्य तस्य निमित्तत्वेपि मायाशक्तिरुपादानमिति मत्वाह

श्री· गी· टी· पं·

४१

अनेकेति कामकर्मादीत्यादिशब्देन ज्ञानं गृह्यते प्रकृतिं पुरुषं
चैवेति प्रकृतयोरिह ग्रहणमिति शंकामाकोन्तद्वारा [illegible]
[illegible] निवारयति कौन्ताविति कूटशब्दार्थमज्ञानेन स्थितस्य
कूटस्थतेति सपिण्डितमर्थमाह अनेकेति तस्य कथमक्षरत्वं
विना ब्रह्मज्ञानमनाशादित्याह संसारेति १६

स्वामिकृत टीका ३

इदानीं तद्धाम परमं ममेति यदुक्तं स्वकीयं सर्वोत्कृष्टं स्वरूपं दर्श
यति द्वाविमाविति त्रिभिः द्वाविमौ क्षरश्चाक्षरश्चेति पुरुषौ लो
के प्रसिद्धौ तावेवाह तत्र क्षरः पुरुषो नाम सर्वाणि भूतानि ब्र
ह्मादिस्थावरान्तानि शरीराणि अविवेकिलोकस्य शरीरेष्वेव पुरु
षत्वप्रसिद्धेः कूटः शिलाराशिः पर्वत इव देहेषु नश्यत्स्वपि निर्वि
कारतया तिष्ठतीति यद्वा कूटः कपटः कायवंचना माया प्रपंचाका
रेण परिणतानेकरूपस्थितः कूटस्थश्चेतनो भोक्ता स तु अक्षरः पु
रुषः उच्यते विवेकिभिः १६

पिशाचभाष्य टीका ४

किंचात्मन क्षरपक्षोऽपरोऽक्षरस्तत्र क्षरं दर्शयति क्षरः सर्वाणि
भूतानि प्राणिनः अक्षरः पुरुषः कूटस्थः अचलः अव्याकृताना
त्मा सोऽक्षर उच्यते १६

+ अतो मत्त एव सर्ववेदानां सारम
र्थं शृणु॥

रामानुजभाष्य टीका ५

+ द्वाविमाविति क्षरश्चाक्षर एव चेति द्वाविमौ लोके पुरुषौ प्रथि
तौ तत्र क्षरशब्दनिर्दिष्टः पुरुषो जीवशब्द[illegible]कल्पनीयः ब्रह्मा
दिस्तंबपर्यंतक्षरणस्वभावाचित्संसृष्टसर्वभूतानि अत्राचित्सं
सर्गैकोपाधिना पुरुष इत्येकत्वनिर्देशः अक्षरशब्दनिर्दिष्टः कू
टस्थः अचित्संसर्गविमुक्तः स्वेन रूपेणावस्थितो मुक्तात्मा स त्व
चित्संसर्गाभावात् अचित्परिणामविशेषब्रह्मादिदेहासाधार
णो न भवतीति कूटस्थ इत्युच्यते अत्राप्येकत्वनिर्देशो विविक्तयो
गरूपैकोपाधिनाभिहितः पूर्वमनादौ काले मुक्ता अनेके एव
यथाकथंचिदुक्ता न तु सामान्यतोऽज्ञानमागताः ममसाधर्म्यमा

भि^

प^

गताः सर्गेपि नोपजायंते प्रलये न व्यथंतीति चेति १९

अभिनवगुप्तकृत टीका ९

महार्थे १९ पंचोनविंशो ऽत्रकार्थेमू

परमार्थप्रपा टीका ७

अथ वेदेन तदात्मज्ञानी तत्त्वेन वेद्यं स्वकीयं सूत्रात्मस्वरूपमाह
द्वाविति इमावनुभूयमानौ द्वौ पुरुषौ लोके प्रसिद्धौ तावाह क्षर
श्चाक्षरश्चेति तत्र सर्वाणि भूतानि शरीराणि क्षर अस्त्वान्तरश्चाक्षर
ते कूटस्थ लक्षणं चेति उच्यते इति कूटस्थ अनेन नानारूपः सोऽक्षर उच्य
ते १९

वनमाली टीका ८

पुरुषोत्तमत्वं मम द्रष्टव्यमाह द्वाविति इमौ द्वौ प्रसिद्धौ वेतनौ
पुरुषौ शयनात् पुरुषौ लोके च लोकने मनीति यावत् तत्र परम पु
रुषं प्रावर्तयितुं लोक इत्युक्तं ईशितव्यवर्गः इत्यर्थः ब्रह्मादिजीवाः
प्राकृतदेहवंतः क्षरः पुरुष उच्यते शरीरक्षरणात् कूटे लोहा
पाताद्यधिकरणे लोहस्तद्वन्निर्विकारतया तिष्ठतीति कूट
स्थोऽक्षर मादि मुक्तसमूहो ऽक्षर उच्यते देहादिनोपि क्षरणाभावात् १९

उत्तमवैजयन्ती टीका ९

एवं स्वस्य मोक्षसाधनत्वं प्रतिपाद्येदानीं वेदैश्च सर्वैरहमेव वेद्य इ
त्याद्युक्तप्रकारेण पुरुषोत्तमत्वेन मां यो भजति स एव ज्ञानवानि
ति वक्तुं क्षराक्षरशब्दनिर्दिष्टयोर्बद्धमुक्तरूपयोर्जीवा
त्मनोः स्वरूपमाह द्वाविमाविति लोके लोक्यते तत्त्वमनेनेति शास्त्र
ने लोके वेदे तस्मिन्नेवेदे इमौ प्रमाणसिद्धौ द्वौ पुरुषौ जीवौ प्राकृता
प्राकृतदेहशायिनौ प्रथितौ भवतः तौ काविर्त्यपेक्षायामाह क्षर इ
ति ब्रह्मादिस्तम्बान्तशरीरक्षरणस्वभावात् क्षरशब्दनिर्दिष्टोनेका
वस्थो बद्धजीवः जीवानामनेनस्वरूपत्वेप्यविद्यासंसर्गैकधर्मसंबं
धादेकत्वनिर्देशो नासंगतः च पुनः अक्षरोपि प्राकृतदेहयुक्तोपि
न शरीरक्षरणाभावादेकावस्थो मुक्तजीवः अत्राप्यप्राकृतदेहयो
गैकधर्मसंबंधादेवैकत्वनिर्देशः समञ्जस एवकारः शावयवया
ऽक्षरः इति वदन्योगाख्यवच्छेदार्थकस्तेन जीवानां बद्धमुक्तमेदे

श्री॰
गी॰ टी॰
पं॰

८२

द्विविधत्वमेवयोनितम चशब्देन जीवानामनेकत्वंसूचितं न हि द्वि वि
धत्वमेवस्फुटयति क्षरस्सर्वाणीति निखिलानि ब्रह्मादिस्थावरप
र्यंतानि भूतानि अचिन्त्यशक्तिरक्षरस्तदुच्यते कूटस्थः कूटेनमा
दिषड्विकारशून्यत्वेन ... पाणिरिवं ... वदचलस्वस्वरू धनाश्रित
पेतिष्ठतीति कूटस्थोपहा कूटेऽनंतगुणराशौ भगवतितिष्ठती
ति तथाप्युक्तजीवात्मा अत्र एकत्वनिर्देशः प्रागुक्तपक्षे व
बोध्यः अन्यथा बहवो ज्ञानतपसा पूतामद्भावमागताः ममसा
मधु॰ धर्म्यमागताः सर्गेऽपि नोपजायन्ते प्रलये न व्यथंति चेत्यादिवक्त
व्योक्तिविरोधात् १६

एवं सोपाधिकमात्मानमुक्त्वा तदन्तरशब्दवाच्यकार्य
कारणोपाधिद्वयवियोगेन निरुपा
धिकं शुद्धमात्मानं प्रतिपादय
ति क्षरावानु भगवानर्जुनाय
त्रिभिः श्लोकैः॥

मधुसूदनी टीका १

द्वाविमौ पृथग्राशीकृतौ पुरुषोपाधित्वेन पुरुषशब्दव्यपदे
श्यौ लोके संसारे कौ ताविन्याह क्षरश्चाक्षर एव च क्षरतीति क्ष
रो विनाशी कार्यराशिरेकः पुरुषः न क्षरतीत्यक्षरः विनाशरहितः
क्षराख्यस्य पुरुषस्योत्पत्तिबीजं भगवतो मायाशक्तिर्द्वितीयः पु
रुषः तौ द्वौ पुरुषौ व्याचष्टे स्वयमेव भगवान् क्षरः सर्वाणि भूता
नि समस्तकार्यजातमित्यर्थः कूटस्थः कूटः यथार्थवस्त्वाच्छादनेना
यथार्थवस्तुप्रकाशनं वंचनं मायाशब्दपर्यायांतरं तेनावरणविक्षेप
शक्तिद्वयरूपेण स्थितः कूटस्थः भगवान्मायाशक्तिरूपः कारणो
पाधिः संसारबीजत्वेनानंत्यादक्षरउच्यते केचित्तु क्षरशब्देनाचे
तनवर्गमुक्त्वा कूटस्थोऽक्षरउच्यते इत्यनेन जीवमाहुः तन्न सम्यक् क्षे
त्रज्ञस्यैवेह पुरुषोत्तमत्वेन प्रतिपाद्यत्वात् तस्मात्क्षराक्षर
शब्दाभ्यां कार्यकारणोपाधी उभावपि जडावेवोच्येते इत्येव युक्त

१६

सदानंदी टीका १

एवं सोपाधिकं रूपमुक्त्वा श्रीहरिरात्मनः कार्यकारणरूपेण
द्वावुपाधी क्षराक्षरौ तद्वियोगेन चात्मानं निरुपाधिकमद्वयं वि म॰
वक्षुः सर्वशास्त्रार्थराशीकृतविधाधुना १ त्रिभिः श्लोकैर्जगत्वा

षः प्राहृतिकृपयास्फुटं पुरुषोपाधिभेदेनद्वैधराशीकृत्ताविमौ
३ वाभौ पुरुषशब्देनद्वौहिसंसारगोचरे क्षरनीति क्षरोनाशी शरीराभि
रेकोस्तिपुरुषः ४ न क्षरस्त्वक्षरोनाशशून्योविश्वस्यकारणं संसा
रिकात्मकर्मादिसंस्काराणांसमाश्रयः ५ श्रीमद्भगव[illegible]तोमाया
शक्त्याख्यः पुरुषोपरः पुरुषोत्तोचभगवान्व्याचष्टेस्वयमेवहि
६ समस्तंकार्यजातंचक्षरः पुरुषउच्यते तत्त्वस्याच्छादनेनैवात
त्त्वस्यप्रकाशने ७ कूटोमायाववनंचेयनर्थांतरमीरितं ते
नावरणविक्षेपशक्तिद्वयात्मनास्थितः ८ कूटस्थोभगवन्माया
शक्तिरूपोजगज्जनिः अनंतविश्वबीजत्वादक्षरोनादिपूरुषः ९

नीलकंठी टीका १२

सर्वशास्त्रहृदयंसंगृह्णाति द्वाविति लोकेप्रसिद्धाविमौ द्वावेव
पुरुषौ क्षरो विनाशीसचसर्वाणिभूतानिप्राणवंति कर्मक्षय
क्षमिप्रलयकैवल्यादौउपाधिनाशमनुविनाशशीलोजीवोब्रह्म
प्रतिबिंबभूतोजलार्कोपमः एतानज्वनपवैतेभ्योभूतेभ्यः सम
त्थायतान्येवानुविनश्यतीतिश्रुतेः कूटस्थोनिर्विकारोमायोपा
धिरक्षरः तदुपाधेरकर्मजत्वेननाशासंभवात् उपाधिद्वेषेणाव
शीकृतत्वाद्वासौनक्षरतिस्वरूपाच्च्यवतइत्यक्षरः १९

आनंदीटीका १६

लोकेदृश्यमानेस्मिंदेहेक्षराक्षरत्वेनद्वाविमौपुरुषौपुरिशय
नत्वश्रुतिसामान्यादेकत्रशरीरेसंहतौचेतनाचेतनौपुरुष
संज्ञाविषयौ क्षरः नाशवल्लक्षयति सर्वाणिभूतानिभूतप्रकृति
रूपाणिआकाशादिप्रधानांतानिकार्यकारणत्वेनैकीभूय
पुरिशयनात्क्षरंनित्यप्रतिक्षणंविकारंगच्छतीतिक्षुत्यस्मात्पुरुषः
क्षरउच्यतेद्वितीयस्तुजीवाख्यः कूटस्थोनिर्विकारः अक्षरः न
क्षरतिविनश्यतीतिसर्वभूतवर्गमस्कृतेचेतनत्वेनव्याप्नोती
त्यक्षरइतिश्रुत्यत्याचनिरुक्तेननैव्यापकस्यपुरुषोक्षरउच्यते

श्री॰ गी॰ टी॰ पं

यद्यप्यापातगुणनिकैयैवश्लोकचतुष्टयमेतद्व्याख्यातप्रायं तथा
पि विस्पष्टार्थं व्याख्यायते इहहि लोके परमेश्वरमायाशक्त्युज्ञा
वितक्रीडामात्रपरमार्थे समस्ते जगति द्वावेव पुरुषौ द्विप्रका
रैव भेदनिबंधनव्यवहारा पुरुषजातिः अत एव तावन्योन्यभिन्न
तया सर्वप्रमातृसंवेद्यस्वरूपत्वे सतीमाविति प्रत्यक्षनिर्देशावि
षये लोके शब्देन निर्दिष्टौ कौ तौ द्वाविति तयोः संज्ञामाह क्षरश्चा
क्षर एव चेति तयोर्लक्षणमाह एकस्तावत्क्षरः प्रतिक्षणविन
श्वरजन्मादिविकारयोगिभौतिकशरीरनिष्ठाहंकारात्मकत्वा
त्स्वरूपसंचलनशीलः तथाहि शरीरगताजन्मादयो विका
रास्तद्धर्मानुविधायिनि तद्व्यतिरिक्तस्वभावेपि तस्मिन्नुपच
र्यंते ततः सर्वाणि भूतानि क्षर इत्युक्तं । तथा निर्विकारसंवि
न्मात्रनिष्ठत्वात्कूटस्थ एव सर्वत शिखरादिवन्निष्कम्पतया
स्थितः कूटस्थो त एवक्षरस्वरूपविपरीतत्वादक्षर इत्युच्यते
अनेन मध्यमात्तस्मादशापुरुषस्य प्रतिपादिता यस्मात्तात्
मात्रस्वरूपनिष्ठत्वात्क्षरस्वरूपं ज्ञेयशरीरधर्मानुविधायित्वं चना
स्ति परस्परभेदेन व्यवस्थितानानाहेतत्प्रतीतिश्च न तावद्वाक्षि
त्रा एवं मायोज्ञावितं पुरुषजातिद्वैविध्यं प्रतिपाद्य पारमा ९
र्थिकं परपुरुषस्वरूपं प्रतिपादयितुमाह उत्तमः पुरुषस्त्व
न्यः परमात्मेत्युदाहृतः यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः सर्वज्ञत्वा
त्सर्वरूपत्वाच्च निष्कलत्वाविकलत्वाच्च न एवोत्तमः सर्वपुरुषा
तिशायित्वादेव परमात्मा मायादेहपरिग्रहायोगात्
निष्कलत्वाद्धर्मैर्नयदेवपरमात्मा मायादेहकारणमायायाधिष्ठा
धर्मसामानाधिकरण्याभावात्परमो नित्यतरः तत्त्वज्ञानमावे
ननो लाविन्यस्तः कोसौ यो निखिलजीवात्मस्वरूपे देहप्रतिष्ठा
नत्वादीश्वरः सन्निदं चराचरमनंतभावव्यापकं तंत्रलोकत्रयं स
दले जीवलोकमाविश्य तथा प्रकाशाद्यवयवाविभर्त्यपार

लोके संसारे इमौ पुरि देहे तादा[illegible] वलम्बनरूपात्क्षयनात्स्थानं ^स्था
अवियोगलक्षणात्क्षयनाच्च पुरुषशब्दव्यपदेश्यौ कौ ताविमाव्
^वलति क्षरश्चाक्षर एव च क्षरन्ति नन्दवस्थाभिरिति क्षरो ब्रह्मादिस्था
वरान्तो जीववर्गः अक्षरश्च न क्षरति स्वस्वरूपान्न चलतीत्यक्षरः
आत्मा एतौ पुरुषौ स्वयमेव भगवान्व्याचष्टे क्षरः सर्वाणि भूतानि
देहादिनिष्ठाहम्भावा जीवाः कूटस्थ उदासीन आत्मा पुरुषोत्त
[illegible] उच्यते विवेकिभिः [illegible]
[illegible] ॥ १६ ॥

पंचोलेटीका

यदादित्यगतमित्यादिचतुर्भिः भगवतो नारायणस्य विभूतीः संक्षेपत ^उक्ताः
इदानीं सर्वमेव अतीतानागताध्याये द्विधा राशीकृत्य तत्रोत्तरो
पाधिप्रविभक्तन्याया निरूपाधिस्वरूपेण निर्धारविषयी भगवतः अत्
कृष्टतमत्वप्रतिपादनाय उत्तरोग्रंथः द्वाविमाविति त्रिभिः लोके सं
सारे तत्र एको विनाशी एको राशिः अपरः पुरुषस्तद्विपरीतः अक्षरः अवि
नाशी तत्र आद्यस्य पुरुषस्य उत्पत्तिबीजमलया [illegible] अनेकसंसारिजं
तकामकर्मादिसंस्काराश्रयो राशिः पुरुषः तौ इमौ पृथक् राशीकृ
तौ पुरुषौ वर्तेते तौ स्वयमेव विविच्य दर्शयति उत्तरार्द्धेन भगवान् क्ष
रः सर्वाणि भूतानि समस्तो विकारजातं जगत् अक्षरः पुरुषः कूट
स्थः कूटो राशिरिव स्थितः अथवा कूटो माया वंचनं तद्रूपेण स्थि
तः ज्ञानविज्ञानक्षरतो त्यर्थः सकलसंसारबीजं द्वितीयः पुरुषः ५६

सगवीरसमिद्धोथिनी ॥

इमौ द्वौ लोके संसारे पुरुषौ पुरुषशब्देन व्यपदेश्यौ कौ ताविन्या
ह क्षरश्चाक्षर एव च क्षरतीति क्षरः कार्यराशिः न क्षरतीत्यक्ष
रो विनाशरहितः क्षरपुरुषोत्पत्तिबीजं तौ द्वौ पुरुषौ व्याचष्टे स्व

स्वयमेव भगवान् सर्वाणि ब्रह्मादिस्थावरांतानि भूतानि क्षर
पुरुषत्वेनोच्यंते कूटस्थ इति कूटे मायावरणविक्षेपरूपमा
यायाशक्तिद्वयेतिष्ठतीति कूटस्थः सकलसंसारबीजभूतः
क्षरपुरुषत्वेनोच्यत इति ॥१८॥

मधुभाष्य

भाषाअनुवादटीका

अब तद्धाम परमं मम यह जो इस अध्याय के सप्तम श्लोक मे कहा अपना सर्वोत्तमत्व सो तीन श्लोक से देखावते हैं कि जो क्षर औ अक्षर स्वरूप दोई पुरुष लोक मे प्रसिद्ध हैं इन का विशेष यह है कि ब्रह्मा आदि स्थावर पर्यन्त जो देह धारी तिन का नाम क्षर पुरुष सो कि अविवेकियों को स्थूल शरीर मे पुरुषत्व प्रसिद्ध है और कूटस्थ कहे शिला राशि पर्वत के समान देह नाश भये भी निर्विकार रूप स्थिति करै ऐसा जो चैतन्य स्वरूप भोक्ता है देखो विवेकी जनो के विचार से सोई अक्षर पुरुष है १६

दोहा

हि
दो यह पुरुषँ लोक में क्षर अक्षर कहे जोय क्षर यह स
भहि भूत हैं अक्षर कूटस्थ कहा सोय १६॥

85

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः यो
लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः १७

शांकरभाष्य टीका १

आभ्यां क्षराक्षराभ्यां विलक्षणः क्षराक्षरोपाधिद्वयदोषेणास्पृ
ष्टो नित्यशुद्धबुद्धमुक्तस्वभावः उत्तम इति उत्तमः उत्कृष्टतमः
पुरुषस्त्वन्यः अत्यन्तविलक्षणः आभ्यां परमात्मेति परमश्चासौ
देहाद्यविद्याकृतात्मभ्यः अन्नमयादिभ्यः पंचकोशेभ्यः आ
त्मा च सर्वभूतानां प्रत्यक्चेतन इत्यतः परमात्मेत्युदाहृतः उ
क्तो वेदान्तेषु स एव विशिष्यते यो लोकत्रयं भूर्भुवः स्वराख्यं
स्वकीयया चैतन्यबलशक्त्या आविश्य बिभर्ति स्वरूपसद्भावमा
त्रेण बिभर्ति धारयति अव्ययो नास्य व्ययो विद्यत इत्यव्यय ईश्वरः स
र्वज्ञो नारायणाख्य ईशनशीलः यथाव्याख्यातस्येश्वरस्य पुरु
षोत्तम इत्येतन्नाम प्रसिद्धं १७

आनंदगिरिकृत टीका २

कार्यकारणाख्यौ राशी दर्शयित्वा राश्यन्तरं दर्शयति आभ्यामि
ति वैलक्षण्यफलमाह क्षरेति उपाधिद्वयकृतगुणदोषास्पर्शे
फलितमाह नित्येति आभ्यां क्षराक्षराभ्यामिति यावत् उत्तम
इति पदद्वयं वस्तुतः सर्वथैव क्षराक्षरात्मत्वाभावहेत्वर्थं
जडवर्गसामान्यकृतं स्वातन्त्र्यं निरस्यति स एवेति लोकत्रय
मित्युपलक्षणं सर्वं जगदपि विवक्षितं चैतन्यमेव बलं तच्च श
क्तिर्माया तयेति यावत् जगद्धारणे परस्य व्यापारान्तरं वारय
ति स्वरूपेति नचास्य मायाधारयित्रा स्वतो बलत्वादित्याह अव्य
य इति संयुक्तमेतत् क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीश
इति श्रुत्यर्थं गृहीत्वाह ईश्वर इति किंच लोकवेदयोर्भगव
तो नामप्रसिद्ध्या सिद्धमर्थं पञ्चनमित्याह यथेति १७

स्वामिकृत टीका ३

यदर्थमेतौ लक्षितौ तमाह उत्तम इति एताभ्यां क्षराक्षराभ्याम

श्री· गी·टी· पं·

८६

योविलक्षणस्तूत्तमः पुरुषः वैलक्षण्यमेवाह परमश्चासावात्मे
तिचोदाहृतः उक्तः श्रुतिभिः आत्मत्वेन क्षरादचेतनाद्विलक्ष
णः परमत्वेनाक्षराच्च भोक्तुर्विलक्षणश्च परमात्मत्वं चद
र्शयति यो लोकत्रयमिति यईश्वरः ईशनशीलः अव्ययश्चानि
र्विकारएवसन् लोकत्रयं कृत्स्नमाविश्य बिभर्त्ति पालयति १७

पिशाचभाष्यटीका ४

पुरुषान्तरं दर्शयितुमाह उत्तमः प्रकृष्टतमः पूर्णमनेनजगदि
ति परमात्मेत्युदाहृतः उक्तो वेदान्तेषु विशिनष्टि यः पुरुषो
लोकत्रयं पृथिवीमन्तरिक्षं स्वर्गमाविश्य बिभर्ति बलेनधारय
ति तथाचश्रुतिः येनद्यौः पृथिवीचदृढा येननाकइति ईश्वरः
स्वामी १७

रामानुजभाष्यटीका ५

उत्तमइति उत्तमः पुरुषस्तु ताभ्यां क्षराक्षरशब्दनिर्दिष्टाभ्यांबद्ध
मुक्तपुरुषाभ्यामन्यः अर्थान्तरभूतः परमात्मेत्युदाहृतः सर्वा
सु श्रुतिषु च परमात्मेति निर्देशादेव ह्युत्तमः पुरुषो बद्धमुक्त
पुरुषाभ्यामर्थान्तरभूत इत्यवगम्यते कथं यो लोकत्रयमावि
श्य बिभर्त्यव्यय ईश्वरः लोक्यत इति लोकः तत्त्रयं लोकत्रयं अचे
तनं तत्संसृष्टश्चेतनो मुक्तश्चेति प्रमाणावगम्यमेतत् त्रितयं यआ
त्मतयाविश्य बिभर्ति स तस्माद्व्याप्याद्भर्तव्याच्चार्थान्तरभूतः
इतश्चोक्ता लोकत्रयादर्थान्तरभूतः यतः सोऽव्ययईश्वरश्चाव्ययस्व
भावो हि व्ययस्वभावादचेतनभूतात्संबंधेन तदनुसारिणश्चचे
तनात् अचित्संबंधयोग्यतया पूर्वसंबंधिनो मुक्ताच्चार्थान्तरभूत
एवं तत एव नयनेनस्य लोकत्रयस्येश्वरः ईशितव्यात्तस्मादर्थान्तरभूतः
१७

अभिनवगुप्तकृतटीका ६

~~सलार्थं~~ १८ एकोनविंशे उक्तार्थम् २८

परमार्थप्रपाटीका ७

अपतनाभ्यामतीतं पुरुषोत्तममाह उत्तमइति अन्यस्तु द्विलक्षणउ
त्तमः पुरुषो भवति स एव परमात्मेत्युदाहृतः प्रोक्तः यश्चासम
न्ताद्दाविश्य लोकत्रयं बिभर्ति तस्य पूर्णतदेवान् प्राविशादितिश्रु

तेः अव्ययोनिर्विकारः सन्नीश्वरोनियंतासूत्रात्मा ॥ ईदृशंपुरुषोत्त
मत्वमात्मनेनामनिर्वचनेनदर्शयति यस्मादिति यस्मात्क्षरंज
गतिक्रांतोहंनित्यमुक्तत्वात् अक्षराच्चेतनाद्वर्गादप्युत्तमश्चाति
शयत्वात् अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः देहाभिमानिनोजीवस्तु
त्वयइतिसंसारस्यादुत्तमः पुरुषोत्तमोहमितिमेलोकेवेदेचप्रसिद्धः अथ
[illegible]विदितिविशिष्टायेनप[illegible]नास्मिनोसायां
[illegible]रतिवेदेचप्रथितः [illegible]देपि इंद्रियेभ्यः
परंमनोमनसस्तु[illegible]
मे अव्यक्तात्परः पुरुषोव्यापकोलिंगएवच यंज्ञात्वामुच्यतेजंतु
रमृतत्वंचगच्छतीतिसर्वार्थः १८

वनमाली टीका ८

उत्तमः पुरुषः उत्तमोन्यो मीश्वरो देहेंद्रियाणांनियंतारोजीवा अपि
भवंत्ययंतु सर्वेषामिंद्रियाणांनियामकानांचनियंतातदात्तरात्मा
मन्योभिन्नोविलक्षणश्च नशरीरोत्यनवैलक्षण्यंयेनकः तस्यात्तम
त्वंसर्वनियामकत्वंनित्यानंतामवृत्तैश्वर्यादिनाश्रुत्यादिसंमति
माह परमात्मेत्युदाहृतः आत्मानारायणः परइत्यादिश्रुत्या सहि
नारायणोज्ञेयः परमात्मासनातनः पूतात्मापरमात्मेत्यादिस्म
त्यावोदाहृतः युक्तिमप्याह यइतियोलोकत्रयंचेतनात्मकंब्रह्म
कंजीवजातंतेनस्वानेचाविश्याचिंत्यशक्त्याप्रविश्यबिभर्तिधार
यतिपालयतिच ननुनभसोगतत्वादाकाशादिविकारस्यात्तत्राह अ
व्ययः सदैकाकारः सदैकरूपरूपायविरस्येवप्रभाविरमवइतिवेस्स
वोक्तेः ननुसर्वगतस्यपरममहतः कथंप्रवेशः प्रविष्टस्यचक
थंनिर्लेपत्वंतत्राह ईश्वर इतिमहतोमहीयानितिश्रुतिसिद्धप
रममहतोणोरणीयानितिश्रुत्याणुत्वेनप्रवेशोपपत्तिः लोके
एकत्रविरुद्धयोरप्यणुत्वमहत्वयोस्तत्रैश्वर्याद्विरोधेनसमाव
शः नचात्तत्वादिकमप्यैश्वर्यानसमावेशनाविरोधोपपाद
कैश्वर्याविरोधिनामेवहिसमावेशात्तत्वादेरैश्वर्यविरोधित्वात्

श्री·
गी·टी·
पं·

अतएवप्रविश्यस्थापितंनिर्लेपत्वम् असंगोह्ययंपुरुषइतिश्रुतेः १२

उत्तमस्त्वेनयत्री टीका ९

क्षराक्षराभ्यांविलक्षणंतद्धारकंपालकंतत्रियंत्रिरूपकंस्वस्वरूप-
माहउत्तमइतितुशब्दोऽस्ययोगव्यवच्छेदपरोऽवधारणार्थकोनत्व
र्थस्वंत्वनिषेधार्थकोऽस्यशाह्वपात्रात्पुनः उत्तमःक्षराक्षरशब्दनिर्दि
ष्टाभ्यांबद्धमुक्तपुरुषाभ्यांविलक्षणःपुरुषश्चेतनाचेतनाभ्यामात्मा
भवतितस्माच्चाभ्यामन्यएववाधान्तरभूतएवेत्यनेनजीवेशयोरूपाधिक
तभेदस्यपालनम् ननुकिंप्रमाणमित्यपेक्षायांश्रुतिसंमतिमाह
परमात्मेत्युदाहृतइतिपरमश्चासावात्माचेत्यथाक्षराक्षरपुरुषाभ्यांवा
त्मापेक्षपरमात्मेत्येवमुदाहृतःसर्वव्यापीसर्वभूतान्तरात्मात्मा
त्माहिपरमइत्यादिभिःश्रुतिभिरपिकथितःपरमत्वेनाक्षरक्षा
द्विनिर्दिष्टाद्वयाद्विलक्षणइत्यर्थःननुसोपुरुषःकःकेनधर्मेण।
वाक्षराक्षराभ्यामुत्तमइत्यपेक्षायांतस्योत्तमताप्रयोजकंधर्ममाह
योलोकत्रयमितियःपरमात्मालोकत्रयंस्वर्गादिकंयद्वालोक्यन्तइतिव्यु
त्पत्यालोकोऽचेतनंतत्संसृष्टचेतनानोमुक्तचेतनंनवतेषांलोकानांत्र
यंलोकत्रयमाविश्यतत्रदंतर्यामिरूपत्वेनततत्रयंप्रविश्यविभर्तिधा
रयतिपालयतिवपपेक्षेशमेतज्जगद्विधारणपालनरूपमीशने
कर्मास्ति सएवोत्तमःपुरुषोननुबद्धोमुक्तश्चनचेतनकर्मासम्भवा
ज्जगद्व्यापारवर्जमितिप्रतिषेधाच्चननुयद्येवंतर्हिबद्धजीवोपि
देहादीनांविशयनेषान्याधारणेपालनंचकरोतितस्यात्रस्यकोवाविशे
षइत्याशंकायामाहअव्ययइति अविनाशिगाह्ययस्वभावोजीवोऽसम
त्वव्ययपदइत्यान्विशेषः अयंभावःयथामेषप्रसंगात्सिंहशावकः
स्वस्वरूपंस्वभावंविस्मृत्यमेषस्वभावंभजतेनतथाऽनायविषयानाय
चेतनव्ययस्वभावप्राकृतस्वेतदेहादिसंगात्स्वकीयमीश्वरांशम
व्ययरूपंस्वरूपस्वभावंविस्मृत्यदेहएवाहंजन्ममरणस्वभावोऽहंदुः
खीरोगीसाकारकंव्ययस्वभावंभजतेपरमात्मात्वनत्रलोकत्रये
प्रविष्टोपिनव्ययरकोपितमालकोपिनस्वभावेनमहत्वानीतिनित

हे
त्रि

व्ययस्वभावादीदृशोबद्धोमाभूत्किंत्वव्ययस्वभावत्वान्मुक्तस्त्वभव
त्येवेतिचेन्नाहईश्वरइतिअचेतनतद्वद्मुक्तात्मकस्यलोकस्य
ईश्वरोनियंतास्वामीवानोमुक्तादपिपदार्थांतरस्यपर्थः ११

+ आभ्यांक्षराक्षराभ्यांविलक्षणः क्षराक्षराख्योपाधिद्वयदोषेणास्पृष्टोनित्यशुद्धबुद्धमुक्तस्वभावः ॥

मधुसूदनी टीका १

+ उत्तमउत्कृष्टतमःपुरुषस्त्वन्यः अन्यएवअत्यंतविलक्षणः आभ्यां
क्षराक्षराभ्यांजडराशिभ्यामुभयभासकस्तृतीयश्चेतनराशीरित्य
र्थः परमात्मेत्युदाहृतः अन्नमयप्राणमयमनोमयविज्ञानमयानं
दमयेभ्यः पंचभ्योविद्याकल्पितात्मभ्यः परमप्रकृष्टः अकल्पितो
ब्रह्मपुच्छंप्रतिष्ठेत्युक्तः आत्माचसर्वभूतानांप्रत्यक्चेतनइत्यतः पर
मात्मेत्युक्तोवेदांतेषुयः परमात्मालोकत्रयंभूर्भुवःस्वराख्यंसर्व
जगदितियावत् आविश्यस्वकीयमाययाशक्त्याधिष्ठायबिभर्ति
सत्तास्फूर्तिप्रदानेनधारयतिपोषयतिचकीदृशः अव्ययः सर्व
विकारशून्यईश्वरः सर्वस्यनियंतानारायणः सउत्तमः पुरुषः परमा
त्मेत्युदाहृतइत्यन्वयः सउत्तमःपुरुषइतिश्रुतेः [illegible]
[illegible]

१ सदानंदी टीका १

आभ्यांक्षराक्षराभ्यांयोनिर्विकारोविलक्षणः तयोर्दोषैरसंस्पृष्टःशु
द्धस्वभावतेपुना १ यउत्कृष्टतमस्ताभ्यामत्यंतविलक्षणः क्षर
क्षराभ्यामुभयभासकत्वात्तृतीयकः २ अविद्याकल्पितेभ्योऽन्न
मयादिभ्यआत्मभ्योत्तमः आत्माचसर्वभूतानांप्रत्यक्चेतनइत्यतः ३
परमात्मेतिसंप्रोक्तोवेदांतेषुसदक्षयः यएवपरमात्मेदंभूर्भुवःस्व
रितित्रयं ४ सर्वंजगत्स्वयाशक्त्याधिष्ठायैवबिभर्त्यसौ सत्तास्फूर्ति
प्रदानेनधारयत्यपिपोषकः ५ विकारशून्यःसर्वस्यनियंतापर
मेश्वरः सउत्तमोहिश्रुतिभिः परमात्मेत्युदाहृतः १७

नीलकंठी टीका १२

एताभ्यांकार्यकारणोपाधिभ्यामन्योनिरुपाधिरुत्तमःपुरुषःयो

सोपरमात्मेत्युदाहृतः शास्त्रे योसौ मायया ईश्वरो भूत्वा लोकत्रयं
उत्तममध्यमाधमशरीररूपं आविश्य धारयति शरीरत्रयं अ
प्यापि अव्ययः सर्वज्ञत्वेन ईश्वरधर्मेण अल्पज्ञत्वेन जीवधर्मे
णवानश्येति वर्ध्यते दीयते वेत्यर्थः १७

आनंदीटीका १३

तूत्तमः ताभ्यां क्षराक्षराभ्यामन्यः स्वस्वरूपादप्रच्युतः उत्तमः स
र्वोत्तीर्णः पुरुषः अन्तर्यामित्वेन पुरिशरीरे स्थितः परमात्मे
त्युदाहृतः यो लोकत्रयं कृत्स्नमेव जगदाविश्यानुप्रविश्य बिभ
र्ति धारयति यो व्ययति च ईश्वरः कर्तुमकर्तुमन्यथाकर्तुं च स
मर्थः [illegible] १७ ॥

रामकंटीका १४

उत्तमः पुरुषस्त्वन्य इत्यादि एताभ्यां क्षराक्षरशब्दोक्ताभ्यां पुरुषा
भ्यामन्यः सन्मस्वरूपमात्रप्रतिष्ठत्वाद्विलक्षणेनैवोत्तमः स
र्वपुरुषातिशायिधर्मित्वेनैव परमात्मा मायाहेतुकागमापाया
नित्यधर्मसामानाधिकरण्याभावात् परमो निरुत्तरः सन्नात्मा
चेतनो सौ विमुक्तः कोसौ योनिष्क्रान्तो चानस्वच्छन्देच्छापरिस्प
न्दत्वादीश्वरः सन्निदं चराचरमनेन भावजातेन संततं लोकत्रयं स
कलं जीवलोकमाविश्य तथा प्रकाशतया घापि विभर्ति धारय
ति इत्थं स्थितिमनुभावयति सामान्यसंवित्प्रकाशमात्रप्रकाश्य
तामन्तरेण न कश्चित्पदार्थो न विन्यदार्थेनावस्थानमलमित्यस
कृदुक्तमेवेन तत्करणे लोकत्रयस्य चाव्ययमिति विशेषण
मवाह नित्यत्वाद्व्ययत्वविवक्षया वा हव्यमनेपवमायीय पुरु
षवैलक्षण्यं प्रतिपादयितुमाह १७ ॥

+ अथात्क्षराक्षराभ्यां विलक्षणमीश्वरं
प्रतिपादयति ॥

लासिकी

[illegible]टीका १५

+ न तु पुरुषद्वयव्यतिरेके एताभ्यां क्षराक्षराभ्यामन्यो विलक्षणः
परामर्शरूपस्वातन्त्र्यनिष्पयोगितया उत्तमः पुरिदेहे च सन्नास
न्ध्यात् पुरुषः परमो निरवधिरात्मा परमात्मेतीश्वर एवोदाहृ

नः श्रुतिभिः स्मृतिभिश्च कोऽसौ य उत्तमः पुरुषो लोकत्रयं सकलं ज
गदाविश्य स्वातंत्र्येणाधिष्ठाय बिभर्ति धारयति संरक्षति नन्व
नश्वरेण नश्वरोऽपि जीववत्कर्मयोगी परतंत्रो वा भवेदित्याशंक्याह
अव्ययः स्वरूपसंचलन रहित ईश्वरः स्वातंत्र्यमपरिमितं न [illegible]
[illegible] ॥ १७ ॥

पंचोलेटीका

यदर्थं क्षराक्षरविलक्षणोऽक्तेनमाह उत्तम इति तु पुनः उत्तमः
पुरुषः अन्यः एताभ्यां क्षराक्षराभ्यां विलक्षणः क्षराक्षरोपाधिद्
वयदोषेणास्पृष्टः नित्यशुद्धबुद्धमुक्तस्वभावः उत्तमः उत्कृष्टतमः
पुरुषः एताभ्यामत्यंतविलक्षणः पुरुषश्चैतन्यापरः परम उत्कृष्टः
आत्मा सर्वभूतानां प्रत्यगात्मा अतो वेदांतेषु परमात्मेति उक्तः य ई
श्वरः सर्वज्ञः ईशनशीलः लोकत्रयं भूर्भुवं स्वराख्यं प्रविश्य स्वकी
यया शक्त्या स्वरूपसद्भावमात्रेण धारयति १७ ॥

रमावीरसमिद्बोधिनी

उत्तम इति द्वाभ्यां क्षराक्षराभ्यामन्योऽत्यंतविलक्षण उत्तम उत्
कृष्टतमः परमात्मेत्युदाहृतः यो लोकत्रयं भूर्भुवः स्वराख्यं
सर्वं जगत् इति यावत् आविश्य स्वकीयसत्तयाधिष्ठाय बिभ
र्ति सत्तास्फूर्तिप्रदानेन धारयति पोषयति च कीदृशोऽव्ययः
सर्वविकारशून्य ईश्वरः सर्वस्य नियंता नारायणः स उत्तमः
पुरुषः परमात्मेत्युदाहृतः १७ ॥

मध्वभाष्य

89

जिस हेतु क्षर औ अक्षर दोनो पुरुष लक्षित भये हैं इससे जो उत्तम पुरुष सो इन दोनोसे भिन्न है उस की विलक्षणता क हते हैं कि सो परमात्मा स्वरूप है यह श्रुतियों मे कहा है और आत्मा अचेतन रूप क्षर से तथा परमात्मा अक्षर रूप भोक्ता से भी भिन्न है अब उनका परमात्मत्व देखावते हैं कि सो ईश्वर पदवाच्य नियन्ता औ अव्यय कहे निर्विकार स्व रूप हो के भी त्रैलोक्य के हृदय मे प्रवेश करिके प्राणी मात्र का प्रतिपालन करते हैं १७

दोहा

उत्तमपुरुषयह पकहे परमात्मकहाजोय जो प्रवि
श्य त्रयलोकभर ईश्वर अव्यय सोय १७॥

९०

१८

यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः अतो-
स्मिलोके वेदे च प्रथितः पुरुषोत्तमः १८

शांकरभाष्य टीका १

तस्य नामनिर्वचनप्रसिद्ध्यार्थवत्वं नाम्नो दर्शयन्निरतिशयोहमीश्व
र इत्यात्मानं दर्शयति भगवान् यस्मादिति यस्मात् क्षरमतीतोहं सं
सारमायावृक्षमश्वत्थाख्यमतिक्रान्तोहमक्षरादपि संसारवृक्षबी
जभूतादपि चोत्तम उत्कृष्टतम ऊर्ध्वतमो वा अतः क्षराक्षराभ्यामु
त्तमत्वादस्मि भवामि लोके वेदे च प्रथितः प्रख्यातः पुरुषोत्तम इ
त्येवं मां भक्तजना विदुः कवयः काव्यादिषु च पुरुषोत्तम इत्य
नेनाभिधानेनाभिगृणन्ति १८

आनंदगिरिकृत टीका २

अपूर्वकर्त्तादिवत्तस्य नाम्ना रूढत्वादर्थविशेषाभावाद्भगवतोपि
लौकिकेश्वरवदीश्वरत्वं सातिशयमिति नेत्याह तस्येति यस्मादि
त्यस्यापेक्षितं निक्षिपति उत्तमः पुरुष इति वाक्यशेषः १८

स्वामिकृत टीका ३

एवंभूतं पुरुषोत्तमत्वमात्मनो नामनिर्वचनेन दर्शयति यस्मादिति

ना

यस्मात्क्षरं जडवर्गमतिक्रान्तोहं नित्यमुक्तत्वात् अक्षराच्चेतनव

से

र्गादप्युत्तमश्च नियन्तृत्वात् अतो लोके वेदे च पुरुषोत्तमः प्रथितः
प्रख्यातोस्मि तथा च श्रुतिः स वा अयमात्मा सर्वस्य वशी सर्वस्येशानः
सर्वस्याधिपतिः सर्वमिदं प्रशास्तीत्यादि १८

पिशाचभाष्य टीका ४

तन्नामनिर्वचनार्थमाह यस्मात्क्षरं पुरुषमतीतः अतिक्रम्य स्थि
तः अक्षरादपि पुरुषादुत्कृष्टतमः सर्वेभ्यः पाप्मभ्य उदितत्वात्
तथा च श्रुतिः उदिति नाम स एव सर्वेभ्यः पाप्मभ्य उदित इति अतो
हेतोः अस्मिंल्लोके वेदे च पुरुषोत्तम इति प्रथितस्तदहं सर्वलोक
प्रसिद्ध इत्यर्थः १८

रामानुजभाष्य टीका ५

यस्मादिति यस्मादेवमुक्तैः स्वभावैः क्षरं पुरुषमतीतोहं अक्षरा

श्री॰
गी॰ टी॰
पं॰

91

त्यक्षरादप्युत्तमोहं तमभित क्षरतमः अतोहं लोके वेदे च पुरुषोत्त
म इति प्रथितोस्मि वेदार्थावलोकनात् लोक इति स्मृतिरिहोच्य
ते अतो स्मृतौ वेदे च सर्वैः अतो तावत् परमात्मेती रूपं संपद्यते न
रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः स्मृतौ च अश्वावतारे पुरु
षोत्तमस्याप्यनादिमध्यांतमजस्य विष्णोरित्यादौ १८

अभिनवगुप्त टीका ९

सहार्थं ॥ १८ एकोनविंशोऽध्यायमु १८

परमार्थप्रपा टीका ७

ईदृशं पुरुषोत्तमत्वमात्मनो नामनिर्वचनेन दर्शयति यस्मादिति
यस्मात्क्षरं जडमतिक्रांतोहं नित्यमुक्तत्वात् अक्षराच्चेतनावर्गाद
प्युत्तमः ... नियंतृत्वात् अतो लोके वेदे च पुरुषोत्तमः देहाभि
मानिनो जीवस्य पुरुष इति संज्ञा तस्मादुत्तमः पुरुषोत्तमोहमिति
लोके प्रसिद्धः अयनहि निर्मूला प्रसिद्धिरिति न्यायेन पुनावानस्य
महिमा अतोऽस्यायं पुरुष इति वेदे च प्रथितः ख्यातः न उत्त
मपर्ववेदेपि इंद्रियेभ्यः परं मनो मनसः सत्वमुत्तमं सत्वादपि
महानात्मा महतोऽव्यक्तमुत्तमं अव्यक्तात्परः पुरुषो व्यापको
लिंग एव च यज्ज्ञात्वा मुच्यते जंतुरमृतत्वं च गच्छतीति स्पष्टार्थः
१८

वनमाली टीका ८

उदासीनतया व्याख्यातस्येश्वरस्य क्षराक्षरविलक्षणस्य पुरुषोत्तम
इत्येतत्प्रसिद्धं नामनिर्वचनेन परमेश्वरोहमेवेत्यभिमानेन दर्शय
ति ब्रह्मणोहि प्रतिष्ठाहं तदहामपरमंममेत्याशंक्य स्वमहिमनि पु
धारणाय यस्मादिति यस्मात्क्षरमाश्रुत्य देहवज्जीवसमूहम
तीतोहं सर्वेश्वरः अक्षरादपि रमादिमुक्तसमूहादप्युत्तमश्च प्राकृ
तदेहवर्ति संसारे वर्तमानानां जीवानां मत्साम्यमनापि नास्तीति न
तोक्षरविलक्षणोहं मुक्तानामनु मत्साम्यं नास्ति परं तत्त्रियाम
कत्वात्तेषामसंभावितस्य विशेषादेः कांतत्वाद्वेतेभ्य उत्तमश्च
तिभावः अतो लोके प्रकृतिपुरुषयोरन्याक्षराक्षरस्वरूपवि
लीपुरुषस्यापि भावेनोलीयते परमात्मनि परमात्मा च सर्वेषा
माधारः पुरुषोत्तमः स विष्णुनामा वेदेषु वेदांतेषु वर्णीयते

इत्यादिऋषिवाक्येषूत्तमः पुरुषइत्यादिवेदेच प्रथितः प्रसिद्धो
ऽहंवासुदेवः पुरुषोत्तमः १८

उत्तमवैजयन्ती टीका १

एवं स्वस्य क्षराक्षरोत्तमत्वेन स्वरूपमुक्त्वेदानीं पुरुषोत्तमनाम
निर्वचनत्वमाह यस्मादिति यस्मादहं नोरुकैः स्वभावैः क्ष
रं वह्निं पुरुषमतीतोऽतिक्रान्तोऽहं वर्ते यस्माच्चाक्षरान्मुक्त
पुरुषादपि शाश्वत्प्रकृतिकालमोक्षः चेतनमात्रादप्युक्तैः
परमात्मत्वादिभिः स्वस्वभावैर्हेतुभिरुत्तम उत्कृष्टतमो भ
वामि अतो हेतोर्लोके लोकत्रये वेदार्थेनेनेति निरुक्ते लोक
शब्देन स्मृतिरुच्यते तेनास्मिन्स्मृत्याख्ये तैर्विज्ञापित कार्यस्त्व
भगवान्पुरुषोत्तमः अवतीर्णो महायोगी सत्यवत्यां पराश
रात् अंशावतारं पुरुषोत्तमस्मृतानीहि मध्यान्तमजस्य विलो
रित्यादौ च पुनः वेदेषु सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं
ज्योतिरूपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष
इत्यादौ प्रथितो विख्यातो यत्परं ज्योतिः सम्प्रसादेनोपसंपन्नं
स पुरुषोत्तमः परमात्माहमेवास्मि भवामीत्यर्थः १८

मधुसूदनी टीका १९

+ यस्मात्क्षरं कार्यत्वेन विनाशिनं मायामयं संसारवृक्षमश्वत्था
ख्यमतीतोऽतिक्रान्तोऽहं परमेश्वरः अक्षरादपि मायाख्यादव्या
कृतादक्षरात्परतः परइति पञ्चम्यन्तादक्षरपदेन कार्यप्रतिपा
दितात् संसारवृक्षबीजभूतात् सर्वकारणादपि चोत्तम उत्कृ
ष्टतमः अतः क्षराक्षराभ्यां पुरुषोपाधिभ्यामभ्यासेन पुरुषप
दव्यपदेश्याभ्यामुत्तमत्वादस्मि भवामि लोके च वेदे च प्रथितः
प्रख्यातः पुरुषोत्तम इति स उत्तमः पुरुष इति वेदे उ
दाहृतत्वेनैव लोके च कविकाव्यादौ हरिर्यथैकः पुरुषोत्तमः स्मृ
त इत्यादिप्रसिद्धं कालप्रणेतो नरवदाचरन्तः परार्थान्यार्थाय
बोधितवतो निजमीश्वरत्वं सच्चिन्मयविकल्पबुधः पुरुषोत्त
मस्य नारायणस्य महिमानं हिमानमेति केचित्रिरवयकारणा

+ इदानीं यथाव्याख्यानेश्वरस्य क्ष
राक्षरविलक्षणस्य पुरुषोत्तम
इत्येतन्नामसिद्धं नाम निर्वचनेन
ईदृशः परमेश्वरोऽहमेवेत्यात्मा
नं दर्शयति भगवान् ब्रह्मणो
हि प्रतिष्ठाहं तद्ब्रह्म परमं
ममेत्यादिश्लोकानि जन्म
हिना निर्धारय ॥

निर्विलस्यभोगमात्स्याययोगममलात्मधियोयतंते नारायणस्यमहिमानमनंतपारमास्वादयन्नमृतसारमहंनमस्तः
[illegible] १८

सदानंदी टीका १८

यथोक्तस्येश्वरस्यैवपुरुषोत्तमइत्यदः प्रसिद्धंनामतस्यास्यनाम्नोनिर्वचनेनच १ ईदृशोवासुदेवोस्मिविग्रहः परमेश्वरः अहमेवेतिभगवानात्मानंदर्शयन्नपजः २ ब्रह्मणोहिप्रतिष्ठाहंनहामपरमंमम इत्यादिपूर्वनिर्णीतस्वमहिम्नः प्रसिद्धये ३ इदं[illegible]यामयंयस्मात्कार्यत्वेनविनाशिनंसंसारवृक्षमश्वत्थमतिक्रांतोस्म्यहंहरिः ४ अक्षरादपिमायाख्याद्व्याकृतपदाभिधात् संसारवृक्षबीजाच्चसदोत्कृष्टतमोस्म्यहं ५ क्षराक्षराभ्यांपुरुषोपाधिभ्यामुत्तमस्त्वतः वेदेसर्वत्रविख्यातः सउत्तमइतिश्रुतेः ६ पुरुषोत्तमइत्येवं भवामिपरमेश्वरः लोकेचकविकाव्यादौपुराणेभारतेनतथा ७ प्रख्यातोवर्णितोहंश्रीपुरुषोत्तमइत्यपि मद्भक्तामांभजंतीत्यकवयः काव्यवर्णने ८ योगिनोध्याननिष्ठायोयजंतेपुरुषोत्तमं १८

नीलकंठी टीका १८

यस्मादिति क्षरंउपाधिंअक्षरंचउपाधिंअतीतोतिक्रम्यास्थितोहमतोऽक्षरादपिचेतिचशब्दात्क्षरादपिउत्तमः उत्कृष्टतमः जडान्तरकूपाद्दुपाधेरुत्कृष्टस्तद्दुपहितोजीवस्तेनतस्यततोप्युत्कृष्टतरोमायोपाधिःस्वतंत्रत्वात ततोप्युत्कृष्टतमोनुपाधिरनागंतुकरूपत्वात अन्यतरार्थःस्पष्टः १८

आनंदी टीका १८

^ एतन्निर्वचनेनोपसंहरति ॥

^क्षरंविनाशिनंदेहाख्यंसंसारवृक्षंचमायागुणमतीतः अक्षरात्देहस्थात्संसरणशीलाज्जीवादपिचोत्तमः स्वयमसंसरणशीलः देहवृक्षस्यनत्कर्मफलदः लोकेवेदेचप्रथितः प्रसिद्धः पुरुषोत्तमः १८ ॥

रामकंटीटीका १४

यस्मादित्यादि यतोहेतोर्यथाप्रतिपादितस्वरूपंक्षरंस्थूलंपुरु षमतिक्रान्तोक्षरस्य च यथाप्रतिपादितस्वरूपस्य सूक्ष्मस्या सत्वभेदप्रत्ययाभावादुत्तमः प्रकृष्टतमोन्वर्थयासंज्ञयालो कशास्त्रयोः पुरुषोत्तम इत्यहं प्रतीतः १८ ॥

लासिकी [illegible]टीका १५

अथात्मनः पुरुषोत्तम नामनिर्वक्ति ॥

यतः क्षरं जीववर्गमतीतोतिक्रान्तोहं तस्माज्जडरूपदेहनिष्ठाहंभा वत्वात् अक्षरात्कूटस्थादपि उत्तमः प्रकृष्टोहम् तस्योदासीन्य स्वभावत्वात् स्वात्मनश्चस्वातंत्र्यनित्ययोगितया अतो लोके क विकाव्यादौ वेदे च पुरुषोत्तम इति प्रख्यातोस्मि तथाच काव्ये हरिर्यथैकः पुरुषोत्तमः स्मृत इति १८ ॥

पंचोले टीका

स्वकीयपुरुषोत्तमनामनिर्वचनेन स्वात्मनि निरतिशयं ऐश्वर्यं दर्शयति भगवान् यस्मादिति यस्मादहं क्षरं संसारमायाहृतमश्व त्थमतीतः च पुनः अक्षरात् संसारबीजभूतादव्याकृतादपि उ त्तमः उत्कृष्टतमः अहं तमो वा अतः तस्मात् क्षराक्षराभ्यामुत्तमत्वाल्लोके वे दे च पुरुषोत्तम इति विख्यातः १८ ॥

रसावीरसमिद्धोयिनी ॥

यस्मादिति यस्मात्क्षरं सर्वाणि भूतानि अतिक्रान्तोहं परमे श्वरोक्षरादपि मायाख्यादव्याकृतादक्षरात्परतः पर इति सकलकारणादपि चोत्तम उत्कृष्टतमोतोहं लोके वेदे च पुरु षोत्तम इति ख्यातः अत्र लोके इति लोके काव्यादौ यथा हरिर्य थैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यंबक एव नापर इति वेदे चो

नमः शुकवदस्तुरागहन्तदति १८ ॥

मधुमाक्ष

भाषाअनुवादटीका

पञ्चभूत पुरुषोत्तमत्व अपना नाम कहने से देखावते हैं कि जि
स हेतु हम क्षर जो जड़ समूह तिन को अतिक्रमण करत और
नियन्तारूप चेतन जो अक्षर उस से भी उत्तम हैं इस से सकल
लोक और वेद में हम पुरुषोत्तम नाम से प्रसिद्ध हैं सोई स्मृति क
हती हैं कि सोई जो पुरुषोत्तम वे आत्मा औ त्रैलोक के वश करने
वाले और तीन लोक के ईश्वर सबके शासनकर्ता हैं यह भगवा
न्नने कहा १८

दोहा

जो मोहिं ऐसें जानहिं चतुर पुरुषोत्तम कोय सो सभ
वेत्ता भजत मोहिं सर्वभावनर सोय १८॥

यो मामेवमसंमूढो जानाति पुरुषोत्तमं स
सर्वविद्भजति मां सर्वभावेन भारत १९

शांकरभाष्य टीका १

अथेदानीं यथानिरुक्तमात्मानं यो वेद तस्येदं फलमुच्यते यो मा
मिति यो मामीश्वरं यथोक्तविशेषणमेवं यथोक्तेन प्रकारेणा
संमूढः संमोहवर्जितः सन् जानात्ययमहमस्मीति पुरुषोत्त
मं स सर्ववित् सर्वात्मना सर्वं वेत्तीति सर्वज्ञः सर्वभूतस्थं भज
ति मां सर्वभावेन सर्वात्मचित्तया हे भारत १९

आनन्दगिरिकृत टीका २

आत्मनोऽप्रपञ्चत्वं ज्ञानफलोक्त्या स्तौति अथेति यथोक्तविशे
षणं सर्वात्मत्वादिविशेषणोपेतमिति यावत् इदानीन
त्वं यथोक्तप्रकारः संमोहवर्जितः [illegible] संमोहेन देहादि
ष्वात्मात्मीयत्वबुद्ध्या रहितस्तथैवं भगवन्तं जानतः सर्ववित्त्वं
तस्यैव सर्वात्मनामेयत्वादित्याह स सर्वविदिति सर्वात्मनि
मय्येवासक्तचित्तेनेत्यर्थः १९

स्वामिकृत टीका ३

एवंभूतेश्वरज्ञानफलमाह यो मामिति एवमुक्तप्रकारेणा
संमूढो निश्चितमतिः सन् यो मां पुरुषोत्तमं जानाति स सर्वभावे
न सर्वप्रकारेण मामेव भजति ततः सर्ववित्सर्वज्ञो भवति १९

पिशाचभाष्य टीका ४

अथेदानीं यः पुरुषोत्तमं मामानन्दरूपं वेद तस्य फलमुच्यते यो मां
परमेश्वरमेवमसंमूढः निश्चितबुद्धिः वेत्ति पुरुषोत्तमं नकर्म
स्वरूपबलवीर्यतेजोभिरित्यर्थः १९

रामानुजभाष्य टीका ५

यो मामिति एवमुक्तेन प्रकारेण पुरुषोत्तमं मामसंमूढो जानाति
क्षराक्षरपुरुषाभ्यामप्ययं स्वभावतया व्याप्तनभरणस्वाम्यादिभि
रेण विसजातीयं जानाति स सर्ववित् मत्प्राप्त्युपायतया यदेदितव्यं त पा. प.

श्री·
गी·टी·
पं·

95

त्सर्ववेदभजतिमांसर्वभावेनयेनमम्यान्युपायनयामतभजनप्र
कारानिहंघात्तेषुसर्वैर्भजनप्रकारैर्मांभजतेसर्वैर्मद्विषयैर्वेद
नैर्ममयाप्रीतिर्यांचममसर्वैर्भजनेमद्विषयैरुभयविधासाप्री
तिरनेनवेदनेनजंयतश्चे [illegible]

अभिनवगुप्तकृतटीका ९

लोकेद्वाविमौपुरुषावितिग्रंथेनेदमुच्यते लोकेतावदप्रबुद्ध
स्वभावोपिसर्वः पृथिव्यादिभूतारब्धशरीरमात्मानंचेतनंतद
दूपंजानातीतिलोकस्यमूढत्वाद्धैनधीनेनिवर्तने अर्हन्नस
कलानुग्राहीद्वैतग्रंथिंविभिद्यसकललोकव्यापकतयावेद्य
इतितत्परमतीतोभूतानांजडत्वात् अक्षरमतीतआत्मनोप्रबु
द्धत्वेसर्वव्यापकत्वखंडनात् पुरुषोत्तमेलोकेवेदेपिसद्ब्रह्मः
पुरुषइत्यादिभिर्वाक्यैः सएवपरमात्माह्ययमेवमुच्यते एवं
ज्ञात्वतः सर्वमयंमामेवब्रह्मतत्त्वमुपासीनः सर्वमन्मयत्वेन
विदन्सर्वेणाभावेनमूर्तिक्रियाज्ञानात्मकेनमामेवभजते य
त्यइत्यतितद्भगवन्मूर्तिनयेत्यादि तथाचमयैवशिवशान्ताभि
नाभावस्तोत्रेनवचकावननक्षतिरंविकेसकलशद्भमयीकि
लतेननुः निखिलमूर्तिषुमेभवदन्वयामनसिजास्वहिरस
रास्तव इति विचिंत्यशिवेशामिताशिवेजगतिजातमयत्नवः
शादिदम् स्तुतिजपार्चनचिंतनवर्जितानखलुकावनका
लकलापिमेइति १९

परमार्थप्रपाटीका २

तज्ञानस्यफलमाह यइति एवंनिरुक्तप्रकारेणासंमूढोनिश्चि
तमतिः सन्योमांपुरुषोत्तमंजानातिससर्वभावेनसर्वप्रकारे
णमामेवभजतिततः सर्ववित्सर्वज्ञोभवति १९

वनमालीटीका ८

पुरुषोत्तमत्वज्ञानमेवमुख्यंभजनमित्याह यइतियोसंमूढोयं
कश्चिन्मनुष्योनमः कश्चिदेवप्रेक्षावानितिसंमोहवर्जितोमांपुरु
षोत्तमंवक्ष्यमाणनियंतारंविश्वोदयादिकर्तारंवासदैवंजानातिस

कृतात्मय पुण्यपुंजः प्राप्तमच्छरणप्रसादः सर्ववित्सर्वशास्त्रार्थ
ज्ञः एतावानेव सर्वशास्त्रार्थः सर्वभावेन सर्वप्रकारेण मां भजति
पुरुषोत्तम एव सर्वशास्त्रार्थस्तज्ज्ञानात्सर्वज्ञः पुरुषोत्तमत्वज्ञा
नमेवोत्तमं भजनमनन्तत्वानीमां सर्वप्रकारेण भजतीति भावः
१९ कृष्णसेवैनयन्त्री टीका १

ननु यदीदृशं पुरुषोत्तमरूपं त्वां जानाति तस्य किं फलं स्यादित्य
पेक्षायामाह यो मामेवेति एवं यदुक्तनिरुक्तिप्रकारेणानवग
त्ताधस्य कमललोचनस्य वृष्णिकपि स्यादिवसंतामात्रत्वे
यो भक्तोऽसम्मूढस्तन्मोक्षे पुरुषोत्तमत्वे असम्मूढः संशयरहि
तः मत्स्वामिममर्थरूपं पुरुषोत्तमं तत्त्वतः पुरुषाधिष्ठानम
जानाति परमात्मानं सर्वलोकभरणात्स्वयं तत्त्वे सर्वत्वादित्व
भावयोगेन ताभ्यां विसज्जानीयं जानातीत्यर्थः हे भारत स एव
लोकत्रयार्थज्ञ एव सर्ववित्पुरुषोत्तमत्वे एव सर्वशास्त्रता
त्पर्यमस्तीति नान्यत्रास्तीति ज्ञानेन यत्किंचिद्रूपायोपायादिकं व
स्तु जानाति वेदितव्यमस्तीति तस्य सर्वस्य वेत्ता भवतीति स एव सर्वभाव
न सर्वेणात्मना सर्वप्रकारेण यद्वा सर्वेण साधनसाध्यसं
बंधादिरूपेण भावेन भाव[illegible]न यो मां पुरुषोत्तमं भजति सेवते
यस्त्वमे पुरुषोत्तमत्वे संदिग्धमतिः सोऽधीतसर्वशास्त्रोऽप्यज्ञः स
र्वथा भजन्नप्यभक्त एवेत्याशयः भारतेत्यनेन यद्येवं मे पुरुषोत्त
मत्वं त्वं ज्ञास्यसि तर्हि भवतवो न मत्कुलोत्पन्नत्वेन च प्रशंसा स्यादि
त्यर्थ इति सूचितम् १९ मधुसूदनी टीका १९

एवं नामनिर्वचनज्ञानफलमाह —
यो मामीश्वरमेवं यथोक्तनामनिर्वचनेनासंमूढः मनुष्य एवा
यं कश्चित्कृष्ण इति संमोहवर्जितः जानाति अयमसावीश्वर एवेति पु
रुषोत्तमं प्रागुक्तव्याख्यानं स मां भजति सेवते सर्ववित्स सर्वात्मानं
वेत्तीति सर्ववित्स एव सर्वज्ञः सर्वभावेन प्रेमलक्षणेन भक्ति
योगेन हे भारत अतो यदुक्तं मां च योऽव्यभिचारेण भक्तियोगेन
सेवते स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पत इति तदुपपन्नं

96

यथोक्तं ब्रह्मणो हि प्रतिष्ठाहमि[illegible]ति तदप्युपपन्नतरं विदा
नंदाकारं जलधिरुविसारं कृतिनिरतं व्रजस्त्रीणां हारं भवजल
धिपारं कृतनाधियां विहतं भूभारं विदधदवतारं मुहुरहो म
हो वारं वारं भजत नशकलारं भकृतिनः [illegible] ।
[illegible] २६

सदानंदी टीका ११

नामनिर्वचनज्ञाने यथोक्तफलमाह यनेनामनिर्वचनेनैव यथो
क्तं मां महेश्वरं १ संमोहवर्जितो यो ह्यजानाति पुरुषोत्तमं य
थैव पूर्वव्याख्याने सर्वोत्तमतयासधीः स एव मां सर्वविद्यास्ततः
सेवने सर्वविन्मः सर्वभावेन मम स्मरणत्वेनानिरंतरं १९

नीलकंठी टीका १२

एतद्विज्ञानफलं मपि भक्तिरेवेत्याह यो मामिति असंमूढः
मम पुरुषोत्तमत्वे संशयविपर्ययासादिहीनः स एव सर्ववित्
यतो मां पुरुषोत्तमं जानाति तत्फलं च मां सर्वभावेन सर्वा
त्मना सर्वैः प्रकारैर्भजति १९

आनंदी टीका १३

यः असंमूढः विशुद्धसत्वः एवमध्यायोक्तार्थानुगमनेन
मां पुरुषोत्तमं जानाति स सर्ववित् सर्वज्ञ इति पुरुषेश्वरतत्वज्ञः
मां परमेश्वरं सर्वभावेन साकारत्वेन निराकारत्वेन च भजति
[illegible] १९ ॥

रामकंठी टीका १४

एवं च यथोक्तप्रकारेण यो योगी माम संमूढः सन्देहादिमोहर
हितः सन् पुरुषोत्तमं तया जानात्यात्मत्वेन प्रत्यक्षमनुभवति स विशे
षितः सेयत् [illegible] सर्वभावेन सर्वात्मकत्वेन वास्तवेन भजति से
वेन स एको [illegible] इत्यर्थः सर्वभावस्थितिस्तान्
सामान्यसंविन्मकाशसागरसामरस्यानुभवलक्षणं विचार्य
मज्जेः एवं रूपमुक्तं यदुक्तं लोकेन चित् चिन्मकाश परामर्शी

शक्तिमन्मात्रावशिष्यते अप्यद्वयवशोन्मेषभव्यानां भक्तिरेवेत इति १९ ॥

पुरुषोत्तमज्ञानस्यफलमाह— लासिकी [illegible]टीका १९

योयोगीअसंमूढः मद्भक्तस्त्वेवमुक्तलक्षणं मामीश्वरं पुरुषोत्तमं मां जानाति स्वात्मतया प्रत्यभिजानाति हे भारत स सर्वज्ञो भूत्वा सर्वभावेन सर्वात्मकतया मामीश्वरं भजते उपास्ते विश्वात्मा भवतीत्यर्थः १९

पंचोलेटीका

इदानीं यथोक्तात्मज्ञानस्य फलमाह योमामिति हे भारत यः असंमूढः संमोहवर्जितः सन् मामीश्वरं पुरुषोत्तमं एवं यथोक्तप्रकारेण अहमस्मीति आत्मभावेन जानाति स सर्ववित् सर्वज्ञः सर्वभावेन सर्वात्मचिंतनया सर्वज्ञात्मभावेन भजते १९

रसावी[illegible]सिद्धांथिनी॥

योमामिति योमामीश्वरमेवं पूर्वोक्तविभूतिशालिनमसंमूढो मनुष्यएवायमिति संमोहरहितः पुरुषोत्तमं प्राख्यातं जानाति निश्चिनोति स सर्वात्मकस्य मम वेदनात् सर्ववित् सर्वभावेन मां भजति सेवते इत्यर्थः १९॥

मधुभाष्य

१९॥

97

भाषाअनुवादटीका

ऐसे ईश्वर का जानने हुआ ज्ञानी पुरुष के ज्ञान का फल कहते
हैं कि हे भारत अर्जुन इस तरह पूर्वोक्त निश्चित प्रकारसे असम्
ढ कहे निश्चितमति हो के जो पुरुषोत्तम स्वरूप हम को जानि
शकै है सोई मनुष्य सम्यक प्रकार से हम को भजै है तिस के अन
न्तर सर्वज्ञ होता है यह जानो १९

दोहा

जो मोहि ऐसें जानहिं बुध पुरुषोत्तम कोहि सो समभवे
ता भारत सर्वभाव भज मोहि १९ ॥

98

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ । एतद्बु
द्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत २० इ
ति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषो
त्तमयोगो नाम पंचदशोऽध्यायः १५

शंकरभाष्य टीका १

अस्मिन्नध्याये भगवत्तत्त्वज्ञानं मोक्षफलमुक्त्वाऽथेदानीं तत्स्तौ
ति इति गुह्यतममिति । इत्येतद्गुह्यतमं गोप्यतमं अत्यन्तं रहस्य
मित्येतत् किन्तच्छास्त्रं यद्यपि गीताख्यं समस्तं शास्त्रमुच्यते त
थाप्ययमेवाध्यायः इह शास्त्रमित्युच्यते स्तुत्यर्थं प्रकरणात्
सर्वो हि गीताशास्त्रार्थोऽस्मिन्नध्याये समासेनोक्तः न केवलं
सर्वश्च वेदार्थ इह परिसमाप्तो यस्तं वेद स वेदवित् वेदैश्च
सर्वैरहमेव वेद्य इति चोक्तमिदमुक्तं कथितं मया हे अनघ
एतच्छास्त्रं यथादर्शितार्थं बुद्ध्वा बुद्धिमान् स्याद्भवेत् नान्यथा
एतच्छास्त्रं यथादर्शितार्थं बुद्ध्वा कर्तव्यं येन स कृतकृत्यः वि
कृतकृत्यश्च भारत कृतं कृत्यं कर्तव्यं येन स कृतकृत्यः विशि
शिष्टजन्मप्रसूतेन ब्राह्मणेन यत्कर्तव्यं तत्सर्वं भगवत्तत्वे
विदिते कृतं भवेदित्यर्थः न चान्यथा कर्तव्यं परिसमाप्यते क
स्यचिदित्यभिप्रायः सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्य
ते इति चोक्तं एतद्धि जन्मसामग्र्यं ब्राह्मणस्य विशेषतः प्राप्यैतत्
कृतकृत्यो हि द्विजो भवति नान्यथा इति च मानवं वचनं यत
एतत्परमार्थतत्वमत्तः श्रुतवानसि अतः कृतार्थस्त्वं भारते
ति २० इति शाङ्करभाष्ये पञ्चदशोऽध्यायः १५

आनंदगिरिकृत टीका

अस्मिन्निति स
अध्यायार्थमनूद्योपसंहारश्लोकमवतारयति अस्मिन्निति त्रयो
र्ध्यांगीतायां शास्त्रशब्दे वक्तव्ये कथमस्मिन्नध्याये तत्प्रयो
गः स्यादित्याशंक्याह यद्यपीति सन्निहितमध्यायं स्तौतमपि

श्री॰
गी॰टी॰
पं॰

99

कृतस्तत्र शास्त्रशब्दस्तदर्थाभावात्तत्राह सर्वो हीति गीताशास्त्रार्थ
स्य सर्वस्यात्र संक्षिप्तत्वादेव केवलं शास्त्रशब्देन भवति किन्तु
वेदार्थस्यापि सर्वस्यात्र समाप्तेश्चैकं शास्त्रपदमित्याह नेति तत्र
गमकमाह यस्मादिति भगवत्तत्त्वज्ञानेकृतकृत्यतेत्येतदुपपा
दयति विशिष्टेति नान्यथेत्युक्तं प्रपञ्चयति नचेति सत्यपि तत्त्व
ज्ञाने कर्मणां कर्तृत्वान्न कर्तव्यसमाप्तिरित्याशंक्याह सर्वमि
ति तत्त्वज्ञाने कृतार्थ्यमिति तत्र मनोरपि सम्मतिमाह एतद्धीति
भारतेति सम्बोधनतात्पर्यमाह यत इति तदनेनात्मनो देहा
द्यतिरिक्तत्वं विद्रूपत्वं सर्वात्मत्वं कार्यकारणविनिर्मुक्तत्वं नाश
पत्वं तस्यावेदैकरसब्रह्मतत्त्वज्ञानादशेषपुरुषार्थपरिस
माप्तिरित्युक्तं २० इति श्रीआनन्दगिरिटीकापञ्चदशोऽध्यायः १५

[illegible]मिकृत टीका २

अध्यायार्थमुपसंहरति इत्यनेन संक्षेपप्रकारेण गुह्यतमं अति
रहस्यं संपूर्णं शास्त्रमेवमयोक्तं न तु विंशतिश्लोकमध्यायमा
त्रं हे अनघ व्यसनशून्य अत एतदुक्तं शास्त्रं बुद्ध्वा बुद्धिमान् सम्यग्ज्ञा
(न्ता) नी स्यात् कृतकृत्यश्च स्याद्योऽपि कोऽपि हे भारत त्वं कृतकृत्योऽसीति किं
वक्तव्यमिति भावः २० संसारशाखिनं छित्वा स्पष्टं पञ्चदशे विभुः
पुरुषोत्तमयोगाख्यं परं पदमुपादिशत् १ इति श्रीभगवद्गीता
सुबोधिन्यां टीकायां पञ्चदशोऽध्यायः १५

[illegible]भाष्य टीका ३

इत्थं गुह्यतमं शास्त्रं शासनात् ज्ञापनाद्वा उक्तमभिहितं एतद्बुद्ध्वा स्व
बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च कृतकृत्यः २० (कृतमनेनेति)
इति पैशाचभाष्ये पञ्चदशोऽध्यायः १५

[illegible]नुजभाष्य टीका ४

(तत्पुरुषोत्तमत्ववेदनं प्रजयति—)
इतीति इत्थं मम पुरुषोत्तमत्वप्रतिपादनेन सर्वेषां गुह्यानां गुह्यतम
मिदं शास्त्रं त्वमनघो यतो योग्यतम इति कृत्वा मया तवोक्तमेतद्बु
द्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च मामुपादेयबुद्धिः सा सर्वोपा
य बुद्धिमान् स्यात् कृतकृत्यश्च यत्कर्तव्यं तत्सर्वं कृतं स्यादित्यर्थः अनेन ज्ञा
यतास्मात् यत्तेन कर्तव्यं तत्सर्वं कृतं स्यादित्यर्थः

केनानेनरोक्तंपुरुषोत्तमः पुरुषोत्तममेवविषयंज्ञानेनशास्त्रेणत्वमेवै
नेन करोतिनतुसाक्षात्काररूपामित्युच्यते अविन्मिश्राहिशुद्धा
स्यैवेननात्पुरुषोत्तमम आपनानमरणानस्वाम्यादन्यः पंचदशो
दितः अथ ० २० इतिश्रीभगवद्रामानुजविरचितेश्रीमद्भग
वद्गीताभाष्येपंचदशोध्यायः १५

अभिनवगुप्तकृतटीका १

गुह्यतमंसर्वोहयप्रतिपादकत्वात् एतदेवबुद्ध्वाबुद्धिमत्वंनतुय
वहारबुद्ध्या एतेन वज्ञाते नैव कृतकृत्यतानन कृतेनापिशास्त्र
विजयार्थाहारणस्युपभोगादिना वकारोऽन्तयोतकः कृतेन
हि कृतकृत्यताहृष्टाएतेनतज्ज्ञातेनैवेतिचित्रं इतिशास्त्रेणशास्त्र
स्यसमाप्तिः सूचिताव कृत्यस्यपरिपूर्णतयासमाप्तत्वात् तथा
हि षोडशाध्यायेनशीघ्रस्यांशेनस्यकेवलंपोषणताप्रतिपाद्यतेन
तूपदेशएतेकिंचित् दैवीत्येवं विद्यामपरामासुरीं चाविद्यामध्येता
हर्षीसम्पत् त्वेवविद्यामयीदैवीसम्पदमभिजातस्येत्येतावतिहि
नात्यर्थम यद्व्रजति मा शुचः संपदं दैवीमिति अतएवपूर्वे विद्या
विद्यासंबन्धनिरूपणावसरे देवासुरसंग्रामछलेन विद्याविद्ययोः
संबंधं इतिसूचितं एवं च शिष्यस्वरूपेप्राधान्येनतनिरूपमाणे अ
संगतोऽस्य दष्टकमित्यध्यायहृयेम विषयेति उपदेशाङ्गत्वेन एवप
रिसमाप्तः सर्वभावेनहिपरमेश्वरभजनमावेशरूपंप्राप्यतदर्थ
वासत्सर्वमित्यंत्रेत्यक सर्वमाहेश्वरस्वरूपावेशएवहिपरमं
शिवम १ संग्रहोत्र इत्यद्वैतमहामोहकृत्वाभ्रमपीत्विति
म्न लौकिकेव्यवहारेपिमुनिर्निःसमाविशेत् इतिश्रीभग
वद्गीतार्थसंग्रहेपंचदशोध्यायः १५

परमार्थप्रपा टीका १

अध्यायार्थमुपसंहरति इतीति इत्यनेनसंक्षेपप्रकारेण गुह्य
तमम अतिरहस्यंसश्रणं शास्त्रमेवमयोक्तं न पुनरध्यायमात्रं मो
क्षनिविशेषहेतोः करणपनर्द्ध्यासम्यक्ज्ञात्वा यः कोपिबुद्धिमा
न तत्वज्ञानवान्कृतकृत्यश्च स्यान्किंपुनर्भवानित्यर्थः अध्या
यनात्पर्य ब्रह्माद्यमलध्वंशीरहितविजयतेः बाकृराङ्गादिशाः

श्री·
गी·टी·
पं·

100

ख्यातेगुणाः पल्लवाः स्पर्शविषयपरित्यागनिर्वासनाः पर्णजाले हत
स्थूलप्रपंचे पुरुषवरस्य पादाश्रितमूले विदिताः संगेन छिंधि शेष
हरिरिति दशमे पंचयुक्ते जगाद २ इति श्रीमद्देवतपंडितसर्व
पंडितविरचितायां भगवद्गीताटीकायां परमार्थप्रपायां पुरुषो
त्तमयोगो नाम पंचदशोध्यायः १५

वनमाली टीका ८

पुरुषोत्तमत्वज्ञानमात्रमेवेतरसाधननिरपेक्षं मुक्तिसाधनं य
स्मै कस्मैचित् देयमनधिकारिणोपि सा नशाया पतस्याप्यम
काभवे उत्तपथाव हहेस्फुच्छेदः स्यादित्याशयवानाह इतीति
इत्युक्तप्रकारेण गुह्यतमं गोप्यतमं संपूर्णं शास्त्रमेवं संक्षेपेण
देपुरुषोत्तमत्वप्रतिपादकं मयोक्तं कृलेनशीलेन महात्मावा
त्वनन्यवहायतत्त्वं मयोपदिष्टं त्वयात्वाहशायैवोपदेष्टव्यं न य
स्मै कस्मैचिदित्याशयेन संबोधयति हे अनघ पनद्धुत्यामापियः
कश्चिद्बुद्धिमान् महिषयः कापरोक्षवानस्यान कृतेन सर्वं कृतं
कर्तव्यं येन न पुनः कृत्यान्तरं यस्यास्ति सकृतकृत्यश्च स्यात् यदि
सिद्दसत्वमप्रभूतेन ब्राह्मणादिनानेकोपायैः कर्तव्यं न इत्यवनः
पुरुषोत्तमत्वज्ञानमात्राद्भवतीति भावः २० निर्णीतायांपंचदशः
१५

मधुसूदनवैजयन्ती टीका ९

नव पुरुषोत्तमस्तानेतवत्र प्याया पांचमु यसंहरति इतिगुह्यतममिति
ति हे अनघ इतीन्यं सप्तैपरूपं पुरुषोत्तमत्वनिरूपकं गुह्यतमं स
र्वे षांगुह्यानामप्यतिशयगुह्यं गोप्यं इदं त्रिश्लोकीरूपं शास्त्रं सर्वेवे
दार्थरूपत्वादाम्नतमरूपवाक्यं तत्त्वं मयापुरुषोत्तमेनोक्तं कथि
तं अनघेत्यनेन यतस्त्वं पापरहितस्त्वं चेनास्याधिकारित्वमस्माको
मयैतदुक्तं त्वया पि वानधिकारिण्यैतन्नप्रकाश्यमिति सूचितं हे
भारत एतद्बुद्ध्वा ज्ञात्वा बुद्धिमान् स्यात् पापरहितयोग्यया बु
द्धिविशेषेण युक्तः बुद्धिमान् परोक्षज्ञानी स्यात् चपुनः कृतकृत्यः
कृतं कृत्यं कर्तव्यं येन सतथा शास्त्रजन्यपुरुषोत्तमविषयज्ञा
नवान् स्यान्नतु साक्षात्कारज्ञानवान् त्रिसर्पः भारतेत्यनेन शुद्धवं
शजन्यत्वान्वेदशास्त्राणामधिकारोस्तीति द्योतितम् २० उत्तमंच

ड्रमकाभ्यांजीवाभ्यांस्तुजगाद्यः संविदेपंचदशोवन्देतंकृतंपार्थ
सारथिम् १९ इतिश्रीनित्यानंदवंशावतंससकलदासस्यांत्रे
वासिनागोविंदचारिदासेनविरचितायांभगवद्गीतार्थकुसु
मवैजयंत्यांपंचदशोऽध्यायः १५

+इदानीमध्यायार्थंस्तवत्रुपसंहरति॥ मधुसूदनी टीका १

+इत्यनेनप्रकारेणगुह्यतमंरहस्यतमंसंक्षेपेणशास्त्रमेवसंक्षेपे
णेदमस्मिन्नध्यायेमयोक्तं हेअनघअव्यसन एतत्बुद्ध्वाय्योपि
यः कश्चिद्बुद्धिमानात्मज्ञानवान्स्यात् कृतेसर्वंकृत्यंयेननजु
नः कृत्यान्तरंयस्यास्ति सकृतकृत्यश्चस्यात् विशिष्टजन्मप्रसू
तेनब्राह्मणेनयत्कर्तव्यंतत्सर्वंभगवतत्त्वेविदितेकृतंभवेत्
नत्वन्यत्कर्तव्यंपरिसमाप्यतेकस्यचिदित्यभिप्रायः हेभा
रत त्वंतुमहाकुलप्रसूतः स्वयंचव्यसनरहितइतिकुलगुणे
नस्वगुणेनचैतद्बुद्ध्वाकृतकृत्योभविष्यसीतिकिमुवक्तव्यमि
त्यभिप्रायः १ वंशीविभूषितकरान्नवनीरदाभात्पीतांवरादरु
णविंबफलाधरोष्ठात् पूर्णेंदुसुंदरमुखादरविंदनेत्रात्कृष्णात्प
रंकिमपितत्त्वमहंनजाने प्रमाणतोपिनिर्णीतंकृष्णमाहात्म्य
मद्भुतंनशक्नुवंतियेसोढुंतेमूढानिरयंगताः इतिश्रीमत्पर
महंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीश्रीपादशिष्य
श्रीमधुसूदनसरस्वतीविरचितायांश्रीभगवद्गीतागूढार्थ
दीपिकायांपुरुषोत्तमयोगोनामपंचदशोऽध्यायः १५

सदानंदी टीका १

अध्यायार्थंस्तवत्रेवमुपसंहरतीश्वरः अनेनैवप्रकारेणरहस्य
तमगुह्यतमं १ संक्षेपेणशास्त्रमेवेदमध्यायेस्मिन्समासतः मयासर्वं
स्वरेणोक्तंहेनिर्दोषार्जुनप्रिय २ कथंशास्त्रत्वमेतस्मिन्नध्यायइति
चेच्छृणु हितशासनमेवोक्तंशास्त्रत्वंतत्त्वदर्शिभिः ३ मद्भक्तिस्त्व
खिलंप्रोक्तमध्यायेहरिणास्वयं तत्कथंपूर्णशास्त्रत्वमुपमंपस
र्वमत्रभोः ४ शास्त्रंहिद्विविधंप्रोक्तंहिशमनतत्परं प्रवर्तकंचनि
वर्तकंचतत्रांतिममिहोच्यते ५ जीवोपास्त्यनपेक्षत्वेनतदुक्तानाय
योगिनः पदार्पणपरकथनेनशिवात्मीयेनेनिष्कामपर्म

श्री·
गी·टी·
पं·

10

संसिद्धबुद्धिशुद्धिप्रदः सुधीः अधिकारी निहतेस्मिन् शास्त्रे तत्त्वाव
बोधके ७ वैराग्यं तत्र मुख्यं स्यान्नश्वरे देहविग्रोरिते संसारह
त्वविच्छेदसाधनं सुविवेकतः ८ अधिष्ठानात्मतत्त्वस्य नित्य
त्वमवधेः स्फुटं तदाध्यस्तस्य विश्वस्य बाध्यत्वात्स्यादनित्य
ता ९ अनित्यदोषवाञ्छल्यवीक्षणाद्धेहतः सुखे नित्ये ब्रह्मसु
खे मोक्षे रतिर्निर्दोषवस्तुनि १० यावदात्मापरिज्ञातो नेनावक
र्मादिहेतुका संसृतिस्तु यानिश्यस्त्वशापि स्यादनवप्रदा ११ अ
नादिमध्यान्तनिधनात्स्वमस्तुष्टिरिवश्रमात् वैराग्यात्सविवे
कात्स्याद्व्याउच्छेदनेक्षमः १२ विरक्तः सर्वकर्माणि संन्यस्य
वरहादिके अनन्यशरणो भूत्वा प्रपद्येन हरिं गुरुं १३ यतः
प्रवृत्तिरेतस्याः संसृतेरहयाद्धरेः तमेव शरणं गच्छेत्तदुच्छेदा
यसन्मतिः १४ तत्प्रसादाद्धृदेतस्य तत्त्वज्ञानेससाधनं येनया
तिपरं धामयतो नावर्त्तते पुनः १५ श्लोकैः पंचभिरित्येके
समाम्नायाच्छास्त्रमेव के न विशेषात्मत्रविस्तरे शिष्यामासविस्त
रात् १६ तत्रात्मतत्त्वमेकेन पद्यामेति शासितं स्वप्रकाशम
नाभासं पूर्णमानंदचिद्घनं १७ उक्त्वास्माज्ञानतो नादिजीवभा
वो विभोः स्मृतः अभिज्ञो पीश्वरात्जीवउपाधिर्भेदवानिव १८
यावदज्ञानमेतस्य लिंगमायद्यासतो विभोः संसारचक्रे भ्र
मणं सदाजन्मादिलक्षणं स्थूलभोगालयश्चायं लिंगदेहे
कसाधनः भोक्तेभोगानमविलक्षणः २० सर्वत्र साक्षिरूपे
ण व्याप्तो ग्नायपि ज्ञात्रादित्रिपुटीनेनेपश्यंत्यज्ञानमोहि
ताः २१ येत्वहत्पदांभोजध्याननिर्मलबुद्धयः ते पश्यंति हृ
यहृत्स्वदेहादिभ्यस्त्वसाक्षिणं २२ अहो मोहस्य माहात्म्यं य
त्वत्स्वरूपमतिस्फुटं पश्यंतोपि न पश्यंति यतमाना अबुद्ध
यः २३ अहोहरिपदांभोजभक्तेर्माहात्म्यमद्भुतं अनिच्छ
तापि पश्यंति यत्त्वं रूपमहन्नमाः २४ इत्येवं पंचभिः श्लो
कैः संक्षेपतः परमात्मनः अभिधायततः श्लोकैस्त्रिभि
स्तत्त्वमर्थके २५ विशदतिकथनव्याजादर्शयामास विध्न
ये सर्वत्रात्मदर्शनोपाधिदैवादिगोचरं २६ सर्वाधा

विष्टः सन्नभोक्ता ५

रो निराधारः सर्वपोषकरईश्वरः प्राणादिप्रेरकत्वेन जीवने हेतुरेव च
२८ सर्वकर्ता न ध्याप्ता हर्ता सर्वत्रगो हरिः सर्वानुस्यूतरूपश्च स
र्वाधिष्ठानमेव च २९ इत्थं वेदादिशास्त्रैश्च प्रतिपाद्यः समागमे वेदा
न्तेषु स एवास्ति वेद्यो ज्ञानः पुमर्थकः ३० वेदान्तानां च सत्फलं ज्ञ
स्मिन्ज्ञाते परे पदे सर्ववेदशिरःकर्मशास्त्रयोनितया हरिः ३१ वेद
वेद्यः स एवास्ति देशिकादिस्वरूपधृक् ज्ञाने ज्ञेयं तत्प्राप्तं ज्ञातास्य
वनन्ततः पृथक् ३२ अभिधाय हरिः सम्यक् त्वंपदार्थं पुनस्तयोः
उपाधीन्दर्शयामास वाच्यो न त्वंपदार्थयोः ३३ कार्योपाधिः इतरः
प्रोक्तो जीवसंहतिकारणं अपरः कारणोपाधिर्माया विशेषक का
रणं ३४ कार्यकारणरूपौ द्वावुपाधी वदता ततो उक्ता वेदार्थं
मात्मानं पुरुषोत्तमसंज्ञितं ३५ दर्शयामास वेदान्तसिद्धान्ते हेतु
पूर्वकं सर्वाधिष्ठानभावेन स्थितो व्याप्नुत एव यः ३६ मायातीतः
स्वयंज्योतिः कृष्णमः सोऽन्तरान्तरात् पृथक्केन यतो व्याप्तेन पृथ
क्केन किंचन ३७ देहादयो ह्यनात्मान आत्माभासत्यादिलाः भा
समानास्ततो भिन्नः परमात्माद्वयो हरिः ३८ जीवत्वमीश्वरत्वं च
तत्र मायाविजृंभणं स्वतः शुद्धोद्वयानन्दः पुरुषोत्तम ईरितः ३९
कार्यकारणभावात्सोऽन्यतोऽभिन्नो निरंजनः ज्ञातीयविजातीयभि
दाशून्योऽस्ति निष्कलः ४० अखंडार्थः स एवास्ति तत्त्वमस्यादिसद्गि
राम पुरुषोत्तमशब्देन प्रतिपाद्यः परः पुमान् ४१ यः साक्षी पुरुषः
प्रोक्तः स एवोत्तम ईरितः तज्ज्ञानात्सर्वविज्ञानसिद्धिरत्र निराकुला ४२
वेदे सर्वत्र वेद्यत्वात्स एव प्रार्थितः पुमान् लोके काव्यपुराणादौ प्रति
पाद्यः स एव हि ४३ यस्तेऽसंमोहसंपन्नः स त्वेद समद्गुरोत्तमः स एव
सर्ववित्सर्वानुस्यूतात्मावबोधतः ४४ स एव भगवद्भक्तः सदान
न्यधिया हरिं भजते सर्वकृत्सर्वभूतानामुत्तमः पुमान् ४५ नातो
गुह्यतमं शास्त्रं परमात्मसमं ततः सतां हितशासनमेवं दशास्त्रत्वेनात्र
कीर्तितं ४६ अतो भगवता सम्यगवाच्यं तद्धितैषिणा इति गुह्यतमं
शास्त्रमित्यादि विजयं प्रति ४७ एतच्छास्त्रं यथोक्तं यः कश्चिद्बुद्धि
तिपुण्यवान् आत्मज्ञानात्विनो भूत्वा कृतकृत्यो भवेन्नरः ४८ कृ

स९

तंहृत्स्थंचयेनाशोयस्यहृत्संतरमनाक् नावशिष्टंकृतनैतद्यत्प्रति
पादितमुत्तमं ४९ श्रेष्ठंजन्मप्रसूतेनकर्तव्यंब्राह्मणोनवै नत्स्वैवभ
गवतत्वेविदितेसहृत्तंभवेत ५० नत्वमप्येहकस्यापिहृत्स्थंपरि
समाप्यतेत्वंतृत्कुष्टकुलेनातः स्वयंव्यसनवर्जितः ५१ स्वगुणे
नकुलोत्कृष्टात्वैनब्राह्मणपार्थतः बुद्धेवंकृतनकृतात्मभावि
ष्यसिनसंशयः ५२ संगरस्यैवागमार्थंविजयपरध्यगतः शास्त्रयो
नीरमेशंगीताख्येशास्त्रसारेविततनपदपरेविस्तृतेनतत्वमुक्ता
नत्राप्यस्थेनसारंप्रकृतिविकृतिनोस्थंतभितंरहस्यंस्वीयंप्रोवा
चयोनंतमहंमतिमुदासंश्रयेकृष्णमीडे ५३ कृतेकृत्येतेनकृ
तिशिवरसिद्धांतममलंविविच्याहोवुद्धसिद्धवनगुरुयेनमधु
हा सर्वज्ञोमुक्तोभजतिमनतंप्रेमकलयापमुंवंदेयोसौभव
तिविबुधानाममपिजनः ५४ ममत्वंवेदेषुनच्यैवभारतेनच्याय
काद्येस्मृतिषुनमोनमः पुराणाद्येलेपिहिवास्तवंपदंसमुत्कट
पवालिसनामतिरिक्तयं ५५ येतःपरिस्फुरविकल्पजालरम
स्वभोः हृत्पदारविंदेनातःपरंनत्वमिहास्तिकिंचिसदिविनि
र्णीतमिदंमतंसत ५६ २ इतिभावप्रकाशेसदानंदविद्वानंदा
कृतेसंसाराख्यानछेदेसंनिपंचदशोगतः १५

नीलकंठी टीका १२

अस्मिन्नध्यायेभगवतत्वज्ञानस्यमोक्षफलत्वमुक्त्वाऽथेदानींतन्नो
ति इतीति इतिपतंजलतमेश्रयंतरहस्यशास्त्रं यद्यपिश्यमध्यात्मशा
स्त्रापीकृतत्वं शास्त्रेनच्याख्यास्मिन्नध्यायेकृत्स्नस्यशास्त्रार्थस्यप्रदर्श नादिद..
मापिशास्त्र अत्रहिकार्यकारणविभागः संसारहेतुस्यानिरूपणंभ
गवतोविभूतयः यस्तंवेदसवेदवित्तवेदैश्चसर्वैरहमेववेद्यइत्यादि
नासर्वैःशास्त्रार्थोदर्शितोस्ति इदमपाउक्तंहेश्रुतवनिर्व्यसनपत्
नरहस्यबुध्वाबुद्धिमानस्तानीस्यात्आत्मविदेवेन नावनाकृतकृ
त्यः सर्वंहिकृतंपरमात्मावगतिपर्यंतेनतेवैवकृत्स्नपुरुषार्थसमाप्तेः
वाम्राममापणीयस्यस्यानभवतिनातःपरंकर्तव्यमवशिष्यतेइत्यर्थः २
इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेपंचदशोऽध्यायः १५

+ अध्यायार्थमुपसंहरति फलनिर्देशेनोपसंहरति ॥

आनंदीटीका १२

+ इतीदंशास्त्रमेतदध्यायरूपंशासनंगुह्यतमंप्रकृतिपुरुषपरीक्षाक्रमेणोक्तिरहस्यंमयोक्तम् एतद्बुद्ध्वार्थतोज्ञात्वाबुद्धिमान्स्यात्परमार्थज्ञानेनातएवकृतार्थश्चस्यात् २० इतिश्रीभगवद्गीतास्वानंदीटीकायांपंचदशोऽध्यायः १५ ॥

+ यथोक्तज्ञानफलनिर्देशेनाध्यायमुपसंहरन्नाह ॥

रामकंठीटीका १४

+ इतियथोक्तप्रकारेणगुह्यतमंसर्वरहस्यातिशायिशास्त्रमिदंभवतानघमयानुभूतफलंमयाभिहितंनातःपरंवक्तव्यमित्यर्थः अतएवाह एतद्बुद्ध्वायथावदधिगम्यबुद्धिमान्पुरुषःस्याद्विज्ञातेत्वस्मिन्सत्यामपिबुद्धावबुद्धिमन्तएवप्रमातारः शरीरादिहेयवस्तुनिमग्नचित्तत्वान्नैषांतथैतदेवानुष्ठायकृतकृत्यःस्यात्पुरुषः कृतंनिरवशेषितंकृत्यंयथाकरणीयंयेनसतथा एतज्ज्ञानप्रतिपादितार्थानुष्ठानव्यतिरेकेणयाकाचित्क्रियानुष्ठीयतेतयासम्यगनुष्ठितयापिनकृतार्थीस्यादितिसर्वज्ञानानांसर्वक्रियाणांचयथोक्तज्ञाननिष्ठत्वेनानुष्ठितानांपरमात्मस्वरूपसमापत्तिलक्षणपरसिद्धिसाधनत्वमित्युक्तं कृहीयथः क्लेशमूलाश्रितफलपदवीकर्मभूरिशाखोऽसज्ज्ञानव्यक्तसंसाराश्रुपचितविषयज्ञानपत्रौघचित्रम् अश्वत्थंछित्त्वामेनंभुवनत्रयमयंतत्त्वदृग्व्याक्रियाहेतोः संतोध्यायेत्शस्त्रेणैतेनविज्ञानितेबोधमग्नेजयंतु २० ॥ इतिश्रीराजानकरामविरचितेवाक्यार्थान्वयमात्रेसर्वतोभद्रनाम्निभगवद्गीताविवरणेपंचदशोऽध्यायः १५ ॥

मूल

पुरविधु

अथाध्यायपंचदशकार्थमुपसंहरति

ललितकी[illegible]टीका १५

इत्युक्तेनप्रकारेणेदंभवतानघअत्यन्तानुभूतफलमति रहस्यंशास्त्रमध्यायपंचदशकरूपंहेऽनघव्यसनशून्यमयानुभवमुक्तम् एतदेवयथोक्तंबुद्ध्वासम्यगनुभूयबुद्धिमत्त्वं नतत्त्वव्यवहारबुद्ध्या एतेनज्ञानेनैवकृतकृत्यत्वंनतुकृतेनापिशास्त्रविजयार्थेहरणस्वापभोगादिनाचकरोऽद्भुतद्योतकः कृतेनहिकृत्यंकृतकृत्यताहेषा एतेनज्ञानेनैव

श्री॰ गी॰टी॰ पं॰

वेतिचिंतं विशिष्टजन्मप्रसूतेन पुरुषेण यत्कर्तव्यं तत्सर्वं भगवत्त
त्त्वे विदिते कृतं भवेत् न त्वन्यथा कर्तव्यं समाप्यते कस्यचिदिति अ
भिप्राय इत्याम् उपासनार्थं देहेऽस्मिन्नीश्वरं पुरुषोत्तमम् पुरुषो
त्तमयोगाख्ये प्राहृयस्तं तन्मोहरिम् २०॥ इतिश्रीभगवद्गीता
टीकायां वासव्याख्यायां पुरुषोत्तमयोगो नाम पंचदशोऽध्यायः १५

१०३

पंचोले टीका

अध्यायार्थमुपसंहरन् उक्तस्य मोक्षफलस्य भगवत्तत्त्वज्ञानस्य
स्तुतिमाह इतीति हे अनघ मया इति इदं इत्येतत् गुह्यतमं अत्यंतर
हस्यं शास्त्रं सकलगीताशास्त्रार्थभूतमध्यायं पंचदशाध्यायरूपं तेन त
व मनघ कंपनत्य यथादर्शितार्थं ज्ञात्वा बुद्धिमान् स्यात् भगवत्तत्त्वज्ञाने
कर्तव्यं सर्वं परिपूर्णं भवति २०॥ इतिश्रीभगवद्गीतासूपनिषत्सु
ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पंचोले टीकायां पंचद
शोऽध्यायः १५॥

व्रजवीरसमिश्रबोधिनी॥

इदानीमध्यायार्थमुपसंहरति इतीति इत्यनेन प्रकारेण गुह्य
तमं रहस्यं शास्त्रमुपदेशात्मकमुक्तमुपदिष्टं एतत् बुद्ध्वा नि
श्चित्य बुद्धिमान् आत्मज्ञानवान् कृतकृत्यो विहितस्वोचितक्रियः
स्यादिति अथवा शास्त्रमेव शास्त्रं शास्त्रविषयात् उक्तमं गुह्यनीय
यं विधेयं इति मया उपदिष्टमेतद् बुद्ध्वा अवगम्य बुद्धिमान्निश्चयवान् कृ
पवीरः कृतकृत्यः कृतास्ववशीकृता कृत्या शास्त्रपालनक्रि
यायेन स इति कृत्या कृतकृत्यो भ्यस्तशास्त्रविषयवान् कृतार्थो
भवतीत्यर्थः भारतेति भरतकुलोत्पन्न स्वमतएव ममसाक्षा
दर्थमुपदेष्टुमुपदिष्टस्वधर्मपालनार्थं वा कायवाग्मनसमर्थ
नाप्रतिपादकं संबोधनवचनमित्यर्थः २० इति श्रीभगव
द्गीताव्याख्यायां व्रजवीरसमिश्रबोधिन्यां पंचदशोऽध्यायः १५

मधुभाष्य

१॰ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्री मद्भगवद्गीताभाष्ये पंचदशोध्याय: १५॥

104

भाषाअनुवादटीका

अब अध्याय के अर्थ का उपसंहार करते हैं कि हे अनघ निः
पाप अर्जुन यह संक्षेप से अति रहस्य स्वरूप जो सब शा
स्त्रों का सारांश सो मैं ने कहा केवल बीश श्लोक कर एक अ
ध्याय छोड़ के इस से जो कोई होय यह मेरी कही वाक्य को
बोध करि के बुद्धिमान कहावता औ ज्ञानी हो चरितार्थ कृ
तार्थ होता है तो हे भारतवंशी अर्जुन तुम जो चरितार्थ होउ
गे इस मे और कुछ कहना है सर्वत्र परिपूर्ण परमात्मा रूप
श्रीकृष्ण जी संसार वृक्ष को भिन्न करके पुरुषोत्तम योग नाम
इस पंद्रहें अध्याय मे अपना परमपद अर्जुन को उपदेश किया
२० इति श्रीजगन्नाथमल्लकविरचित मनभावनीटीकायां पञ्च
दशोऽध्यायः १५

दोहा

अति पाय उमहि पाखयहकहा अनघमें तोहि बुद्धिमा
न इहज्ञानके भारत कृतार्थ होंहि २० ॥





104